UNIVERSAL
LIBRARY

OU_180816

UNIVERSAL
LIBRARY

GAEKWAD'S ORIENTAL SERIES

Published under the Authority of the
Government of His Highness the
Maharaja Gaekwad of Baroda.

General Editor:
B. BHATTACHARYYA, M. A., PH. D.

No. XXXVII

अपभ्रंशकाव्यत्रयी।

THREE APABHRAMS'A WORKS

OF

JINADATTASŪRI

With Commentaries

Edited with Introduction, Notes and Appendices, etc.

BY

LALCHANDRA BHAGAWANDAS GANDHI,

Jain Pandit, Oriental Institute, Baroda

1927

Oriental Institute

BARODA

Published on behalf of the Government of His Highness the Maharaja Gaekwad of Baroda by Benoytosh Bhattacharyya at the Oriental Institute, Baroda and Printed by Y. K. Padwal at the Tatva-Vivechaka Press, Parel Road, Byculla, Bombay.

Price Rs. 4-0-0.

जिनदत्तसूरिमूर्तिः ।



वि. सं. १३३४ वर्षे पत्तने जिनप्रबोधसूरिणा प्रतिष्ठिता ।

क्रमसूची ।

जिनदत्तसूरिमूर्तिप्रतिकृतिः ।

भूमिका ५–११७
जिनवल्लभसूरिः .... ९—३७
जिनदत्तसूरिः .... ३७—६४
जिनपालोपाध्यायः .... ६५—७०
सूरप्रभोपाध्यायः .... ७०—७१
अपभ्रंशभाषा ७२–११२
काव्यत्रयी—परामर्शः ११३–११७
काव्यत्रयी-विषय-प्रदर्शनम्.... .... ११९–१२४

जिनवल्लभ-जिनदत्तसूरिप्रभृतेश्चित्रप्रतिकृतिः ।

काव्यत्रयी .... १—८०
चर्चरी .... १—२७
उपदेशरसायनरासः .... २९—६६
कालस्वरूपकुलकम् .... ६७—८०
परिशिष्टम् ८१–११६
सङ्घपट्टकः .... ८१—८६
गणधरसार्धशतकम् ८७–१०६
सुगुरुपारतन्त्र्यम् १०७–१०९
जिनदत्तसूरिस्तुतिः ११०–११२
पाठभेदः ११३
विशिष्टनामसूची ११३–११९

भूमिका

भाषाभेदकोविदाः सुपरिशीलितवाङ्मया मनीषिणः !

भाषाभेदाभिज्ञेषु न नामाभिनवं निवेदनीयमपभ्रंशभाषाविषये वा तत्काव्याविषये, तथापि याथातथ्येन तत्स्वरूपानभिज्ञेषु तज्जिज्ञासुषु स्वल्पज्ञेषु सूपयोगि समुपकारकमवसरोचितमत्यावश्यकं प्रासङ्गिकं चात्र तन्निवेदनम्; यद्भाषामयी प्रस्तुता काव्यत्रयी भारतीभक्तैरद्य सकुतूहलं दृष्टिपथपान्थीक्रियते ।

किञ्च ततोऽपि पूर्वमेतस्याः काव्यत्रय्याः कवयितुः परिचय आवश्यक इति प्रज्ञापनीये तच्चरिते तत्पूज्यस्य गुरुवर्यजिनवल्लभस्येतिवृत्तं प्रभूतग्रन्थपर्यालोचनतः प्रोद्धृत्य प्राक् प्रदर्श्यते, यद्गुणस्तुतिरूपं चर्चरीसंज्ञितं सप्तचत्वारिंशद्वृत्तसमन्वितं प्रस्तुतकविजिनदत्तसूरिप्रणीतं काव्यमस्यां काव्यत्रय्यां प्रागेव प्रेक्षावद्भिः प्रेक्षकैः प्रेक्षणक्षणीक्रियते ।

जिनवल्लभसूरिः ।

जेसलमेरुजैनभाण्डागारीय-ग्रन्थसूच्यामप्रसिद्धग्रन्थग्रन्थकृत्परिचये (पृ. ४०-४१) संक्षेपतोऽस्माभिः परिचायितोऽयं सूरिर्विशेषतोऽत्राभिज्ञाप्यते । विक्रमीयद्वादशशताब्द्यां सूरेरस्य सुप्रतिष्ठिता सत्ताऽसाधारणं पाण्डित्यं चारित्रपात्रत्वं च समधिगतप्रमाणैः सुतरां प्रतीयते । वि. सं. ११२९ वर्षे जिनचन्द्रसूरिविरचिता संवेगरङ्गशालाऽनेन गणिना संशोधिताऽऽसीदिति वि. सं. १२०७ वर्षीयताडपत्रीयपुस्तक–(जेसलमेरभां० सूची पृ. २१, अप्र० पृ. ३८) प्रान्तोल्लेखादवगम्यते ।

वि. सं. ११३८ वर्षे प्राग्वाटकुलीननेमिकुमारलिखितं कोट्याचार्यकृताया विशेषावश्यकटीकायास्ताडपत्रात्मकमेतदीयं प्राचीनं जीर्णमादर्शपुस्तकमद्याप्युपलभ्यते; यत्र जिनेश्वरसूरिशिष्यत्वमस्य निरदेशि । सूरिरयं स्वयमपि स्वीये प्रश्नोत्तरषष्टिशतककाव्येऽष्ट-

---

१ 'लिखितं पुस्तकं चेदं **नेमिकुमार**संज्ञिना प्राग्वाटकुलजातेन शुद्धाक्षरविलेखिना ॥ **सं. ११३८** पौषवदि ७ ॥ **कोट्याचार्य**कृता टीका समाप्तेति ॥ ६ ॥ ग्रंथाग्रमस्यां त्रयोदश सहस्राणि सप्तशताधिकानि १३७०० । पुस्तकं चेदं विश्रुतश्री**जिनेश्वरसूरि**शिष्यस्य **जिनवल्लभगणे**रिति' ॥—पुण्यपत्तन(पूना)स्थ 'भांडारकरइन्स्टीट्यूट' संज्ञकसंस्थायां प्रतिः (प्रतिकृतिप्राप्तिस्तु **सूर्यपुरीयजैनानन्दपुस्तकालयतः**)

सप्ततिकादौ च जिनेश्वरसूरिमभयदेवाचार्यं च सत्स्तुतिपात्रं सद्गुरुं च समसूचयत्। प्रायेणायं निजां कृतिं 'जिनवल्लभ' इति 'जिनवल्लभगणि' इति च नाम्नाऽभ्यजिज्ञपत्।

---

१ कः स्यादम्भसि (म्बुधौ)त्रारिवायसवति क्व द्वीपिनं हन्त्ययं
लोके प्राह हयः प्रयोगनिपुणैः कः शब्दधातुः स्मृतः ? ।
ब्रूते पालयिताऽत्र दुर्धरतरः कः क्षुभ्यतोऽम्भोनिधे—
ब्रूहि श्री**जिनवल्लभ**स्तुतिपदं कीदृग्विधाः के सताम् ? ॥
—जिनवल्लभसूरिविरचिते प्रश्नशते (श्लो० १५९)

अव०—**मद्गुरवो जिनेश्वरसूरयः** । मद्गुर्जलवायसस्तस्य रवः शब्दः । अजिने चर्मणि 'निमित्तात् कर्मसंयोगे सप्तमी' इत्यनेन 'अजिने' इत्यत्र सप्तमी । हे अश्व ! 'रस लस शब्दे' इति वचनात् । हे ऊ रक्षक 'अवतीति क्विप्, अव्यचीत्यादिना ऊटि रूपम्' । रयो वेगः । मम **जिनवल्लभस्य** गुरवो मद्गुरवः । एवंविधाः सन्तः के **जिनेश्वरसूरयः** सतां शिष्टानां स्तुतिपदमित्यर्थः ॥

पाके धातुरवाचि कः ? क्व भवतो भीरोर्मनःप्रीतये ?
सालङ्कारविदग्धया वद कया रज्यन्ति विद्वज्जनाः ? ।
पाणौ किं मुरजिद् बिभर्ति ? भुवि तं ध्यायन्ति के वा सदा ?
के वा स(म)द्गुरवोऽत्र चारुचरणश्रीसुश्रुता विश्रुताः ? ॥ (श्लो० १५८)

अव०—**श्रीमदभयदेवाचार्याः** । 'श्री पाके' इति वचनात् श्रीधातुः । ममाभयं ददातीति मदभयदस्तस्मिन् यो मदभयं ददातीति तत्र मम मनः प्रीतियुक्तं भवतीत्यभिप्रायः । त्राचा वचनेन । अरा विद्यन्ते यत्र तदरि चक्रं । ए विष्णौ भक्तिर्येषां ते आः वैष्णवाः तत्र भक्तिरित्यण् ॥

—स्तोत्ररत्नाकरे (म्हेसाणाश्रीयशोविजयजैनसंस्कृतपाठशालया प्रकाशिते भा० २)
लोकार्च्य**कूर्चपुरगच्छ**महाघनोत्थमुक्ताफलोज्वल**जिनेश्वरसूरि**शिष्यः।
प्राप्तः प्रथां भुवि **गणिर्जिनवल्लभो**ऽत्र तस्योपसम्पदमवाप्य ततः श्रुतं च ॥
—अष्टसप्ततिकायां (चित्रकूटीयमहावीरप्रासादशिलालेखे)

२ सूक्ष्मार्थविचारापरनामसार्धशतकप्रान्ते—

जिणवल्लहगणिलिहियं सुहुमत्थवियारलवमिणं सुअणा ।
निसुणंतु मुणंतु सयं परे वि बोहिंतु सोहंतु ॥

षडशीत्यपरनामागमिकवस्तुविचारसारप्रान्ते—

जिणवल्लहोवणीयं जिणवयणामयसमुद्दबिंदुमिमं ।
हियकंखिणो बुहजणा निसुणंतु गुणंतु जाणंतु ॥

पिण्डविशुद्धिप्रान्ते—

इच्चेयं **जिणवल्लहेण गणि**णा पिंडनिज्जुत्तिओ किंची ।
पिंडविहाणजाणणकए भव्वाण सव्वाण वि ।

पौषधविधिप्रान्ते—

गणिजिणवल्लहेण पोसहविहिमिह लिहियं हियट्ठया ।
सइ हियए कुणंतु निसुणंतु गुणंतु मुणंतु **विहि**रया ॥

सङ्घपट्टकप्रान्ते—(परि० १, पृ० ८६ द्रष्टव्यम्)

प्रश्नोत्तरषष्टिशतकप्रान्ते—

प्रत्येकं हरिधान्यभेदशशिनः पृच्छन्ति किं लुब्धकः !
त्वं प्राप्तं कुरुषे मृगव्रजमथोऽखादद् गृहीताऽवदत् ।
कीदृग् भाति सरोऽर्हतश्च सदनं किं चाल्पधीर्नाप्नुवन्
पृष्टः प्राह तथा च केन मुनिना प्रश्नावलीयं कृता ? ॥—अव० **जिनवल्लभेन।**

अजितशान्तिस्तवप्रान्ते—

इय विजया–जियसत्तुपुत्त सिरिअजियजिणेसर !
तह अइरा–विससेणतणय ! पंचमचक्कीसर ! ।
तित्थंकरसोलसम ! संति**जिण वल्लह** संतह
कुरु मंगलमवहरसु दुरियमखिलं पि थुणंतह ॥

पार्श्वनाथस्तोत्रप्रान्ते—

वाघारियपाणि य मासिएण सावणसियट्ठमीए तुमं ।
सम्मेयपव्वए **जिण वल्लह**सिवसुक्ख पत्त जए ॥

भक्तिब्भरादि–वीरस्तोत्रप्रान्ते—

इय तुह गुणकणगुणणेण जं मए किंचि अज्जियं कुसलं ।
तेण तुमं चिय मज्झं सया वि **जिण वल्लहो** होज्जा ॥

दुरियरयादि–वीरस्तोत्रप्रान्ते—

एवं वीरजिणेस दीणेसर ! तुमं मोहंधविद्धंसणं ।
भव्वंभोरुहबोहसोहजणयं दोसायरुच्छेयणं ।
थोउं जं कुसलाणुबंधिकुसलं पत्तो म्हि किंचि तओ
जाइज्जा **जिण वल्लहो** मह सया पायप्पणामो तुह ॥

भावारिवारणादि–वीरस्तोत्रप्रान्ते—

इत्थं ते समसंस्कृतस्तवमहं प्रस्तावयामासिवान्
आशंसे जिनवीर ! नेन्द्रपदवीं न प्राज्यराज्यश्रियम् ।
लीलाभां**जि न वल्लभ**प्रणयिनी–वृन्दानि किन्त्वर्थये
नाथेदं प्रथय प्रसादविशदां दृष्टिं दयालो ! मयि ॥

वि. सं. ११६४ वर्षेषु चानेन **जिनवल्लभगणिना** निजाष्टसप्ततिका-सङ्घपट्टक-धर्मशिक्षाऽऽदि चित्रकूट-नरवर-नागपुर-मरुपुरादिषु स्वप्रतिष्ठितवीरविधिचैत्यादिषु प्रशस्तिरूपेणोत्कीर्णं कारितमासीदिति श्रूयते ।

वि. सं. ११४१ वर्षे दीक्षाभाक्, वि. सं. ११६९ वर्षे सूरिपदप्रतिष्ठितः, वि. सं. १२११ वर्षे च स्वर्गभाक् प्रस्तुतकाव्यत्रयीप्रणेता जिनदत्तसूरिरेतस्य जिनवल्लभाख्यनिजगुरोर्भूरिगुणस्तुतिरूपां चर्चरीं व्यरचयत्, याऽत्र समीक्ष्यते । यत्र जिनवल्लभसूरेरसाधारणविद्वत्त्वं तत्प्रकटितविधिपथस्य चाम्नायः प्राबोधि । तथा च स एव सूरिर्गणधरसार्धशतके स्वगुरुपरम्पराप्रदर्शनपूर्वमलङ्कारालङ्कृतां विस्तृतां गुरुपारतन्त्र्यस्तवे च संक्षिप्तां जिनवल्लभसूरिस्तुतिं समकार्षीत्, परिशिष्ट(२-३)दर्शनेन तत् प्रकटं परिज्ञातं भविष्यति ।

वि. सं. ११७० वर्षे मुनिचन्द्रसूरिणा जिनवल्लभीयसार्धशतकस्य चूर्णिर्व्यरचि । वि. सं. ११७० वर्षे धारायां जिनदत्तसूरिशिष्येण जिनरक्षितसाधुना, वि. सं. ११७१ वर्षे पत्तने जयसिंहराज्ये जिनदत्तसूरिशिष्यब्रह्मचन्द्रगणिना च लिखितायां कविपल्ह-प्रणीतायां पट्टावल्यां जिनवल्लभस्य नाम परिपठ्यते (परि. ४) । वि. सं. ११७१ वर्षे धनेश्वरसूरिसमर्थितायां जिनवल्लभगणिप्रणीतस्य सूक्ष्मार्थविचारसारापरनामसार्धशतकस्य वृत्तावपि जिनवल्लभस्य सूरिविशेषणमभयदेवसूरिशिष्यत्वं च व्याहारि ।

जिनवल्लभसूरिरचितस्यागमिकवस्तुविचारसारापरनामषडशीतिकस्य वृत्तिर्जयसिंहदेवराज्ये वि. सं. ११७२ वर्षे बृहद्गच्छीयजिनदेवोपाध्यायशिष्यहरिभद्रसूरिणा समर्थिता भावनगरस्थयाऽऽत्मानन्दसभया प्राचीनकर्मग्रन्थेषु प्रकाशिता समुपलभ्यते ।

---

१ **शशि-मुनि-पशुपति**सङ्ख्ये वर्षे विक्रमनृपादतिक्रान्ते ।
चैत्रे सितसप्तम्यां समर्थितेयं गुरौ वारे ॥

—सा. श. वृत्तौ धनेश्वराचार्यः ।

२ कर्मप्रकृति-पञ्चसंग्रहादिशास्त्रादेवोद्धृत्य कर्मगतकतिचित्पदार्थानां प्रसङ्गतस्तदितरेषां च केषांचित् प्ररूपणाय सूक्ष्मपदार्थनिष्कनिष्कषणकषपट्टकसंनिभप्रतिभः श्री**जिनवल्लभा**ख्यः **सूरिः** साधशतकाख्यं प्रकरणं चिकीर्षुः + +

—सा. श. वृ. प्रारम्भे धनेश्वराचार्यः ।

'जिणवल्लहगणि'त्ति **जिनवल्लभगणिनामकेन** मतिमता सकलार्थसंग्राहिस्थानाङ्गाद्यङ्गोपाङ्गपञ्चाशकादिशास्त्रवृत्तिविधानावाप्तावदातकीर्तिसुधाधवलितधरामण्डलानां श्रीमद**भयदेवसूरी**णां शिष्येण लिखितं कर्मप्रकृत्यादिगम्भीरशास्त्रेभ्यः समुद्धृत्य दग्धं **जिनवल्लभगणि**लिखितम् ।

पूर्वोक्तस्य वस्तुविचारसारस्य प्राकृतविवरणमेतस्यैव जिनवल्लभसूरेः शिष्येण रामदेवगणिना विहितं विलोक्यते (जेसलमेरभां० सूची पृ. ४६) यस्य रचना वि. सं. ११७३ वर्षे इत्यन्यत्र पठ्यते ।

जिनवल्लभसूरिप्रणीतस्य पिण्डविशुद्धिप्रकरणस्य वृत्तिश्चान्द्रकुलीनचन्द्रसूरेरन्तेवासिना यशोदेवसूरिणा वि सं. ११७६ वर्षे दृब्धोपलभ्यते (जेसलमेरभां० सूची पृ. ३६, पत्तनीयभां० सूची च द्रष्टव्या)

सुप्रसिद्धवैराग्यशतककर्तुः कविपद्मानन्दस्य पित्रा जिनवल्लभसूरिशान्तोपदेशामृतसिक्तेन धनदेवश्रेष्ठिना नागपुरे नेमिनाथसदनं निर्मापितमासीत्—

"सिक्तः श्रीजिनवल्लभस्य सुगुरोः शान्तोपदेशामृतैः
श्रीमन्नागपुरे चकार सदनं श्रीनेमिनाथस्य यः ।
श्रेष्ठी श्रीधनदेव इत्यभिधया ख्यातश्च तस्याङ्गजः
पद्मानन्दशतं व्यधत्त सुधियामानन्दसम्पत्तये ॥"

—वैराग्यशतकप्रान्ते ।

सुप्रसिद्धसिद्धान्तव्याख्याता कुमारपालभूपालसमकालीनो मलयगिरिरपि जिनवल्लभीयषडशीतिकं व्याख्यातवान् ।

चान्द्रकुलीनधनेश्वरसूरि—(वि. सं. ११७१ वर्षे जिनवल्लभीयसार्धशतकवृत्तिकृत्)—प्रशिष्योऽजयदेवार्णोराजादिसम्मानितधर्मसूरेः शिष्यो यशोभद्रसूरिर्जिनवल्लभीयागमिकवस्तुविचारसारविवरणे इत्थमुल्लिखति स्म—

"क्वासौ श्रीजिनवल्लभस्य रचना सूक्ष्मार्थचर्चाऽञ्चिता
क्वेयं मे मतिरग्रिमाप्रणयिनी मुग्धत्वपृथ्वीभुजः ।
पङ्गोस्तुङ्गनगाधिरोहणसुहृद् यत्नोऽयमायांस्ततो-
ऽसद्ध्यानव्यसनार्णवे निपततः स्वान्तस्य पोतोऽर्पितः ॥"

—पत्तनीयभां० सूची ।

वि. सं. १२२३ वर्षे सूरिपदभृत् वि. सं. १२७७ वर्षे च स्वर्गभाग् जिनपतिसूरिर्जिनवल्लभीयसङ्घपट्टकविवृतिप्रारम्भे प्रवक्ति स्म—

"क्वेमाः श्रीजिनवल्लभस्य सुगुरोः सूक्ष्मार्थसारा गिरः
क्वाहं तद्विवृतौ क्षमः क्रमजुषां दुर्मेधसामग्रणीः ।
द्विद्(ड्)गन्न(?)द्विपदन्तभञ्जनभुजस्तम्भैर्जयश्रीः क्व नु
प्राप्या सङ्गरमूर्धनि व्यवसितः क्लीबः क्व तल्लिप्सया ॥

---

१ अग्रे प्रदर्श्यमानजिनदत्तसूरिचरितेऽस्य संवादोऽवलोक्यते ।

तथापि तस्यैव पदप्रसादः फलिष्यति द्राक् मम निर्विवादः ।
किमङ्ग ! पङ्गोर्भवनाङ्गणस्पृक् कल्पद्रुमः पूरयते न कामान् ? ॥

इह हि सदृशां पदार्थसार्थप्रकटनपटीयसि समूलकाषङ्कषितानिःशेषदोषे निर्वाणचरमाशिखरिशिखरमधिरूढे भगवति भास्वति श्रीमहावीरे, तदनु दुष्षमासमयभविष्णुदशमाश्चर्यमहादोषान्धकारोदयात् तनिमानमासादयति जिनराजमार्गे, मन्दायमानेषु सदृष्टिषु सात्त्विकेषु सत्त्वेषु, प्रोज्जृम्भमाणेषु सदालोकबाह्येषु तामसेषु, निरङ्कुशमत्तमतङ्गजवद् यथेच्छं गर्जत्सञ्चरिष्णुषु प्रमादमदिरामदावदायमानानवद्यविद्यासम्पत्तिषु सातशीलतया स्वकपोलकल्पनाशिल्पिकल्पितजिनभवननिवासेषु **चौलुक्य**वंशमुक्तामाणिक्य—चारुतत्त्वविचारचातुरीधुरीण—विलसदङ्गरङ्गनृत्यन्नीत्यङ्गनारञ्जितजगज्जनसमाज—श्री**दुर्ल—भराज**महाराजसभायाम् अनल्पजल्पजलधिसमुच्छलदतुच्छविकल्पकल्लोलमालाकवलितवहलप्रतिवादिकोविदग्रामण्या संविग्नमुनिनिवहाग्रण्या सुविहितवसतिपथप्रथनरविणा वादिकेसरिणा श्री**जिनेश्वरसूरि**णा श्रुतियुक्तिभिर्बहुधा चैत्यवासव्यवस्थापनं प्रति प्रतिक्षिप्तेष्वपि लाम्पट्याभिनिवेशाभ्यां तन्निर्बन्धमजहत्सु यथाच्छन्देषु ततस्तदुत्सूत्रदेशनाविरलगरललहरीचरीकृष्यमाणहृदयभूमिनिहितचेतनाबीजमुदग्रदुर्निग्रहकुग्रहावग्रहशोशुष्यमाणविवेकाङ्कुरं निरर्गलमुखकुहरनिःसरद्वर्वाणीकृपाणीकृत्तधार्मिकमर्माणं श्राद्धसङ्घं निरीक्ष्य तदुपचिकीर्षया हृद्यानवद्यसमग्रविद्यानिताम्बिनीचुम्बितवदनतामरसः सान्द्रसंवेगशास्त्रार्थरसायनपानवान्तकामरसः सुविहितमुनिचक्रवालशिखामणिः सिद्धान्तविपर्यस्तप्ररूपणमहान्धकारनिकारतरणिः सुगृहीतनामधेयः प्रणतप्राणिसन्दोहवितीर्णशुभभागधेयः चैत्यवासदोषभासन—सिद्धान्ताकर्णनापासितकृतचतुर्गतिसंसारायासजिनभवनवासः सर्वज्ञशासनोत्तमाङ्गस्थानादिनवाङ्गवृत्तिकृच्छ्रीम**दभयदेवसूरि**पादसरोजमूले गृहीतचारित्रोपसम्पत्तिः करुणासुधातरङ्गिणीतरङ्गरङ्गत्स्वान्तः सु**विधिमार्ग**वभासनप्रादुःषद्विंशदकीर्तिकौमुदीनिधूदितदिक्सीमन्तिनीवदनध्वान्तः स्वस्योपसर्गमभ्युपगम्यापि विदुषा दुरध्वविध्वंसनमेवाधेयमिति सत्पुरुषपदवीमदवीयसीं विदधानः समुज्जितभूरिर्भगवान् श्री**जिनवल्लभसूरिः** मोहान्धतमसध्वंसनपटिष्ठसत्पथप्रकाशनगरिष्ठरत्नदीपायमानं दुर्वासनाशिलासञ्चयकुट्टाकं श्री**सङ्घपट्टक**ाख्यं प्रकरणं चिकीर्षुः××"

सङ्घपट्टकविवृतिप्रान्ते—

" **सूरिः** श्री**जिनवल्लभो**ऽजनि बुध**श्चान्द्रे** कुले तेजसा

चित्रं राजसभासु यस्य कृतिनां कर्णे सुधादुर्दिनं
तन्वाना विबुधैर्गुरोरपि कवेः कैर्न स्तुताः सूक्तयः ? ॥ १ ॥
हित्वा वाङ्मयपारदश्वातिलकं यं दीप्रलोकम्पृणं
प्रज्ञानामपि रञ्जयन्ति गुणिनां चित्राणि चेतांस्यहो ! ।
लुण्टाक्यश्च्युततन्द्रचन्द्रमहसामद्याप्यविद्यामुषः
कस्यान्यस्य मनोरमाः सकलदिक्कूलङ्कषाः कीर्तयः ? ॥ २ ॥
माधुर्यशार्करितशर्करया रयाद् यं पीयूषवर्षमिव तर्कगिरा किरन्तम् ।
विद्यानुरक्तवनिताजनितास्यलास्यं हित्वा परत्र न मनो विदुषामरंस्त॥३॥"

पञ्चलिङ्गीविवरणप्रान्ते—

" तदनु समभूच्छिष्यस्तस्य प्रभु**र्जिनवल्लभो**
जगति कवितागुम्फा यस्य द्रवद्रसमन्थराः ।
अनितरकविच्छायापत्त्या चमत्कृतिचुञ्चवो
न हृदि मधुरा लग्नाः कस्य स्मरस्य यथेषवः ? ॥ " इत्यादि ।

वि. सं.१२४९ वर्षे जन्मभाजो जिनेश्वरसूरेः पिता जिनवल्लभसूरि[२]गुणवर्णनगीतनिर्माता मरुकोट्टनिवासी नेमिचन्द्रभाण्डागारिक इत्थं प्रास्तौत्—

"अज्ज[३] वि गुरुणो गुणिणो सुद्धा दीसंति तडयडा केइ ।
परं **जिणवल्लह**सरिसो पुणो वि **जिणवल्लहो** चेव ॥
वयणे वि सुगुरु**जिणवल्लह**स्स केसिं न उल्लसइ सम्मं ।
अह कह दिणमणितेयं उल्लयाणं हरइ अंधत्तं ! ॥
दिट्ठा वि के वि गुरुणो हियए न रमंति मुणियतत्ताणं ।
के वि पुण अदिट्ठ च्चिय रमंति **जिणवल्लहो** जेम ॥ "

—षष्टिशतकप्रकरणे (गा.१०७,८,१२९)

---

१ तच्छब्देनात्राग्रेऽपि च नवाङ्गीवृत्तिकर्तुः सुप्रसिद्धस्या**भयदेव**सूरेरुपादानम्, यच्चरितं **गणधरसार्धशतक**वृत्ति-**प्रभावक**चरितादौ प्रेक्ष्यते ।

२ 'इति परमार्हतभां॰**नेमिचंद्र**कृतानि श्री**जिम(न)वल्लु(ल्ल)भसूरि**सुगुरुगुणवर्णनागीतानि।'

३ अद्यापि गुरवो गुणिनः शुद्धा दृश्यन्ते क्रियाकठोराः केऽपि ।
परं **जिनवल्लभ**सदृशः पुनरपि **जिनवल्लभ** एव ॥
वचनेऽपि सुगुरु**जिनवल्लभ**स्य केषां नोल्लसति सम्यक् ।
अथ कथं दिनमणितेज उल्लूकानां हरत्यन्धत्वम् ? ॥
दृष्टा अपि केऽपि गुरवो हृदये न रमन्ते ज्ञाततत्त्वानाम् ।
केऽपि पुनरदृष्टा एव रमन्ते **जिनवल्लभो** यथा ॥

वि. सं. १२७८ वर्षे जयन्तविजयकाव्यकर्ता जिनशेखरसूरिप्रशिष्योऽभयदेवसूरिरिदं पद्यद्वयं व्याजहार—

"तच्छिष्यो **जिनवल्लभः** प्रभुरभूद् विश्वम्भराभामिनी—
भास्वद्भाललललामकोमलयशःस्तोमः शमारामभूः ।
यस्य श्री**नरवर्म**भूपतिशिरःकोटीररत्नाङ्कुर—
ज्योतिर्जालजलैरपुष्यत सदा पादारविन्दद्वयी ॥
कश्मीरानपहाय सन्ततहिमव्यासङ्गवैराग्यतः
प्रोन्मीलद्गुणसम्पदा परिचिते यस्यास्यपङ्केरुहे ।
सान्द्रामोदतरङ्गिता भगवती वाग्देवता तस्थुषी
धारालामलभव्यकाव्यरचनाव्याजादनृत्यच्चिरम् ॥"

—जयन्तविजयकाव्यप्रान्ते ।

वि. सं. १२८५ वर्षे जेसलमेरौ धन्य—शालिभद्रचरित्रकारः पूर्णभद्रगणिरिदं निजगाद—

---

१ दिक्करि—कुलगिरि—दिनकरपरिमितविक्रमनरेश्वरसमायाम् ।
द्वाविंशतिशतमानं शास्त्रमिदं निर्मितं जयतु ॥—नि. सा.

२ वि. सं. ११६१, ११६४ वर्षीयौ **नरवर्म**नृपसत्तायां सङ्कलितौ शिलालेखौ प्रसिद्धिं प्राप्तौ (ए. इ. भा०२, पृ १८२, ट्रा. रो. ए. सो. भा० १, पृ. २२६) गूर्जरेश्वरसिद्धराजजयसिंहेन द्वादश वर्षाणि यावत् प्रयुध्य कृच्छ्रेण पराभूतोऽयं मालवपतिर्यद्विषये गूर्जरेश्वरपुरोहितः सोमेश्वर इत्थमुद्गिरति स्म—

"क्षिप्त्वा **धारापतिं** राजशुकवत् काष्ठपञ्जरे ।
यः काष्ठापञ्जरे कीर्तिराजहंसीं न्यवीविशत् ॥
एकैव जगृहे **धारा** नगरी **नरवर्म**णः ।
दत्ता येनाश्रुधारास्तु तद्वधूनां सहस्रधा ॥"

—कीर्तिकौमुदी (स० २, श्लो० ३१–३२)

तथा च वि. सं. १४२२ वर्षे कृष्णर्षिगच्छीयजयसिंहसूरिः—

"कर्णस्य मयणल्लासुकुक्षिशुक्त्येकमौक्तिकम् ।
तनयो न्यायवान् जज्ञे **जयसिंहो** महीपतिः ॥
कृत्वा विग्रहमुग्रसैन्यनिवहैर्यो द्वादशाब्दप्रमं
प्राग्द्वारं विदलय्य पट्टकरिणा भङ्क्त्वा च **धारा**पुरीम् ।
बद्ध्वा श्री**नरवर्म**भूधवमदःपादाग्रचर्मार्जितं
कोशं स्वं परिधाप्य खड्गमभवत् तीर्णप्रतिज्ञाभरः ॥"

—कुमारपालचरितमहाकाव्ये (श्लो० ४०–४१)

" आकर्ण्याभयदेवसूरिसुगुरोः सिद्धान्ततत्त्वामृतं
येनाज्ञायि न सङ्गतो जिनगृहे वासो यतीनामिति ।
तं त्यक्त्वा गृहमेधिगेहवसतिर्निर्दूषणा शिश्रिये
सूरिः श्रीजिनवल्लभोऽभवदसौ विख्यातकीर्तिस्ततः ॥ "

—जेसलमेरभां० सूची (पृ. २)

१७. सं. १२९३ वर्षे जिनवल्लभीयद्वादशकुलकानां विवरणकारो जिनपालगणिर्जिनवल्लभमित्थं परिचाययति स्म—

" श्रीमच्चान्द्रकुलाम्बरैकतरणेः श्रीवर्धमानप्रभोः
शिष्यः सूरिजिनेश्वरो मति–वचः–प्रागल्भ्यवाचस्पतिः ।
आसीद् दुर्लभराजराजसदसि प्रख्यापितागारवद्–
वेश्मावस्थितिरागमज्ञसुमुनिव्रातस्य शुद्धात्मनः ॥
तस्मादभूद् नवनवाङ्गविवृतिवेधा मेधानिधेस्तनुतरो जिनचन्द्रसूरेः ।
संस्थापितानुपमधामजिनेन्द्रपार्श्वः श्रीस्तम्भनपुरवरेऽभयदेवसूरिः ॥
अर्थानामूहते स्मातिगहनरचनागूढताभाजि वृत्ते–
ऽशीतिं युक्तां चतुर्भिश्चतुरतरमतिर्यः सुविद्यानिधानम् ।
द्रोणाचार्यप्रधानैः स्तुत इति मुदितैः पत्तने सङ्घमुख्यै–
र्नूनं धात्रा धरित्र्यां प्रवचनतिलकः कौतुकान्निर्ममेऽसौ ॥ ३ ॥

तथा च तदुक्तिः—

'आचार्याः प्रतिसद्म सन्ति महिमा येषामपि प्राकृतै–
र्मातुं नाध्यवसीयते सुचरितैर्येषां पवित्रं जगत् ।
एकेनापि गुणेन किन्तु जगति प्रज्ञाधनाः साम्प्रतं
यो धत्तेऽभयदेवसूरिसमतां सोऽस्माकमावेद्यताम् ॥ ४ ॥'
तस्य ख्यातिं निशम्य श्रुतनिकषनिधेर्गौतमस्येव दूरात्
पुर्याः श्रीआशि(सि)कायाः प्रवररजतकृत्त्वेन कच्चोलवर्षे ।
एवं विख्यातकीर्तिं सितपद(ट)वृषभः प्रेषयत् स्वं विनेयं
त्रैविद्यं शान्त–दान्तं निशमनविधयेऽथागमस्यास्य पार्श्वे ॥ ६ ॥

---

१ श्रीमत्सूरिजिनेश्वरस्य सुमुनिव्रातप्रभोः साम्प्रतं
शीघ्रं चारुमहाप्रबन्धकवितुर्वाक्यात् समारम्भि यत् ।
तन्निष्ठामधुना ययौ गुण–नवादित्यप्रमाणे वरे
वर्षे भाद्रपदे शि(सि)ते शुभतरे द्वादश्यहे पावने ॥ १ ॥—पत्तनीयभां. सूची ।

शिष्योऽथ स श्रीजिनवल्लभाख्यश्चैत्यासिनः सूरिजिनेश्वरस्य ।
प्राप्य प्रसन्नोऽभयदेवसूरिं ततोऽग्रहीज्ज्ञानचरित्रचर्याम् ॥ ७ ॥
शुभगुरुपदसेवाऽवाप्तसिद्धान्तसारावगतिगलितचैत्यावासमिथ्यात्वभावः ।
गृहिगृहवसतिं स स्वीचकाराऽतिशुद्धया सुविहितपदवीवद्गाढसंवेगरङ्गः ॥ ८ ॥
तथाऽस्य संविग्नशिरोमणेरभून्मनः प्रसन्नं सकलेषु जन्तुषु ।
जिनानुकृत्या भुवनं विबोधयन् यथा न शश्राम महामनाः स्वयम् ॥ ९ ॥
धर्मोपदेशकुलकाङ्कितसारलेखैः श्राद्धेन बन्धुरधिया गणदेवनाम्ना ।
प्राबोधयत् सकलवाग्जडदेशलोकं सूर्योऽरुणेन कमलं किरणैरिव स्वैः ॥ १० ॥
तानि द्वादश विस्तृतानि कुलकान्यम्भोधिवद् दुर्गमा-
न्यत्यन्तं च गभीरभूरिसुपदान्युन्निद्रितार्थाणि च ।
व्याख्यातुं य उपक्रमः कृशधियाऽप्याधीयते मादृशे—
नारोढुं तदमर्त्यशैलशिखरं प्रागल्भ्यतः पङ्गुना ॥ ११ ॥
एवं श्रीजिनवल्लभस्य सुगुरोश्चारित्रचूडामणे-
र्भव्यप्राणिविबोधने रसिकतां वीक्ष्याद्भुतां शाश्वतीम् ।
आदेशाद् गुणविन्नवाङ्गविवृतिप्रस्तावकस्यादरात्
प्रादात् सूरिपदं मुदञ्चितवपुः श्रीदेवभद्रप्रभुः ॥ १२ ॥
द्वादशकुलकविवृतिप्रान्ते—
जयन्ति सन्देहलतासिधाराः श्रोत्रप्रमोदामृतवारिधाराः ।
सूरेर्गिरः श्रीजिनवल्लभस्य प्रहीणपुण्याङ्गिसुदुर्लभस्य ॥ १ ॥
आसन्नत्र मुनीश्वराः सुबहवश्चारित्रलक्ष्म्यास्पदं
स्तोकाः श्रीजिनवल्लभेन सदृशा निर्भीकवाग्विस्तराः ।
सङ्ग्रामे गहनेऽपि भूरिसुभटश्रेण्या वरे भारते
तुल्याः श्रीजितवाजिना विजयिनो वीराः कियन्तोऽभवन् ॥ २ ॥
—पत्तनीयभां० सूची ।

अनेनैव जिनपालगणिना वि. सं. १२९४ वर्षे विरचितायां चर्चरीविवृतौ जिनवल्लभसूरिमधिकृत्य यत् प्रोचे, तत् स्वत्र साक्षादेवेति न पुनरुद्धियते ।

वि. सं. १२९५ वर्षे जिनवल्लभीयपिण्डविशुद्धिदीपिकाकार उदयसिंहसूरिरिदमुदगिरत्—

---

१ विक्रमतो वर्षाणां **पञ्चनवत्यधिकरवि**मितशतेषु ।
रचितेयं श्लोकैरिह सूत्रयुता त्र्यधिकसप्तशती ॥
—पि. वि. दीपिकाप्रान्ते (पत्तनीयभां० सूची)

" सुविहितसूत्रधारो जयति **जिनवल्लभो** गणिः ।
येन **पिण्डविशुद्धि**प्रकरणमकारि चारित्रभवनम् ॥ × ×

तत्र विशुद्धसिद्धान्तसुधासारणिः श्री**जिनवल्लभगणिः** संक्षिप्तरुचीनामनुग्रहार्थं संगृह्य यतीनामाहारदोषोद्धरणं **पिण्डविशुद्धि**प्रकरणं चिकीर्षुः × ×

—पि. वि. दीपिकाप्रारम्भे ।

इति विविधविलसदर्थसुविशुद्धाहारमहितसाधुजनम् ।
श्री**जिनवल्लभ**रचितं प्रकरणमेतन्न कस्य मुदे ? ॥
मादृश इह प्रकरणे महार्थपङ्क्तौ विवेश बालोऽपि ।
यद्वृत्त्यङ्गुलिलग्नस्तं श्रयत गुरुं **यशोदेवम्** ॥ "

—पि. वि. दीपिकाप्रान्ते (पत्तनीयभां० सूची)

वि. सं. १२९५ वर्षे सुमतिगणिना विरचितायां गणधरसार्धशतक**बृहद्वृत्तौ** प्रादर्शीत्थं **श्रीजिनवल्लभसूरेश्चरितम्**—

" पूज्याः श्री**अभयदेवसूरयः** श्री**पत्तन**मलञ्चक्रिरे । नूनमेत एव कुशाग्रीयमतयो निखिलसिद्धान्तपारगाः सुविहितचक्रवर्तिनो युगप्रवराः संविग्नव्रातिव्रातग्रामण्यः पुण्यपात्रमित्यादि प्रसिद्धिं प्राप्ताः सर्वत्र महीमण्डले ।

बाल्ये बुद्धिः, दीक्षा, विद्याभ्यासः

इतश्च तस्मिन् समये **आसिका**भिधानदुर्गवासी देवगृहनिवासी **कूर्चपुरीयो जिनेश्वरा**चार्य आसीत् । तत्र ये श्रावकपुत्रास्ते सर्वेऽपि तस्य मठे पठन्ति । तत्र च **जिनवल्लभ**नामा श्रावकपुत्रोऽस्ति । तस्य जनको दिवं गतस्तं जननी प्रतिपालयति । पाठयोग्यश्चासौ प्रक्षिप्तस्तया तत्र मठे पठितुम् । सर्वेभ्यश्चेट्टेभ्यस्तस्याधिकः पाठ आगच्छति । अथ कथञ्चित् तेन **जिनवल्लभ**चेट्टेन बहिर्गच्छता टिप्पनकमेकं प्राप्तम् । तत्र च विद्याद्वयं लिखितमास्ति सर्पाकर्षणी सर्पमोचनी च । ततः कण्ठगतां कृत्वा यावत् प्रथमा विद्या प्रत्ययाय पठिता, तावत् स्फटाटोपभीषणाः फूत्कुर्वाणाश्चञ्चललल्लज्जिह्वायुगलाः स्फुरदरुणलोचनाः सर्वाभ्यो दिग्भ्य आगच्छन्तो विद्याप्रभावाकृष्टा [दृष्टा] महानागाः । निर्भयचेतसा चिन्तितं तेन नूनं सप्रत्ययेयं विद्या । पुनरुच्चारिता द्वितीया, तस्याः प्रभावेण पुनः पश्चान्मुखाश्चलिताश्चक्षुःश्रवसः । एतच्च तत्स्वरूपं श्रुतं सूरिणा, ज्ञातं च निश्चितं सात्त्विकः पुण्या(गुणा)धिको गुण(पुण्य)पात्रमेष तस्मादात्मसात् कर्तुं युक्त इति । ततस्तं

---

१ शर–निधि–दिनकरसङ्ख्ये विक्रमवर्षे गुरौ द्वितीयायाम् ।
राधे पूर्णीभूता वृत्तिरियं नन्दतात् सुचिरम् ।' – जेसलमेरभां०सूची (अप्र०पृ० ५०, पृ० ३९)

द्राक्षा–खर्ज्जूराक्षोटक–खण्डमण्डक–खण्डमोदकादिदानपुरस्सरं वशीकृत्य तन्मातरं मधुरवचनैः सम्बोधयामास यदुतैष त्वदीयपुत्रोऽत्यन्तं प्रज्ञः स्फू(मू)र्तिमान् सात्त्विकः किं बहुना ? आचार्यपदयोग्योऽस्ति, तदेनमस्मभ्यं प्रयच्छ । एषा तावकीना धर्मदेवकुलिका तवान्येषां च निस्तारको भविष्यत्यत्रार्थे नान्यथा किञ्चिद् वक्तव्यमित्यभिधाय द्रम्मशत-पञ्चकं तस्या हस्ते प्रक्षिप्य क्षिप्रं दिदीक्षे **जिनवल्लभो**ऽध्यापितस्तेन समस्ता लक्षण-च्छन्दोऽलङ्कार–क(तर्क)–ग्रहगणितादिका निरवद्या विद्याः ।

शोधकबुद्धिः सिद्धान्त-पठनार्थं गमनम्, वाचनाचार्यपदम्, प्रतिष्ठादि

कदाचित् तस्याचार्यस्य ग्रामादौ प्रयोजनमुपतस्थे । ततो गच्छता पण्डितो **जिन-वल्लभो** भणित(तो भो)स्तावत् त्वया सर्वाऽपि चिन्ता कर्तव्या, यावत् प्रयोजनमनुशील्याहमागच्छामि । विनयप्रणतोत्तमाङ्गेन **जिनवल्ल-भे**नोक्तम्–' पूज्यैर्यथाऽऽदिष्टं तथा विधास्ये, परमाराध्यैः कार्यं निष्पाद्य शीघ्रमागन्तव्यम् ' इति । गतोऽसौ ग्रामान्तरे (रम्)। ततो द्वितीयेऽह्नि चिन्तितं **जिनवल्लभेन** यदुत भाण्डागारमध्ये मञ्जूषा पुस्तकभृता दृश्यते । तदेतेषु पुस्तकेषु किमस्ति निभालयामि यतस्तद्वशं सर्वं जातमस्तीत्युच्छोटितमेकं पुस्तकं तच्च सिद्धान्तसत्कम् । तत्रोक्तं पश्यति–' साधुना द्विचत्वारिंशद्दोषविशुद्धपिण्डेन गृहस्थ-गृहेभ्यो मधुकरवृत्त्या गृहीतेन संयमनिर्वाहहेतवे देहधारणा कर्तव्या । न कल्पते यतीनां सचित्तपुष्प–फलादिकं हस्तेनापि स्प्रष्टुं किमङ्गाहारयितुम् ? न युक्त एकत्र निवासो मुनीनामित्यादि विचारान् दृष्ट्वा मनसा विस्मितश्चिन्तयामास । अहो ! अन्य एव स कश्चिद् व्रताचारो येन मुक्तौ गम्यते, विसदृशस्त्वस्माकमेष समाचारः स्फुटं दुर्गतिगर्तायां निपततामेतेन न कश्चिदाधार इति चेतस्यालोच्य गम्भीरवृत्त्या पुस्तकादिकं यथास्थिति कृत्वा गुरूक्तरीत्या स्थितः । कतिपयदिनानन्तरम(रं)कृतकार्यस्ततः समागत आचार्यश्चिन्तयति किमपि स्थानं न हीनं जातम् । याव**ज्जिनवल्लभेन** मठ–वाटिका–विहार–द्रव्यसम्भार–कोष्ठागारप्रभृति सर्वं त्रातम्, तस्माद् यथा योग्यश्चिन्तितस्तथा निश्चितमेष भविष्यति, किन्तु सिद्धान्तं विना शेषा अशेषा अपि तर्कालङ्कारादिविद्या अनेनाभ्यस्ताः सिद्धान्तश्च यथावस्थितः सम्प्रतितनकालापेक्षया सम्पूर्णः साम्प्रतं श्री**अभयदेव**सूरिसमीपे श्रूयते तत् सिद्धान्तवाचनाग्रहणार्थं तत्पार्श्वे **जिनवल्लभं** प्रेषयामि । गृहीतायां तु सिद्धान्तवाच-नायां समस्तविद्यानितम्बिनीवल्लभं [जिनवल्लभं] स्वपदे संस्थापयिष्यामीति परिभाव्य वाचनाचार्यं कृत्वा निश्चिन्ततोपेतभोजनादियुक्तिं च चिन्तयित्वा **जिनशेखरा**भिधानद्वि-तीयशिष्यवैयावृत्त्यकरसमेतं **जिनवल्लभं** श्री**अभयदेवा**चार्यसमीपे प्रेषितवान्। **मरुकोट्ट-**

मध्ये**नाणहिल्लपाटकं** गच्छता रात्रौ तत्र **मरुकोट्टे माण**श्रावककारितजिनभवने प्रतिष्ठा विदधे ।

पत्तनेऽभयदेवसूरिपार्श्वे सिद्धान्ताभ्यासः

ततः **पत्तने** प्राप्तः, श्री**अभयदेव**सूरिवसतिं पृष्ट्वा प्रविष्टः । तत्र दृष्टो भगवांस्तीर्थंकरप्रतिरूपः संनिकृष्टोपविष्ट[विशिष्ट]सिद्धान्तवाचनार्थिप्रचुराचार्यः स्ववाग्वैभवावधूतदेवाचार्यः भक्तिवशोल्लसितबहलरोमाञ्चकञ्चुकिका(ता)ञ्चितकायलतिकेन वन्दितस्तेन । ततो गुरुणा दर्शनमात्रेणैव योग्यो विशुद्धात्मफलक इव कश्चिदयं दृश्यते इति परिभाव्य मधुरवाण्या पृष्टः कुतो भवान् ? किं च भवतः प्रयोजनमा[गम]नस्य ? । ततो [नि]योजितकरकुड्मलेन भगवद्दर्शनोद्भूतप्रभूतनिरुपमानबहुमानजल[द]पटलनिर्धौतान्तर्मलेन वचनामृतचारिमान्यक्कृतामृतनिर्मितरोहिणीवल्लभेन जगदे गणि**जिनवल्लभेन**–'भगवन् ! निजाखण्डलक्ष्मीप्रकर्षेण स्वःपुरीदासिकायाः समागतस्ता[व]त् श्रीमदा**सिका**यायाः । श्री**जिनेश्वरसूरि**णा स्वगुरुणा प्रेषितस्य मम मधुकरविभ्रमस्य यौष्माकीणवक्त्राम्भोज[विलिनसिद्धान्तरसपिपासितस्य मतिः सकलजनमनस्कामनाकल्पतरूणां भवतां पार्श्वे सिद्धान्तवाचनामध्येतुं व्यवस्यति । ततः–] 'कालम्मि आगए विऊ अपत्तं च न वाइज्जा पत्तं च न विमाणए ।'[1] इति विचिन्त्याभिहितम्–युक्तं विहितं भवता यत् सिद्धान्तवाचनाभिप्रायेणात्र समागतः । ततः प्रधानदिने वाचना दातुमारब्धा । यथा यथा सुगुरुर्जिनवचनवाचनां ददाति तथा तथा प्रमुदितचित्तः सन् स सुशिष्यः सुधारसमिव तामास्वादयति । हर्षोत्फुल्लपद्मदृशं तं तादृशं शिष्यमभिवीक्ष्य गुरवोऽपि तोपपोषद्विगुणीकृतवाचनादानोत्साहा बभूवुः । किं बहूक्तेन ? तथा तथा ज्ञापनबुद्ध्या श्रीपूज्या वाचनां तस्मै दातुं प्रवृत्ता यथा स्तोकेनैव कालेन सिद्धान्तवाचना परिपूर्णा जाता ।

ज्योतिषः पठनम्

तथा गुरोर्ज्यौतिषिक एकः पूर्वप्रतिपन्न आसीद् 'यदि भवतां कश्चिद् योग्यः शिष्यो भवेत्, तदाऽसौ मह्यं समर्पणीयो येन तस्मै समग्रज्योतिषं समर्पयामि' । ततः पूज्यै**र्जिनवल्लभगणिः** समर्पितः । तेनापि **जिनवल्लभा**य ज्योतिषं सुपरिज्ञानं प्रदत्तम् ।

प्रस्थाने सिद्धान्तगुरोः शिक्षा

एवं च गृहीतसिद्धान्तवाचनः सिद्धान्तोक्तक्रियासम्यगनुष्ठानबद्धमानसः समधिगतसस्फूर्तिज्योतिषः स्वगुरोः समीपे गमनाय मुत्कलनवचनं प्रतीच्छति । प्रभुभिरभिहितम् - 'वत्स ! सिद्धान्तोक्तसाधुसमाचारस्तावत् समस्तोऽपि त्वयाऽवगतोऽतस्तदनुसारेण यथा वर्तसे तथा विधेयम् । ' श्री**जिन**-

---

१ 'काले आगते विद्वान् अपात्रं च न वाचयेत् पात्रं च न विमानयेत् ।'

वल्लभगणिना पादयोर्निपत्य भणितम्–' यथा श्रीपूज्यपादा आज्ञापयन्ति, तथैव निश्चितं प्रवर्तिष्ये '।

प्रधानादिने चलितो यथाऽऽगतमार्गेण पुनर्**मरुकोट्टे** प्राप्तः। आगच्छता सिद्धान्तानुसारेण देवगृहे विधिर्लिलिखे। येन विधिनाऽविधिचैत्यमपि मुक्तिसाधनं **विधिचैत्यं** स्यात्। स चायम्—

दीक्षागुरुमीलनम्, मार्गे विधि-प्रकाशः

"अत्रोत्सूत्रजनक्रमो न च न च स्नात्रं रजन्यां सदा
साधूनां ममताऽऽश्रयो न च न च स्त्रीणां प्रवेशो निशि।
जाति–ज्ञातिकदाग्रहो न च न च श्राद्धेषु ताम्बूलमि–
त्याज्ञाऽत्रेयमनिश्रिते **विधि**कृते श्रीजैनचैत्यालये ॥ १ ॥"

इत्यादिविधिर्विधेयो येन सर्वं चैत्यवन्दनाद्यनुष्ठानं मुक्तये सम्पद्यत इति। ततोऽसौ स्वगुरुसमीपे गन्तुं प्रवृत्तः प्राप्तो **माइयड**ग्रामे **आसिका**दुर्गादर्वाक् क्रोशत्रये स्थितः। तत्रैव गुरुमीलनाय पुरुषः प्रेषितस्तस्य हस्ते लेखो दत्तो यथा–'युष्मत्प्रसादेन सुगुरुसमीपे वाचनां गृहीत्वा **माइयड**ग्रामेऽहं समागतोऽस्मि। पूज्यैः प्रसादं कृत्वाऽत्रैवागत्य मम मीलनीयम्।' ततो गुरुभिरज्ञायि–'किमिति **जिनवल्लभे**नेत्थं निर्दिष्टम्?, नात्रागतोऽभवत्'। ततो द्वितीयदिने सकललोकेन सार्धं समायात आचार्यः, अभिमुखं गतो **जिनवल्लभः**, प्रणतो गुरुः, पृष्टा क्षेमवार्ता गुरुणा, कथिता यथोक्ता सर्वाऽपि वार्ता। तेन ब्राह्मणसमाधाननिमित्तं मेघादिस्वरूपाणि तथा ज्योतिषबलेन भणितानि कानिचिद् यथा गुरोरप्याश्चर्यकारीणि जातानि। 'भूतपूर्वकस्तद्वदुपचारः' इति न्यायाद् गुरोरित्युक्तम्।

[ततः] पृष्टो गुरुणा–'किमिति मध्ये त्वं नागतः?'। **जिनवल्लभगणिना** ऽभिहितम्–' भगवन्! सुगुरुमुखाज्जिनवचनामृतं पीत्वा कथमधुना दुर्गतिगुप्तावात्मनः समुपचितपाशं चैत्यवासं विषवृक्षसदृशं सेवितुमिच्छामि?।' ततो गुरुणा भणितम्–'भो **जिनवल्लभ**! मयेदं चिन्तितमासीद् यत् तुभ्यं स्वपदं दत्त्वा त्वयि स्वगच्छ–देवगृह–श्रावकादिचिन्तां निवेश्य पश्चात् स्वयं सद्गुरुपार्श्वे वसतिमार्गमङ्गीकरिष्ये'। ततो **जिनवल्लभगणिना** विकस्वरवदनारविन्देन भणितम्–'भगवन्! अतीव शोभनमेतद्, विवेकस्य हीदमेव फलम्, यद् हेयपरित्यागेनोपादेयमुपादीयते। तर्हि समकमेव सुगुरुसमीपे गम्यते। गुरुणेषन्निःश्वस्य प्रत्यपादि यदुत–'वत्स! ईदृशी निःस्पृहता नास्त्यस्माकम्, यया चिन्ताकरणसमर्थं पुरुषं विना

चैत्यवासत्यागः

स्वगच्छ–देवगृह–वाटिकाऽऽदिचिन्तां मुक्त्वा सुगुरुपार्श्वे [व]सतिवासमङ्गीकुर्महेऽवश्य भवता विधा[तव्यं] वसतिवसनम्' । श्री**जिनवल्लभगणिः**–'भगवन्! एवम्' । ततो गुरुव्यांघुष्यासिकायां सम्प्राप्तः ।

अभयदेवसूरेः सन्तोषः, 'गुरुपदम्

श्री**जिनवल्लभगणि**रपि तत्सम्मतेन श्री**पत्तने** विजहार, श्रीमद**भयदेवसूरि**-पादान् बह्वादरेण वन्दितवान् । सद्गुरूणामतिशयेन समाधानं समजनि, चिन्तितं च यथा परीक्षितस्तथैवैष जज्ञे । ततो मनसि विदन्तोऽपि न कस्यापि प्रतिपादयन्ति यदुतैष एवास्मत्पदयोग्यः । यतो देवगृहनिवासिशिष्य इति हेतोर्गच्छस्य सम्मतं न भविष्यतीति । ततो गच्छाधारको **वर्धमानाचार्यः** स्वपदे निवेशितो **जिनवल्लभगणे**श्च स्वकीयोपसम्पदं दत्तवन्त इत्यद्यप्रभृत्यस्मदाज्ञया सर्वत्र प्रवर्तितव्यमिति । एकान्ते पुनः **प्रसन्नचन्द्राचार्यो** भणितो मदीयपदे भव्यलग्ने **जिनवल्लभगणिः** स्थापनीय इति । एवं **नवाङ्गीवृत्ति**वर्तनीमिव मुक्तिनगरस्य भव्यजनेभ्यः प्रतिपाद्य सिद्धान्तोक्तविधिना समाधानेन देवलोकं गताः श्री**अभयदेवसूरयः** । **प्रसन्नचन्द्राचार्य**स्यापि सुगुरुपदनिवेशनप्रस्तावो न जातस्ततस्तेनापि स्वायुःपरिसमाप्तिसमये श्री**देवभद्राचार्या**णां विज्ञप्तम् 'यत् सुगुरूपदेशो युष्माभिरेष सफलीकार्योऽवश्यमेव, मया कर्तुं न शक्यते' । ततः [तैरपि] प्रतिपन्नम्–' वर्तमानयोगेनैवं करिष्यामः, समाधानं भवद्भिर्विधेयमिति' ।

गूर्जरत्रा–मेदपाटादिषु विचरणम्

श्री**जिनवल्लभगणि**वाचनाचार्योऽपि कतिचिद् दिनानि **पत्तन**भूमौ विहृत्य न तादृशो विशेषेण बोधः कस्याप्यत्र **गूर्जरत्रा**मण्डले विधातुं शक्यते, येन समाधानमुत्पद्यते मनसीति मनसिकृत्यात्मतृ(द्वि)तीय आगमविधिना सुशकुनेन भव्यजनमनःसुक्षेत्रभूमिकासु भगवद्भणित**विधिधर्म**बीजनिक्षेपणार्थं श्री**मेदपाट**देशादिषु विहारं चकार । ते च देशाः सर्वेऽपि प्रायेण चैत्यनिवास्याचार्यैर्व्याप्ताः, सर्वोऽपि लोकस्तद्वासितो वर्तते ।

चित्रकूटे चण्डिकारक्षा

किं बहुना ? तादृशदेशान्तरस्थनानाग्राम–नगरादिषु विहारं विदधान**श्चित्रकूटा**चलदुर्गे प्राप्तः । यद्यपि तत्रत्यक्षुद्रैर्भाविते लोकस्तथाप्ययुक्तं किमपि कर्तुं न शक्नोति श्री**पत्तने** श्रीगुरूणां महत्याः प्रसिद्धेः श्रवणात् । ततो **जिनवल्लभगणि**ना स्थानं याचितास्तत्रत्यश्राद्धाः । तैश्चोक्तम्–'**चण्डिका**मठोऽस्ति, यदि तत्र तिष्ठथ(त)' । ततो **जिनवल्लभगणि**ना ज्ञातम्–'दुष्टाभिप्रायेणैते भणन्ति, तथापि तत्रापि स्थितस्य देवगुरुप्रसादाद् भद्रं भविष्यति' इति चिन्तयित्वा भणितास्ते 'तत्रैव बहु मन्यध्वं यूयं येन तिष्ठामः' तैरुक्तमतीव सम्मतमस्माकं तिष्ठत यूयम् ।

ततो देव–गुरून् संस्मृत्य देवतां चानुज्ञाप्य स्थिताः । तत्र देवता च तेषां ज्ञानेन [ध्यानेन] सद[नुष्ठानेन] तुष्टा सती दुष्टप्रयुक्तं तान् प्रत्ययुक्तं दत्तावधाना रक्षति ।

विद्यावैशारद्यम् गुरुत्वम्

ते च श्री**जिनवल्लभगणि**वाचनाचार्याः समस्तविद्यानिधानभूताः । कथम् ? तथाहि–सर्वसिद्धान्तवेदिनः सूत्रतोऽर्थतश्च कण्ठस्थ**पाणिन्या**द्यष्टव्याकरणा **मेघदूता**दिमहाकाव्यादिसर्वकाव्या **रुद्रटोद्भट–दण्डि–वामन–भामहा**द्यलङ्कार–चतुरशीतिनाटक–समग्रज्योतिषशास्त्र-**जयदेवा**दिनिःशेषच्छन्दोग्रन्थ–**जिनेन्द्र**मतव्यवस्थापका**भयदेवानेकान्तजयपताका**दि-**तर्ककन्दली–किरणावली–न्याय–शङ्करनन्दन–कमलशीला**दिपरसमयतर्कनिष्णाता अतस्तत्सौरभेण श्री**चित्रकूटे** प्रकर्षेण विख्याताः सञ्जाताः । सर्वे परदर्शनिकविप्रादिलोका आगन्तुं प्रवृत्ताः । यस्य यस्य यद्यच्छास्त्रविषयः संशयः समुत्पद्यते स सर्वोऽपि जनस्तं तं पृच्छति । श्री**जिनवल्लभगण**योऽपि भास्करकरा इव विसृत्वराः समस्तमपि संशयान्धकारमुच्छेदयन्ति । श्रावका अपि स्तोकस्तोकेन च समागच्छन्ति । ततः सिद्धान्तवचनानि श्रुत्वा तदनुसारेण क्रियामपि दृष्ट्वा **साधारण–सदक–सुमति–पल्हक–वीरक–मानदेव–धन्धक–सोमिलक–वीरदेवा**दिभिः श्रावकैः समाधिना श्री**जिनवल्लभगणि**वाचनाचार्या गुरुत्वेन प्रतिपेदिरे ।

अनागतज्ञानम्

श्री**जिनवल्लभगणी**शानां गुरूपदेशेनातीतानागतादिज्ञानं ज्योतिषपरिज्ञानं चातिशयितमासीत् । भगवदन्तिके **साधारण**श्राद्धः परिग्रहप्रमाणं ग्रहीतुं प्रवृत्तः, गणिमिश्रैरुक्तः–' कियन्मात्रं सर्वसंग्रहे कारिष्यसि ?' **साधारणः**–'भगवन् ! सृतं विंशत्या सहस्रैर्मे' । विमलज्ञानदृष्टयः श्री**जिनवल्लभ**गुरवः–'श्रावक ! बहुतरं कुरु' । ततः कृतानि त्रिंशत् सहस्राणि । पुनः [पूज्याः] ज्ञानेन 'महानुभाव ! इतोऽपि प्रभूततरं परिभावय' । **साधारणः**–प्रभो ! मदीयसमस्तगृहसारमूल्यगणनेऽपि पञ्च शतानि न पूर्यन्ते, कौतस्कुती ममाभ्यधिकतरद्रव्यसम्प्राप्तिः? । पुनर्हुंकृत्य प्रभवः—सर्वसाधारण **साधारण** ! धार्मिकश्रावक ! किमसाध्यं पुण्यसम्भारस्य ? मा कुरु गणनातुलाम्, चणकमात्रविक्रायिणोऽपि पुरुषाः सङ्ख्याविपक्षलक्षपतयो भवन्ति' इति साभिप्रायं गुरुवचनमाकर्ण्य ' निश्चितं किञ्चित् काञ्चनसम्प्राप्त्यादिकं भद्रं मम भविष्यतीति विचिन्त्येषद् विहस्य च **साधारणे**नोक्तम्–' यद्येवं तर्हि भगवन् ! भवतु सर्वपरिग्रहे ममैकं लक्षमिति' । तथावितीर्णगृहीतपरिग्रहप्रमाणः सन् सद्गुरुपदोपास्त्यपहस्तिताप्रशस्तान्तरायकर्मा दिने दिने प्रवर्धमानः सम्पदा

गुर्वाज्ञायां विशेषतः प्रवर्तमानः **साधारणः** सकलसङ्घस्य साधारणः समभवत्। सदृक्कादयोऽन्येऽपि श्राद्धाः **साधारण**वत् सर्वत्र **जिनवल्लभगणे**राज्ञया प्रवर्तितुमारब्धाः।

तत्र कृतचातुर्मासिककल्पानां श्री**जिनवल्लभ**वाचनाचार्याणामाश्विनमासस्य कृष्णपक्षत्रयोदश्यां श्री**महावीर**देवगर्भापहारकल्याणकं समागतम्। ततः श्राद्धानां पुरो भणितं **जिनवल्लभगणि**ना—भोः श्रावकाः! अद्य श्री**महावीर**स्य षष्ठं गर्भापहारकल्याणकं "पंच हत्थुत्तरे हुत्था साइणा परिनिव्वुडे" इति प्रकटाक्षरैरेव सिद्धान्ते प्रतिपादनात्। अन्यच्च तथाविधं किमपि **विधिचैत्यं** नास्ति, ततोऽत्रैव चैत्यवासिचैत्ये गत्वा यदि देवा वन्द्यन्ते तदा शोभनं भवति। गुरुमुखकमलविनिर्गतवचनाराधकैः [श्रावकै]रुक्तम्—'भगवन्! यद् युष्माकं सम्मतं तत् क्रियते। ततः सर्वे श्रावका निर्मलशरीरा निर्मलवस्त्रा गृहीतनिर्मलपूजोपकरणा गुरुणा सह देवगृहे गन्तुं प्रवृत्ताः। ततो देवगृहस्थितयाऽऽर्यिकया गुरुश्राद्धसमुदायेनागच्छतो गुरून् दृष्ट्वा पृष्टम्—'को विशेषोऽद्य?'। केनापि कथितम्—'**वीर**गर्भापहारषष्ठकल्याणककरणार्थमेते समागच्छन्ति'। तया चिन्तितम्—'पूर्वं केनापि न कृतमेतदेतेऽधुना करिष्यन्तीति न युक्तम्'। पश्चात् संयती देवगृहद्वारे पतित्वा स्थिता। द्वारप्राप्तान् प्रभूनवलोक्योक्तमेतया दुष्टचित्तया—'मया मृतया यदि प्रविशत'। तादृगप्रीतिकं ज्ञात्वा निवर्त्य स्वस्थानं गताः पूज्याः। श्राद्धैरुक्तम्—भगवन्! अस्माकं बृहत्तराणि सदनानि सन्ति, तत एकस्य गृहोपरि चतुर्विंशतिपट्टकं धृत्वा देववन्दनादि सर्वं धर्मप्रयोजनं क्रियते। षष्ठकल्याणकमाराध्यते। गुरुणा भणितम्—'तत् किमत्रायुक्तम्?' तत आराधितं विस्तरेण कल्याणकम्। जातं समाधानम्।

चित्रकूटे महावीर-षष्ठकल्याणकाराधनम्

अन्येद्युर्गीतार्थैः श्रावकैर्मन्त्रितं यथा—'विपक्षेभ्योऽविधिप्रवृत्तेभ्यः पार्श्वाज्जिनोक्तो विधिर्विधातुं न लप्स्यते; ततो यदि गुरोः सम्मतं भवति, तदा तले उपरि च देवगृहद्वयं कार्यते। स्वसमाधानं गुरूणां निवेदितम्। गुरुभिरप्युक्तं यथा—

चित्रकूटे विधिचैत्यद्वयप्रतिष्ठा

"जिनभवनं जिनबिम्बं जिनपूजां जिनमतं च यः कुर्यात्।
तस्य नरामर—शिवसुखफलानि करपल्लवस्थानि॥ १॥"

इति देशनया ज्ञातं श्राद्धैः श्रद्धाप्रधानैर्यद् गुरूणामभिप्रेतमेवैतल्लोकमध्ये च वार्ता जाता यथैते देवगृहद्वितयं कारयिष्यन्तीति वार्तामाकर्ण्य **पद्मादन**बृहत्तरेण **बहुदेव**श्रेष्ठिना कथितमेतेऽष्ट कापालिका देवगृहद्वयं कारयिष्यन्ति राजमान्या भविष्यन्तीति एतच्च श्रुतं श्री**जिनवल्लभगणि**भिः। अपरस्मिन् वासरे बहिर्गच्छतां प्रभूणां

---

१ पञ्च हस्तोत्तरेऽभवन्, स्वातिना परिनिर्वृतः।

सोऽपि मिलितः । साक्षेपं भणितं ज्ञानदिवाकरैः श्री**जिनवल्लभगणि**मिश्रैः—'भद्र ! **बहुदेव** ! गर्वो न विधेयः । कश्चिदेतन्मध्यात् सोऽपि भविष्यति, यस्त्वां बद्धमुच्छोटयिष्यति' । तच्च तथैव सञ्जातम् । प्रभुप्रसादात् **साधारण**साधुर[प्य]धिकं राजमान्यो बभूव । **नरवर्म**नृपः काप्यपराधे तस्मै दुष्टमुखाय रुष्टस्तमुष्ट्रेण सह बद्ध्वोष्ट्रमिवारटन्तं **धारा**यामानाययति । तत्र च केनापि प्रयोजनेन **साधारण**साधुर्गतोऽभूत् ततस्तेन **सकलज**गत्साधारणेन साधु**साधारणेन** विहितं सेधनादिनिवारणेन निष्कारणेन राजानं विज्ञप्याङ्गीकृतसाधुचेष्टितेन बन्धनान्मोचितोऽसौ वराकः । देवगृहयुग्ममपि सोत्साहैः श्रावकैः कारयितुमारब्धम्, देव—गुरुप्रसादात् परिपूर्णं निष्पन्नम् । तत्र चोपरिष्टात् श्री**पार्श्व**जिनभवनमधस्ताच्च श्रीभव्यानां लोचनमनोहारि समुत्तुङ्गशिखरतोरणं स्वर्णमयदण्डकलशपरम्पराप्रभामण्डलखण्डितचण्डान्धकारं श्री**महावीर**जिनभवनं निर्मापितम् । श्री**जिनवल्लभगणि**वाचनाचार्यैर्विस्तरेण समस्तविधिपूर्वकं चक्रे गरिष्ठा प्रतिष्ठा । सर्वत्र प्रसिद्धिर्जाता अहो ! एत एव [गुरवो] गुरव इति ।

अन्यदा लोकमध्य एवंविधाः सर्वशास्त्रविदः श्वेतपटाः समाजग्मुरिति श्लाघां महतीं श्रुत्वा विप्र एको ज्योतिषिकः पण्डितमानी श्री**जिनवल्लभगणि**समीपे समागतः । श्रावकैः पट्टासनं दत्तम् । पृष्टोऽसौ गुरुभिर्भद्र ! भवतां कुत्र स्थाने वासः ?, कस्मिंश्च शास्त्रेऽभ्यासः ? । विप्रः— निवासस्तावदत्रैवाभ्यासस्तु सर्वेष्वपि व्याकरण—काव्य—नाटकालङ्कारादिषु । वाचनाचार्याः— भवतु, विशेषेण कुत्र ? । विप्रः— ज्योतिषे । वाचनाचार्याः—चन्द्रादित्यलग्ने सम्यग् वेत्सि ? । विप्रः सगर्वम्—किमत्रैवागणिते एकं द्वौ त्रीन् वा लग्नान् प्रतिपादयामि ? । ततः सगर्वं तद्वचनमुपश्रुत्य वाचनाचार्याः—शोभनं परिज्ञानम् ? । पुनर्विप्रः— युष्माकमपि किमप्यस्ति लग्नविषये परिज्ञानम् ? । वाचनाचार्याः— भविष्यति किञ्चित् । विप्रः साक्षेपम्—तर्हि कथयन्तु भवन्तः । वाचनाचार्या अनुत्सिक्ता अपि सोत्सेकमिव भो भो विप्र ! कथय कति कथयामि दश विंशतिं वा लग्नान् ? । तच्छ्रुत्वा तस्याश्चर्यमभूत् तावत्सङ्ख्याँल्लग्नान् झटिति प्रतिपाद्य पुनर्भणितं भगवद्भिः—भो विप्र ! गगनमण्डले हस्तद्वयद्वयसं मेघखण्डं पश्यसि ? । बभाण ब्राह्मणः—पश्यामि । वाचनाचार्यैरुक्तम्—कथय [किय]न्मात्रं जलं मोक्ष्यति ? । विप्रोऽजानानः शून्यदृष्टिर्दिशोऽवलोकयति । ततो भणितमाराध्यैः—शृणु भो विप्र ! घटिकाद्वयान्तरे तन्मेघखण्डं हस्तद्वयमात्रमप्यधुना सकलं गगनमण्डलं व्याप्य तावद् वृष्टिं करिष्यति [यावता ततो वयर(?) मेत्र भाजनद्वयं परिपूर्णं भविष्यति । ततश्च] तत्रैवोपविष्टस्य विप्रस्योर्द्धमुखस्य सर्वं तथैव तज्जातम् । विप्रो मस्तके हस्तौ योजयित्वाऽहो ! ज्ञानमहो ! ज्ञानमिति शिरो धुन्वन् प्रभूणां पादयोर्नि-

ज्योतिःपरिज्ञानम्

पपात, भणितुं च लग्नो यावदत्र तिष्ठामि, निश्चितं तावद् भगवतां पादान् वन्दित्वा भोजनं विधास्यामि । न मानविडम्बितेन मया ज्ञाता एवंविधा भवन्तः । जाता सार्वत्रिकी प्रसिद्धिर्यदहो ! ज्ञानिनः श्वेतपटा एव भवन्ति ।

क्रियमाणघ्नकुशिष्य-त्यागः

अन्यदा कदाचिन्**मुनिचन्द्राचार्येण** शिष्यद्वयं सिद्धान्तवाचनानिमित्तं श्री**जिनवल्लभगणि**पार्श्वे प्रेषितम् । **जिनवल्लभगणि**रपि तयोर्वाचनां दातुं प्रवृत्तस्तावप्यशुभौ(भं) चिन्तयतः—'यदि **जिनवल्लभगणेः** श्राद्धान् कथञ्चिद् विप्रतारयाव' इति बुद्ध्या रञ्जयतः श्रावकान् । कदाचित् स्वगुरुपार्श्वे प्रेषितुं प्रच्छन्नवृत्त्या लेखोऽलेखि । तं च वाचनाकपलिकायां प्रक्षिप्य वाचनां ग्रहीतुं गतौ तौ वसतौ गणिसमीपे वन्दनं दत्त्वोपाविष्टौ । यावदुच्छोटिता कपलिका ततो नूतनो लेखो दृष्ट्वा गृहीतो **जिनवल्लभगणि**भिश्चैरुच्छोटितश्च । तावपि हस्ताद् ग्रहीतुं न शक्नुतः । ततोऽवधारितो लेखः । लिखितं च तत्र—"**जिनवल्लभगणेः** केचित् श्राद्धाः स्ववशं नीताः सन्ति, क्रमेण सर्वानपि वशीकरिष्याव इति मनोवृत्तिरस्ति ।" 'अयं चार्थो विरुद्धत्वा[द् य]द्यपि शास्त्रोपनिबन्धयोग्यो न भवति; तथापि चरितोपरोधादुक्त इति' । ततः श्री**जिनवल्लभगणि**ना द्विधा विधायाभाणि यथा—

"आसीज्जनः कृतघ्नः क्रियमाणघ्नस्तु साम्प्रतं जातः ।
इति मे मनसि वितर्को भविताऽलोकः कथं भविता ? ॥ १ ॥"

इति पठित्वोक्तम्—अहो ! एवंविधाशुभभावयोः सूतं भवतोर्वाचनया । पश्चाद् विमुखौ गतौ स्वस्थानम्, पुनर्न दृष्टाविति ।

समस्यापूर्तिः

कदाचि**ज्जिनवल्लभगणे**र्बहिर्भूमौ गच्छतः कश्चिद् विचक्षणः प्रसिद्धिं पाण्डित्यस्य श्रुत्वा मिलितः, समस्यापदं च प्रक्षिप्तं कस्यापि राज्ञो वर्णनमाश्रित्य यथा—

' कुरङ्गः किं भृङ्गो मरकतमणिः किं किमशनिः ? । '

---

१ वि. सं. १३३४ वर्षे प्रभाचन्द्रसूरिणा विरचिते प्रभावकचरिते कविराजश्रीपाल–देवबोधयोः संवादेऽपीयं समस्यापूर्तिः प्रादर्शि—

समस्यां दुर्गमां काञ्चित् पृच्छतेति नृपोदिते ।
श्रीपाल ऊचिवानेकं स्फुटं शिखरिणीपदम् ॥
तच्च—'कुरङ्गः किं भृंगो मरकतमणिः किं किमशनिः ? '
तत्पाठपृष्ठ एवासाववदत् कविनायकः ।
चरणत्रितयवृत्ते को विलम्बोऽत्रामूदृशि ? ॥

तद् यथा—चिरं चित्तोद्याने चरसि च मुखाब्जं पिबसि च
क्षणादेणाक्षीणां विषयविषमुद्रां हरसि च ।
नृप ! त्वं मानाद्रिं दलयसि च किं कौतुककरः
कुरङ्गः किं भृङ्गो मरकतमणिः किं किमशनिः ? ॥

—प्रभावकचरिते (नि. सा. प्रकाशिते पृ. ३०९)

ततः श्री**जिनवल्लभगणि**ना मनाक् परिभाव्य तदैव पूरिता समस्या, **कथिता** च तदग्रतः । यथा—

" चिरं चित्तो(त्रो)द्याने चरसि च मुखाब्जं पिबसि च
क्षणादेणाक्षीणां विरहविषमोहं हरसि च ।
नृप ! त्वं मानाद्रिं दलयसि च किं कौतुककरः
कुरङ्गः किं भृङ्गो मरकतमणिः किं किमशनिः ? ॥ १ ॥"

इति श्रुत्वाऽत्यन्तं प्रमुदितो गदितुं प्रवृत्तोऽहो ! निश्चितं न निर्मूला जनप्रसिद्धिः 'यादृशाः श्रुता[स्ता]दृशा एव यूयम्' इति गुणस्तुतिं कृत्वा पादयोः पतित्वा गतः । ततः सुगुरुर्वसतौ समागतः श्रावकैः पृष्टो यत् सुगुरो ! किमि[ति] बह्वी वेला लग्ना ? । सहगतेन शिष्येण सर्वोऽपि कथिता वार्ता । जातः प्रमोदोत्फुल्ललोचनः समस्तोऽपि श्रावकलोकः ।

वाग्जडीयलोक-प्रतिबोधः

गणदेवनामा श्रावकः स्वर्णार्थी **जिनवल्लभगणि**पार्श्वे **सुवर्णसिद्धि**रस्तीति केनाप्युक्ते **चित्रकूट**स्थस्य भगवतः [समीपे] समागत्य पर्युपासनां कर्तुमारब्धः । लक्षितस्तद्भावो गणिना । तथापि योग्यं तं ज्ञात्वा तथा कृता संसारवैराग्यजननी देशना यथाऽसावत्यन्तं संविग्नो निःस्पृहो जातः । ततो भणितं गणिना—भद्र ! किं सुवर्णसिद्धिं कथयामि ? । तेनोक्तम्—भगवन् ! युष्मत्पादशुश्रूषां कुर्वाणो विंशतिद्रम्मनीव्या व्यवहारं कुर्वन् श्राद्धधर्मं करिष्यामि । तस्य च धर्मकथने लब्धिरस्ति । ततो लिखितकुलकान् लेखान् दत्त्वा शिक्षयित्वा प्रेषितो **वाग्ज(ग्ग)ड**देशे । कृतः सर्वोऽपि **वाग्ज(ग्ग)डी**यलोकः श्री**जिनवल्लभगणिं** प्रति जातप्रतिबन्धस्तेन[1] ।

रुष्टब्राह्मणवृन्दोपशमनम्

श्रीजिनवल्लभगणिव्याख्याने सर्वे विचक्षणा जना उपविशन्ति, विशेषतो ब्राह्मणाः स्वस्वविद्यासन्देहापोहार्थम् । अथ कदाचिदियं गाथा व्याख्याने समागता य[था]—

" धिज्जाईण[2] गिहीणं पासत्थाईण वा वि दट्ठूणं ।
जस्स न मुज्झइ दिट्ठी अमूढदिट्ठिं तयं बिंति ॥ १ ॥ "

---

१ वि. सं. १२९३ वर्षे जिनपालगणिनैषां कुलकानां विवरणमकारि, तत्प्रशस्तिपाठ उपरि प्रादर्शि ।

२ धिग्(द्वि)जातीन् गृहिणश्च पार्श्वस्थादीन वाऽपि दृष्ट्वा । यस्य न मुह्यति दृष्टिरमूढदृष्टिं तं ब्रुवन्ति ॥

ततो निःशङ्केन व्याख्या[ता] यथावस्थितं श्री**जिनवल्लभगणि**ना धिग्जातीया ब्राह्मणा इति व्याख्यानं श्रुत्वा कुपिता विप्रा बहिर्निर्गता एकत्र मिलिता विपक्षाश्च निकटीभूताः। आलोचितं विप्रैरेतैः सह विवादं विधायैतान् निष्प्रभान् करिष्यामः। अथ तेषां स्वरूपं तादृशं विज्ञाय श्री**जिनवल्लभगणे**र्मनसि तेभ्यो भयं समजनि ? उच्यते, न मनागपि। किमुत्कटकरटिकरटतटपाटनपटिष्ठनिष्ठुरप्रकोष्ठपञ्चाननस्य निजसिंहनादप्रतिशब्दबधिरीकृतकाननस्य कदाचित् पवनप्रेङ्खोलिततरुवरशिखरनिपतितपर्णमात्रोत्त्रसपलायनसञ्जाताङ्गभङ्गेभ्यः कुरङ्गेभ्यः स्याद् रोमोद्धर्षमात्रमपि ? । तथा चास्मद्गुरूणां श्री**जिनपतिसूरी**णामत्रैवार्थेऽन्योक्तिर्यथा—

" खरनखरशरकोटिस्फोटिताग्रेभकुम्भ—
स्थलविगलितमुक्ताराजिविभ्राजिताजिः।
हरिरधिगरि[मा] किं तर्जितो निर्जितो वा—
ऽनिलचलदलपातत्वङ्गदङ्गैः कुरङ्गैः ? ॥ १ ॥ "

ततो भगवता श्री**जिनवल्लभगणि**ना—

"मर्यादाभङ्गभीतेरमृतमयतया धैर्य—गाम्भीर्ययोगाद्
न क्षुभ्यन्ते च तावन्नियमितसलिलाः सर्वदैते समुद्राः।
आहो ! क्षोभं व्रजेयुः क्वचिदपि समये दैवयोगात् तदानीं
न क्षोणी नाद्रिचक्रं न च रवि-शशिनौ सर्वमेकार्णवं स्यात् ॥ १ ॥"

इति वृत्तं भूर्जखण्डे लिखित्वा विवेकिजनहस्ते दत्त्वा प्रेषितं भणितश्चासौ मिलितानां मध्ये बृहद्ब्राह्मणस्य हस्ते दातव्यम्, तथैव च कृतं तेन। ततो विविक्तबुद्धिना वृत्तार्थं परिभाव्य चिन्तितं तेनाहो ! वयमेकैकविद्याधारिण एते च सर्वविद्यानिधानं कथं तैः सह विवादः कर्तुं शक्यते ? इति विचिन्त्य तेन सर्वेऽपि विप्रा 'अहो ! हृदयचक्षुषा न प्रेक्षध्वे यूयम्, एकैकमलिनविद्याधारिणो यूयं सर्वेऽपि। स च निखिलनिस्तुषविद्यानिधानमतस्तेन सह कीदृशो युष्माकं विवादः ?' इत्यादिवचनसन्दर्भेण प्रतिबोध्योपशमं नीताः, श्री**जिनवल्लभगणेः** पादयोश्च पातिता इति।

समस्यापूर्तिशक्तिः

अ[न्य]दा **धारा**नगर्यां श्री**नरवर्म**राजसभायां देशान्तरात् पण्डितद्वयं समागतम्। तेन च राज्ञः पण्डितानां पुरतः पूरणार्थं प्रक्षिप्तमिदं समस्यापदं यथा—'कण्ठे कुठारः कमठे ठकारः' इति। ततः पण्डितैः प्रत्येकं स्वकीयस्वकीयप्रज्ञानुसारेण पूरिता, परं न तयोर्मनो मुमुदे। केनापि राज्ञः पुरोऽभिहि-

तम्–' देव ! न पण्डितपूरिताः समस्याः प्रतिभान्त्यनयोः । राज्ञोक्तम्–अहो ! अस्ति कश्चिदुपायो येनानयोर्मनो रज्यते ? । केनापि विवेकिना पुरुषेणोक्तम्–देव ! **चित्रकूटे** श्वेतपटो **जिनवल्लभगणि**ः सर्वविद्यानिधानमाकर्ण्यते । राज्ञा तदैवोष्ट्रद्वयं शीघ्रगति [स]पुरुषं सलेखं प्रेषितम् । लेखश्च साधु**साधारण**निमित्तम् । लिखितं च [त]त्र–'भोः **साधारण**साधो ! यथा त्वदीयगुरुभिर्मनोहरा पूरितेयं समस्या शीघ्रं समागच्छति तथा कार्यम्, नान्यथेति । एवं स राजलेखस्तैरौष्ट्रिकैः सन्ध्यासमये साधु**साधारण**हस्ते प्रदत्तः प्रतिक्रमणवेलायाम् । साधु**साधारणे**न स नृपलेखो गुरोः पुरो वाचितः, अवगतस्तदर्थो गणिमिश्रैः । ततः प्रतिक्रमणानन्तरं झटिति पूरिता [सा] समस्या यथा—

" रे रे नृपाः ! श्री**नरवर्म**भूप—प्रसादनाय क्रियतां नताङ्गैः ।
कण्ठे कुठारः कमठे ठकारश्चक्रे यदश्वोग्रखुराग्रघातैः ॥ १ ॥ "

लेखयित्वा तदैव दत्ता साधु**साधारण**हस्ते । तेनाप्यौष्ट्रिकपुरुषाणां हस्ते स्वकीयविज्ञप्तिकालेखसहिता सा समस्या प्रहिता । तेऽपि लेखं गृहीत्वा रात्रावेव शीघ्रं **धारा**पुर्यां सम्प्राप्ताः । पठिता तयोर्विदुषोः पुरतः समस्या । रञ्जितमतीव [तया] तयोर्मनः, भणितं च ताभ्याम्—' अस्यां सभायां नास्तीदृशो विद्वान् येनेयं पूरिता, किं तर्ह्यन्यः कश्चित्' इत्येवं प्रशंसन्तौ वस्त्रादिप्रदानेन सत्कृत्य तौ प्रेषया[ञ्चक्राते नरेश्वरेण]

धारायां नरवर्मनृपात् सन्मानम्

[श्री**जिनवल्लभगणि**रपि भगवानुद्यतविहारकारी परमब्रह्मचारी कतिपयदिनै-**श्चित्रकूटा**चलदुर्गाद् विजहार **धारा**याम् ।] केनाप्युक्तं राज्ञोऽग्रे देव ! समस्यापूरकः श्वेतपटोऽत्रागतोऽस्ति । ततोऽतिशयितविद्वत्तागुणाकृष्टहृदयेनोक्तं नृपेण—' भोः शीघ्रमाकारयत तमत्र' । आकारितो विनयपूर्वकं राजपुरुषैः, समागतो भगवान् प्रणतः सादरं क्षितीश्वरेण । ततो लब्धाशीर्वादेन योजितहस्तमुकुलेनाभिदधे धराधवेन–' भो विद्वज्जनचूडामणे ! मन्मनस्तुष्टये पारुत्थलक्षत्रयं ग्रामत्रयं वा गृहाण । ' ततो भणितं श्री**जिनवल्लभगणि**वाचनाचार्यैः–महाराज ! व्रतिनां निष्पिद्धोऽर्थसङ्ग्रहोऽस्मदागमे विशेषतः । तथा चागमः-

" दोससयमूलजालं पुव्वरिसिविवज्जियं जई वंतं ।
अत्थं वहसि अणत्थं कीस निरत्थं तवं चरसि ? ॥१॥" [उपदेशमाला गा०] इत्यादि ।

अतो वयं नार्थं हस्तेनापि स्पृशामः । राजा पादयोर्निपत्य प्राह–भो महात्मन् ! निःस्पृहशिरोमणे ! तथापि लक्षत्रयस्य ग्रामत्रयस्य वा ग्रहणमन्तरेण मम मनःसमाधिर्नास्यतो यथा तथा मन्मनःसमाधिरुत्पादनीयः । वाचनाचार्यैरुक्तम्–" यद्यत्रार्थे महारा-

जस्य महानाग्रहस्तर्हि **चित्रकूटे** श्रावकैर्देवगृहद्वयं कारितमस्ति, तत्र पूजार्थं स्वमण्डपिकादानात् पारुत्थ[लक्ष]द्वयं दापयत । " ततो राजा तुष्टः शाश्वतं मा(मे) दानं भविष्यतीति तथैव चकार । तथा श्री**जिनवल्लभगणे**र्धार्मिकत्वेन सर्वत्र प्रसिद्धिर्जज्ञे ।

नागपुरे नेमिजिनालयप्रतिष्ठा

ततश्च श्री**नागपुरे** श्रावकैर्देवगृहं **नेमिनाथबिम्बं** च नूतनं कारितमस्ति । तेषामेष बभूवाभिप्रायो [य]दुत वयं महाचारित्रिणं श्री**जिनवल्लभगणिं** गुरुत्वेनाभ्युपेत्य तस्य हस्तेनोभयोः प्रतिष्ठां कारयिष्याम इति चिन्तयि[त्वा] सर्वसम्मतेन महताऽऽदरेण महता बहुमानेनाकारितो भगवान् श्री**जिनवल्लभगणिः** । ततः पूज्यैः शुभलग्ने देवगृहं **नेमिनाथबिम्बं** च प्रतिष्ठितम् । तत्पद्महस्तप्रभावाल्लक्षपतयस्ते श्रावका जज्ञिरे । **नेमिनाथ**बिम्बे रत्नमयानि मुकुट–तिलक–कुण्डलाङ्गद–श्रीवत्स–कण्ठमणिमालिकाद्याभरणानि कारयाञ्चक्रिरे ।

नरवरपुरे विधिचैत्यप्रतिष्ठा

तथा नरवरपुरीयश्रावकाणां तथाऽभिप्रायो [जा]तो वयमपि श्री**जिनवल्लभगणिं** गुरुत्वेनाङ्गीकृत्य देवगृह–बिम्बयोः प्रतिष्ठां विधापयाम इति पर्यालोच्य तथैव कारयामासुः । उभयोरपि जिनगृहयो रात्रिबलिधारण–-रात्रिस्त्रीप्रवेशन—रात्रिप्रतिष्ठाकारणवारणादिको मुक्तिसाधको विधिर्लिखितः ।

मरुकोट्टे विहारः, व्याख्यानशक्तिः

ततो **मरुकोट्टी**यश्रावकैः श्री**जिनवल्लभगणि**वाचनाचार्या विहारक्रमाय समाहूता **विक्रमपुर**मध्येन **मरुकोट्टे** विहृताः । तत्र श्राद्धैः श्रद्धावद्भिर्गुरुस्थानादियुक्ता दत्ता वसतिः, स्थितास्तस्याम् । श्रावकैरुक्तम्–भगवन् ! युष्मद्वदनारविन्दाज्जिनवचनरसमास्वादयितुमिच्छामः । प्रभुभिरभाणि–'युक्तमेतच्छ्रावकाणाम्, तर्ह्युपदेशमाला कथयितुमारभ्य[ते]' । तैरुक्तम्–पूर्वमेव श्रुता । पूज्यैर्भणितम्–भूयोऽपि श्रूयताम् । भव्यदिने व्याख्यातुमारब्धोपदेशमाला ।

" संवच्छर**मुसभ**जिणो छमासा **वद्धमाण**जिणचंदो ।
इय विहरिया निरसणा जएज्ज एउवमाणेणं ॥ १ ॥ "

इत्येकस्या अपि गाथाया व्याख्याने षण्मासावधि कालो लग्नस्तथापि श्रावकाणां नानासिद्धान्तोदाहरणामृतेन तृप्तिर्न जाता । भणितुमारब्धाः—श्रीभगवन्तस्तीर्थङ्करा एवैवं वचनामृतेन श्रोत्रसुखमुत्पादयितुं समर्थाः । सत्यं तीर्थकरप्रतिरूपा यूयं कथमन्यथेदृशी अमृतस्रावणी वाणी ईदृशी च व्याख्यानलब्धिरिति भृशं सन्तुष्टा देशनया श्रावकाः ।

अन्यदा कदाचिच्चैत्यगृहे व्याख्यानं विधाय श्राद्धैः सह वसतौ समागच्छन्तः सन्ति । एतस्मिन् प्रस्तावे पुरुष एकोऽश्वारूढः स्त्रीभिर्गीयमानो बहुपरिवारः परिणयनाय गच्छन्नवलोकितः । ततः सविषादं श्री-**जिनवल्लभगणिना** संविग्नशिरोमणिना ज्ञानदिवाकरेणोक्तम्—अहो ! पश्यत कीदृशी क्षणदृष्टनष्टता संसारस्य येनैता याः स्त्रियो विकसितवदनकमला गायन्त्यो गच्छन्ति, ता एव वक्षःस्थलं ताडयन्त्यो महाऽऽक्रन्दं कुर्वन्त्योऽनेनैव पथा व्याघुटिष्यन्ते । गता वसतौ प्रभवः, स च परिणेता तत्र प्राप्तः सन् निःश्रेण्या चटितुमारब्धः, आरोहतश्च स्खलितः पादः पतितश्चासौ घरट्टोपरि । घरट्टकीलकेन च तस्योदरं द्विधा जातम्, मृतश्च । ततस्ताः स्त्रियस्तथाभूता आगच्छन्त्यस्तेनैव मार्गेण दृष्टाः श्राद्धसमुदायेन समस्तेनाहो ! परिज्ञानं सुगुरूणामिति गदितुं प्रवृत्तश्च सर्वः श्रावकलोकः । एवं श्रावकाणां धर्मपरिणाममुत्पाद्य पुनर्**नागपुरे** विहारं चक्रुः श्री**जिनवल्लभगणयः** ।

भाविकालज्ञानम्

अत्रान्तरे **श्रीदेवभद्राचार्या** विहारक्रमं कुर्वाणाः श्री**अणहिलपत्तने** समायातास्तत्रागतैश्चिन्तितम्—'**प्रसन्नचन्द्राचार्येण** पर्यन्तसमये ममाग्रे भणितं भवता **जिनवल्लभगणिः** श्री**अभयदेवसूरि**पदे निवेशनीयः । स च प्रस्तावोऽधुना वर्तते ।' ततः श्री**नागपुरे** श्री**जिनवल्लभगणे**र्विस्तरेण लेखः स्वः प्रेषितः—'त्वया शीघ्रं समुदायेन सह **चित्रकूटे** विहर्तव्यम्, येन वयमागत्य चिन्तितप्रयोजनं कुर्मः' । ततः समागताश्चित्रकूटे श्री**जिनवल्लभगणयः**, तथा श्री-**देवभद्राचार्या** अपि सपरिवाराः । पण्डित**सोमचन्द्रो**ऽप्याकारितः, परं नागन्तुं शक्तोऽभूत् । ततो महता विस्तरेण श्री**देवभद्राचार्यैः** श्री**अभयदेवसूरिपदे** श्री**जिनवल्लभगणिः** संस्थापितः । अनेको भव्यलोकः श्री**जिनवल्लभसूरी**न् युगप्रधानश्री**मदभयदेवसूरि**पादभक्तान् समालोक्य मोक्षमार्गे प्रवृत्तः । **देवभद्राचार्या**दयस्तु पदस्थापनं कृत्वा कृतकृत्यमात्मानं मन्यमानाः श्री**अणहिल्लपाटका**दिस्थानेषु विहारं चक्रिरे ।

अभयदेवसूरिपदे सूरिपदम्

श्री**जिनवल्लभसूरि**भिस्तु स्वायुष्प्रमाणं गणितं यावत् षड्वर्षाण्यद्याप्यायुरस्तीत्यागतम् । ततश्चिन्तितमेता[वता] कालेन प्रभूतभव्यलोकप्रतिबोधं करिष्याम इत्येवं सुस्थितानां तेषां षण्मासातिक्रमेऽकस्माद् देहम-[स्व]स्थं जातं ज्ञातम् । 'किमेतद्' यावत् पुनर्निपुणं निरूपयन्ति, तावदङ्कोच्छिष्टं जा(ज्ञा)तम् षण्मासानां स्थाने षड् वर्षाण्यागतानि, तत एतावदेवायुरिति निश्चित्य ते महासत्त्वाः समस्तसङ्घेन सार्धं दत्तमिथ्यादुष्कृताः प्रतिपन्नचतुःशरणा विहितसर्वसत्त्वक्षामणा दिन-

स्वर्गवासः

---

१ अयं सूरिपदानन्तरं **जिनदत्तसूरि**नाम्ना प्रसिद्धः प्रस्तुतकाव्यत्रय्याः कर्ता,तच्चरितमग्रे ।

त्रितयमन[शनं] विधाय **सप्तषष्ट्युत्तरैकादशश**[त]संवत्सरे ११६७ कार्तिककृष्णद्वादश्यां रजनीचरमयामे पञ्चपरमेष्ठिपरावर्तनं कुर्वन्तः श्री**जिनवल्लभसूरयो** महात्मानश्चतुर्थदेवलोकं सम्प्राप्ताः ।

ग्रन्थरचनाऽऽदि

परमद्यापि येषां भगवतामवदातचरितनिधीनां श्री**मरुकोट्ट**सप्तवर्षप्रमितकृतनिवासपरिशीलितसमस्तागमानां समग्रगच्छाद्दत**सूक्ष्मार्थसिद्धान्तविचारसारषडशीति–साधशतंकार**व्यकमग्रन्थ– *पिण्डवि–शुद्धि– *पौषधविधि- *प्रतिक्रमणसामाचारी–सङ्घपट्टक– *धर्मशिक्षा– *द्वादश-

---

१ षडशीतेरपरनाम**ा**गमिकवस्तुविचारसार इति दृश्यते, तच्चात्र **सूक्ष्मार्थ**सिद्धान्तविचारसारविशेषणेन विशेषितं सम्भाव्यते । एतच्च **भा**वनगरस्थया ऽऽत्मानन्दसभया **बृहद्**गच्छीय**हरि**भद्रसूरि–**म**लयगिरिविरचितवृत्तिद्वयसमन्वितं प्राकाशि । एतदुपरि भाष्यद्वयं श्रूयते, मूलग्रन्थकार-**जिन**वल्लभसूरिशिष्य**रा**मदेवगणिविरचितं प्राकृतविवरणं (जे. भां. सूची पृ. ४६) **य**शोभद्रसूरिरचिता वृत्तिश्चोपलभ्यते । **मे**रुवाचककृतं विवरणं तथोद्धारावचूर्योदिकमप्यन्यत्र पठ्यते ।

२ **सा**र्धशतकस्यापरनाम **सू**क्ष्मार्थविचारसारेति पठ्यते । **ध**नेश्वरसूरिरचितवृत्त्या सहितमेतद् **भा**वनगरस्थया **जै**नधर्मप्रसारकसभया प्रसिद्धिमापितम् । एतदुपरि भाष्यं तथा वि. सं. ११७० वर्षे **मु**निचन्द्रसूरिविरचिता चूर्णिश्च ज्ञायते । **च**क्रेश्वरसूरि (?)–**रा**मदेवगणिविहितं प्राकृतविवरणं तथा च टिप्पनमपि श्रूयते ।

३ वि. सं. ११७६ वर्षे **य**शोदेवसूरिणैतस्य विवरणं व्यधायि, बृहट्टिपनिका-**जै**नग्रन्थावल्यादौ वि. सं. ११८० वर्षे श्रीचन्द्रसूरिकृता सूचितैतदीया वृत्तिर्यशोदेवसूरिविवरणात् पृथग् न प्रतीयते । तथा वि. सं. १२९५ वर्षे **उ**दयसिंहसूरिणा दीपिका तथा च **त**पागच्छीय**सं**वेगदेवगणिना विक्रमीयषोडशशताब्दीपूर्वार्धे बालावबोधो व्यरचि (पत्तनीयभां. सूची द्रष्टव्या) एतदतिरिक्तावचूरिपञ्जिकाऽऽद्यप्यन्यत्र श्रूयते ।

विक्रमीयसप्तदशशताब्युत्तरार्धे पं. शुभविजयगणिसंगृहीते श्रीविजयसेनसूरिप्रसादीकृते प्रश्नोत्तररत्नाकरे उपाध्यायसोमविजयगणिकृतप्रश्नोत्तरे निम्नोल्लिखितं पठ्यते––

"**पिण्डविशुद्धि**विधाता **जिनवल्लभगणिः खरतरो**ऽन्यो वा? इति प्रश्नः । अत्रोत्तरम्––**जिनवल्लभगणेः खरतरगच्छ**सम्बन्धित्वं न सम्भाव्यते, यतस्तत्कृते **पौषधविधि**प्रकरणे श्राद्धानां पौषधमध्ये जेमनाक्षरदर्शनात् **कल्याणकस्तोत्रे** च श्री**वीर**स्य पञ्चकल्याणकप्रतिपादनाच्च तस्य सामाचारी भिन्ना **खरतरा**णां च भिन्नेति ॥"

––प्रश्नोत्तररत्नाकरे सेनप्रश्ने (दे. ला. प्रकाशिते प. ४)

किन्त्वेतत् सुदीर्घदृष्ट्या चिन्तने न समीचीनं प्रतिभाति ।

४ एतदाधारेण निर्मितमेकं संक्षिप्तमपि पौषधविधानमुपलभ्यते––

"गुरु**जिण**व**ल्ल**ह**वि**रइय**पोसह**वि**हि**पयरणाउ संखेवा ।
दंसियमेय विहाणं विसेसं उ पुण तओ नेयं ॥"––पत्तनीयभां० सूची ।

तथा वि. सं. १६१७ वर्षे **जि**नचन्द्रसूरिणाऽस्य वृत्तिर्व्यरचीति **जै**नग्रन्थावल्यादौ सूचितम् ।

५ **जि**नपतिसूरिविरचितबृहद्वृत्तिसमन्वितोऽयं 'श्रावकजेठालाल दलसुख' इत्यनेन प्रकाशितः । वि. सं. ११३३ वर्षे **ल**क्ष्मीसेनेन विरचिताऽस्य लघुवृत्तिरसूचि **जै**नग्रन्थावल्याम् । हर्षराजोपाध्यायविहिताऽस्य लघुवृत्तिः, वि. सं. १६१९ वर्षे **सा**धुकीर्तिगणिरचिताऽवचूरिश्चोपलभ्यते ।

६ एतदुपरि **स**कलचन्द्रकृता वृत्ति**र्जै**नग्रन्थावल्यां समसूचि ।

* एतादृक्चिह्नाङ्किता ग्रन्था यावज्ज्ञातमद्यावधि मुद्रणाद्विद्वाराऽप्रसिद्धाः ।

कुलकरूपप्रकरण--प्रश्नोत्तरशतक[२]--*शृङ्गारशतक--*नानाप्रकारविचित्रचित्रकाव्यसार-शतसङ्ख्यस्तुतिस्तोत्रा[३]दिरूपकीर्तिपताका सकलं महीमण्डलं मण्डयन्ती विद्वज्जनमनांसि प्रमोदयति ॥"

चारित्रसिंहगणिना सुमतिगणिविनिर्मितगणधरसार्धशतकबृहद्वृत्तेरेव प्रोद्धृते गणधरसार्धशतकान्तर्गतप्रकरणे पूर्वोक्तमेव चरितं प्रतिपादितम् । श्रीजिनदत्तसूरीयगणधरसार्धशतकस्य सुमतिगणीयविवरणमुपजीव्य जिनेश्वरसूरिशिष्येण वाचकसर्वराजगणिना विरचितायां संक्षिप्तवृत्तावप्युपरि प्रदर्शितमेवेतिवृत्तमुपलभ्यते । वि. सं. १६२९ वर्षे धर्मसागरोपाध्यायेन विरचिते स्वोपज्ञवृत्तिसमन्विते प्रवचनपरीक्षापरनाम्नि कुपक्षकौशिकसहस्रकिरणे पूर्वप्रदर्शितमेव चरितमवतारितं विवादपूर्वमवमतं चावलोक्यते । संक्षिप्तरूपं प्रायोऽन्यत्र क्षमाकल्याणादिरचितखरतरगच्छपट्टावल्यादावपि दृश्यते ।

शिष्याः

जिनवल्लभसूरेः पट्टधरं प्रस्तुतकाव्यत्रयीकर्तारं जिनदत्तसूरिं विहायान्ये के के शिष्याः समासन्? तद्विषये विशेषतो न व्यज्ञायि, नवरं सत्तरि (सप्तति) टिप्पन--जिनवल्लभीयवस्तुविचारसारप्राकृतविवरणकर्तू रामदेवगणेस्तु परिचयो भवति जेसलमेरभां० सूची(पृ. ४०, ४६, अप्रसिद्ध० पृ. ३४) विलोकनेन । अपवर्गनाममालाकारो जिनभद्रसूरिरपि च तत्प्रान्ते निजं जिनवल्लभ-जिनदत्तसूरिसेवित्वं जिनप्रिय(वल्लभ)-विनेयत्वं चाभिज्ञापयति स्म ।

---

१ वि. सं. १२९३ वर्षे जिनपालगणिना प्रणीताऽस्य विवृतिरुपरि प्रादर्शि ।

२ वि. सं. १४८३ वर्षे तपागच्छनायकसोममुन्दरसूरिशिष्येण लेखितं सटीकमेतदुपलभ्यते । अवचूरिसहितं त्वेतद् म्हेसाणास्थयशोविजयजैनपाठशालया प्रसिद्धिं प्रापितम् । वि. सं. १६४० वर्षे पाठकपुण्यसागरेण विरचितैतद्वृत्तिश्चोपलभ्यते ।

३ जिनवल्लभसूरिविरचितं 'उल्लासिक्रम' इत्यादि लघ्वजितशान्तिस्तोत्रं वि. सं. १३२२ वर्षे धर्मतिलकमुनिरचितया विक्रमीयसप्तदशशताब्युत्तरार्धे च गुणविनयगणिगदितया वृत्त्योपेतमुपलभ्यते ।

जिनवल्लभसूरिविरचितं भावारिवारणादि वीरजिनस्तोत्रं वि. सं. १४८७ (?) वर्षे जयसागरगणिप्रणीतवृत्तिसहितं ही. हं. पण्डितेन प्राकाशि ।

जिनवल्लभसूरिरचितं 'दुरियरयसमीर' इत्यादि वीरस्तोत्रं वि. सं. १६८७ (?) वर्षे समयसुन्दरगणिनिर्मितवृत्तिसमन्वितं सूर्यपुर(सूरत)स्थजिनदत्तसूरिज्ञानभाण्डागारसंस्थया प्रकाशयाञ्चक्रे

जिनवल्लभसूरिप्रणीतं नाभेय-शान्ति-नेमि-पार्श्व-वीरजिनचरितपञ्चकरूपं स्तोत्रपञ्चकं वि. सं. १५१९ वर्षे साधुसोमगणिविहितवृत्त्या समन्वितं सम्प्राप्यते ।

एतदतिरिक्तान्यन्यानि चतुर्विंशतिजिनस्तुति-जिनविज्ञप्ति-वीरकल्याणकस्तोत्रादिस्तोत्राण्यपि यत्र कुत्रचिदुपलभ्यन्ते । स्वप्नाष्टकविचारनामा ग्रन्थो जिनपालोपाध्यायविहितभाष्यसहितो ज्ञायते (पत्तनीयभां० सूची) । अष्टपसत्यागमोद्धारायाऽन्याऽपि जिनवल्लभसूरिकृतिर्विज्ञायते जैनग्रन्थावल्यां जिनवल्लभसूरिनाम्नि निर्दिष्टाः पर्यन्तोपदेश-तीर्थकरस्थानप्रकरण-बृहत्संग्रहणीवृत्ति-रत्नचूडकथाप्रभृतयो ग्रन्थास्तथैव वाऽन्यथेति न निश्चीयते ।

प्रशंसकाः

जिनवल्लभसूरिसन्तानीयैः प्रभूतैर्विद्वद्भिर्ग्रन्थकारैर्ग्रन्थप्रारम्भप्रान्ते **जिन**चैत्यादिप्रतिष्ठालेखप्रारम्भप्रान्तादौ निजपूर्वजपरिचायकप्रशस्तिप्रदर्शने च प्रस्तुतोऽयं सूरिर्भूरिप्रशंसापूर्वमस्मारि । तत उद्धृत्यात्र किञ्चित् प्रदर्श्यते तथाहि—

वि. सं. १२९९ वर्षे **चित्र**कूटवास्तव्य सा. **स**ल्हाकेन लेखितायां पुस्तिकायाम्—

" चारित्रिचूडामणिश्री**जिनवल्लभसूरि**सन्तानीयश्री**जिने**श्वरसूरिपदपंकजमधुकरेण " इत्यादि । —जे० भां० सूची (पृ. २६)

[1]वि. सं. १३०७ वर्षे पूर्णकलशगणिः —

"तस्मिन् सोऽ**भयदेव**सूरिरभवत् कृतसाङ्गवृत्तिस्ततः*
संविग्नो **जिनवल्लभो** युगवरो विद्यालिताराऽम्बरम् ।"
—प्राकृतद्व्याश्रयवृत्तौ(प्रश० श्लो० २)

[2]वि. सं. १३१२ वर्षेऽभयतिलकगणिः—

"*तच्छिष्यो **जिनवल्लभो** गुरुरभाच्चारित्रवैचि(पावि)त्यतः
सारोद्धारसमुच्चयो नु निखिलश्रीतीर्थसार्थस्य यः ।
सिद्धाकर्षणमन्त्रको न्वखिलसद्विद्याभिरालिङ्गनात्
कीर्त्या सर्वगया प्रसाधितनभोयानाढ्यविद्यो ध्रुवम् ॥ "
—सं. द्व्याश्रयवृत्तौ (प्रश० श्लो० ४)

' जज्ञे *तदीयपदवीनलिनीमरालः स्वेभ्यश्चरित्ररमया **जिनवल्लभा**ख्यः ।'
—न्यायालङ्कारप्रान्ते (जेसलमेरभां० सूची पृ.४८)

[3]वि. सं. १३१२ वर्षे चन्द्रतिलकोपाध्यायः—

---

१ समर्थिता विक्रमराजवर्षे **हयान्तरिक्ष-ज्वलनेन्दु**सङ्ख्ये ।
पुष्यार्कशस्यामलफाल्गुनैकादशीतिथौ **द्याश्रयवृत्ति**रेषा ॥
—प्राकृतद्याश्रयवृत्तिः (प्रश० श्लो० १४)

२ अब्ध्ये **द्वादश**भिस्त्र**योदश**शते श्रीविक्रमाब्दे ह्री(ह्वि)यं
श्री**प्रह्लादन**पत्तने शुभदिने दीपोत्सवेऽपूर्यत ।
—सं. द्याश्रयवृत्तिः (प्रश० श्लो० १३)

३ **श्रीमद्वीसलदेव**गूर्जरधराधीशेऽधिपे भूभुजां
पृथ्वीं पालयति प्रतापतपने **श्रीस्तम्भतीर्थे** पुरे ।
चक्षुः-शीतकर-त्रयोदशमिते संवत्सरे वैक्रमे
काव्यं भव्यतमं समर्थितमिदं दीपोत्सवे वासरे ॥
—अभयकुमारचरितम् (प्रश० श्लो० ४७)

"श्री**जिनवल्लभ**सूरिस्तैत्पट्टेऽभूद् विमुक्तबहुभूरिः ।
भव्यजनबोधकारी कल्मषहारी सदोद्यतविहारी ॥
तर्क-ज्योतिरलङ्कृतीर्निज-परानेकागमाँल्लक्षणं
यो वेत्ति स्म सुनिश्चितं सुविहितश्चारित्र(त्रि)चूडामणिः ।
नाना**वाग्गड**मुख्यकान् जनपदान् श्री**चित्रकूट**स्थितां
चामुण्डामपि देवतां गुणनिधिर्यो बोधयामासिवान् ॥"
—अभयकुमारचरिते (प्रश० श्लो० १०-११)

[1]वि सं. १३१७ वर्षे लक्ष्मीतिलकगणिः—
" विद्वत्ताऽतिशयार्द्धि-संयमरमात्रैमातुरः सर्वतो-
वक्त्रो यस्य यशःकुमार उदितः श्रीतारकाधीश्वरम् ।
चित्रं न्यक्कृतवांस्त्रिलोकमपि च प्रासाधयल्लीलया
तीर्थं श्री**जिनवल्लभो** गणपतिः शास्ति स्म सोऽयं ततः ॥"
—जिनेश्वरसूरीयश्रावकधर्मवृत्तौ (प्रश० श्लो० ४)

[2]वि. सं. १३२० वर्षे प्रबोधचन्द्रगणिः—
"विद्या मा भवताकुला जनानि ! वाग्देवि ! त्वमाश्वासयै-
ता धातस्त्वमिमां प्रबोधय गिरं ब्रह्मन् ! स्वयं मा मुहः ।
आसीनोऽ**भयदेवसूरि**मुनिराट्-पट्टे जगद्वल्लभः
सूरिः श्री**जिनवल्लभः** स्व(सु)रसतः सिद्धं तवैवेप्सितम् ।"
—सन्देहदोलावलिबृहद्वृत्तौ (प्रश० श्लो० ९)

---

१ श्री**वी**जापुर**वा**सुपूज्यभवने हैमः सदण्डो घटो
यत्रारोप्यथ **वी**रचैत्यमसिधत् श्री**भी**मपल्ल्यां पुरि ।
तस्मिन् वैक्रमवत्सरे **मुनि-शशि-त्रेतेन्दु**माने चतु—
र्दश्यां माघसुदीह **चा**चिगनृपे **जा**वालिपुर्यां विभौ ॥
वीरार्हद्-**वि**धिचैत्यमण्डनजिनाधीशां चतुर्विंशति—
सौधेषु ध्वजदण्ड-कुम्भपटलीं हैमीं महिष्ठैर्महैः ।
श्रीमत्सूरि**जि**नेश्वरा युगवराः प्रत्यष्ठुरस्मिन् क्षणे
टीकाऽलङ्कृतिरेषिकाऽपि समगात् पूर्तिप्रतिष्ठोत्सवम् ॥
—श्रा. ध. प्र. वृ. (प्रश० श्लो० १६-१७)

२ विक्रमवर्षे **व(ऽम्ब)र-कर-शिखि-रूप**मिते मधोः प्रथमपक्षे ।
पञ्चम्यां **प्रह्लादन**नगरेऽसौ समर्थिता सोमे ॥-सं० दो० वृ० ।

[1]वि. सं. १३२२ वर्षे धर्मतिलकमुनिः—

"इह हि किलैकदा वर्णनातिक्रान्तानुपमभागधेयाः सुगृहीतनामधेयाः सकललोकसंश्लाघ्यमहार्घ्यविमलगुणमणिश्रेणयः संविग्नमुनिजनव्रातचूडामणयः स्वप्रज्ञाऽतिशयविशेषविनिर्जितामरसूरयः **श्रीजिनवल्लभसूरयः** श्रीअजित-शान्त्योः स्तवनं चतुर्विधश्रीश्रमणसङ्घश्रेयस्करं सप्तदशवृत्तप्रमाणं विशेषतः पाक्षिकादिपर्वणि पाठ्यं चिकीर्षवः"

—जिनवल्लभीयाजितशान्तिस्तववृत्तिप्रारम्भे ।

वि. सं. १३२६ (?) वर्षीये सङ्घपुरजिनालयशिलालेखे—

"अपमलगुणग्रामोऽमुष्मादधीतजिनागमः
प्रवचनधुराधौरेयोऽभूद् गुरु**र्जिनवल्लभः** ।
सकलविलसद्विद्यावल्लीफलावलिविभ्रमं
प्रकरणगणो यस्यास्येन्दोः सुधा बिभृतेतराम् ॥ १०१ ॥
सम्यक्त्वबोधचरणैस्त्रिजगज्जनौघचेतोहरैर्वरगुणैः परिरब्धगात्रं ।
यं वीक्ष्य निःस्पृहशिखामणिमार्यलोकः सस्मार सप्रमदमार्यमहागिरीणां ॥१०२॥"

—वीजापुरवृत्तान्ते (पृ० ४)

[2]वि. सं. १३२८ वर्षे प्रबोधमूर्तिगणिः (जिनप्रबोधसूरिः)—

' चान्द्रे कुलेऽजनि गुरु**र्जिनवल्लभा**ख्यो-
ऽर्हच्छासनप्रथयिताऽद्भुतकृच्चरित्रः । ' —कातन्त्रदुर्गपदप्रबोधे

वि. सं. १२७८-१३३१ (?) वर्षे जगड्डुकविः—

'धंनु सु **जिणवल्लहु** वक्खाणि नाण-रयणकेरी छइ खाणि ।
बइतालीस सुद्ध पिंडु विहरेइ त्रिविधु मंदिरु जगि प्रगटु करेइ ॥'

—सम्यक्त्वमाईचउपई (प्रा. गू. का. संग्रहः पृ. ८१, गा. ४१)

वि. सं. १३३९ (?) वर्षे प्रभानन्दाचार्यः—

"*तस्मान्मुनीन्दु**र्जिनवल्लभो**ऽथ तथा प्रथामाप निजैर्गुणौघैः ।
विपश्चितां संयमिनां गणे च (च वर्गे) धुरीणता तस्य यथाऽधुनाऽपि ॥"

—ऋषभपञ्चाशिकावृत्तौ, वीतरागस्तोत्रविवरणेऽपि ।

---

१ **नयन-कर-शिखीन्दु**मिते विक्रमवर्षे तपस्यसितषष्ठ्याम् ।
वृत्तिः समर्थिताऽस्या मानं च सविंशतित्रिशती ॥—अ. वृ. प्रान्ते ।

२ विक्रमनृपवर्षेऽष्टाविंशत्यधिके **त्रयोदशशते** । सम्पूर्णः शुच्यां प्रतिपदि राधेऽश्विन्यां गुरौ वारे ॥
—जेसलमेरभां० सूची (पृ. १७, अप्र० ५७)

[1]वि. सं. १४११ वर्षे तरुणप्रभसूरिः—

* तदीयपादद्वयपद्मसेवामधुव्रतः **श्रीजिनवल्लभो**ऽभूत् ।
यदङ्गरङ्गे व्रतनर्तकेन किं नृत्यता कीर्तिधनं न लेभे ? ॥

—श्रावकप्रतिक्रमणसूत्रविवरणे (प्रश० श्लो० ३)

[2]वि. सं. १४१२ वर्षे भुवनहितोपाध्यायः—

"..... **जिनवल्लभ**..... शांगनावल्लभो..... प्रियः
यदीयगुणगौरवं श्रुतिपुटेन सौ(सु)धोपमं निपीय
शिरसोधुनापि कुरुते न कस्तांडवं ? ॥ २० ॥"

—जैनलेखसङ्ग्रहे (पू० नाहरसंगृहीते ख० १, पृ० ६०)

[3]वि. सं. १४२२ वर्षे सङ्घतिलकाचार्यः—

"*तत्पट्टपूर्वाचलचूलिकायां भास्वानिव श्री**जिनवल्लभा**ख्यः ।
सच्चक्रसम्बोधनसावधानबुद्धिः प्रसिद्धो गुरुमुख्य आसीत् ॥"

—सम्यक्त्वसप्ततिवृत्तौ (प्रश० श्लो० ३)

वि. सं. १४२९ (?) वर्षे सोमतिलकसूरिः—

"संविग्नचूडामणयो न केषां स्युर्वल्लभाः श्री**जिनवल्लभा**स्ते ।
मूर्ताऽपि यद्गीर्भविनाममूर्तमात्मानमुत्तुङ्गगुणैः ससञ्ज ॥"

—शीलोपदेशमालावृत्तौ शीलतरङ्गिण्याम् (प्रश० श्लो० ३)

[4]वि. सं. १४२९ वर्षे देवेन्द्रसूरिः—

"*तदनु **जिनवल्लभा**ख्यः प्रख्यातः समयकनककषपट्टः ।
यत्प्रतिबोधनपटहोऽधुनाऽपि दन्ध्वन्यते जगति ॥"

—प्रश्नोत्तररत्नमालावृत्तौ (प्रश० श्लो० ९)

---

१ **शशि-शशि-वेदेन्दु**मिते संवति सति **पत्तने** महानगरे ।
दीपोत्सवे च लिलेख सुगमां **दिनकृत्यविवृति**रि(?म)यम् ॥

—श्रा. प्र. सू. वि. (प्रश० श्लो० १३)

२ **नयन-चंद्र-पयोनिधि-भू**मिते व्रजति विक्रमभूभृदनेहसि ।
बहुलषष्ठीदिने शुचिमासगे महीमचीकरदेवमयं सुधीः ॥—जै० ले० सं० (पृ० ६२)

३ अस्मच्छिष्यवरस्य **सोमतिलका**चार्यानुजस्याधुना
श्री**देवेन्द्र**मुनीश्वरस्य वचसा **सम्यक्त्वसप्तति**तेः ।
श्रीमद्विक्रमवत्सरे **द्वि-नयनाम्भोधि-क्षपाकृ**त्प्रमे
श्री**सारस्वत**पत्तने विरचिता दीपोत्सवे वृत्तिका ॥ —स० स० वृ० ।

४ तस्यानुजेन **देवेन्द्र**सूरिणा विक्रमार्कतः । **नन्द-युग्म-पयोराशि-शशाङ्क**प्रमवत्सरे ॥
प्रश्नोत्तररत्नमालाया वृत्तिर्विदधे मुदा । शोधिता च लसद्भद्रैः श्री**मुनिभद्र**सूरिभिः ॥

—प्र. र. वृ. (प्रश० श्लो० १७-१८)

[1]वि. सं. १४६८ वर्षे वर्धमानसूरिः—

" श्राद्धप्रबोधप्रवणस्तत्पट्ट **जिनवल्लभः** । सूरिर्वल्लभतां भेजे त्रिदशानां नृणामपि ॥ "

—आचारदिनकरे (प्रश० श्लो० १४)

प्रायो विक्रमीयपञ्चदशशतके चित्रिता जेसलमेरुदुर्गीयजैनभाण्डागारादै-ताडपत्रात्मकपुस्तिकायाः काष्ठपट्टिकायां **जिन**वल्लभसूरि–प्रतिकृतिरप्युपलभ्यते ।[2]

वि. सं. १४९७ वर्षे प्रतिष्ठिते सम्भवजिनालयप्रशस्तिशिलालेखे–

" ततः क्रमेण श्री**जिन**चंद्रसूरि–नवांगीवृत्तिकार–श्री**स्त**भनपार्श्वनाथप्रकटीकारश्री**अभय**-देवसूरि–श्री**पिंडविशुद्धया**दिप्रकरणकारश्री**जिनवल्लभसूरि**–" इत्यादि

—जेसलमेरभां० सूची (परि० पृ. ६७,७९)[3]

वि. सं. १५०३ वर्षे **जिन**वल्लभीय**भा**वारिवारणादिस्तोत्रवृत्तिकारो जयसागरगणिः—

" श्री**वीर**शासनाम्भोधिसमुल्लासनशीतगोः । सूरे**रभय**देवस्य नवाङ्गीवृत्तिवेधसः ॥
पट्टालङ्कारसारश्रीः सूरिः श्री**जिनवल्लभः** ।" —जे० भां० सूची (पृ. ५७)[4]

वि. सं. १५०४ वर्षे महेश्वरकविः—

" एतत्कुले श्री**जिनवल्लभा**ख्यो गुरुस्ततः श्री**जिनदत्त**सूरिः ।
सुपर्वसूरिस्तदनुक्रमेण बभूव वर्यो बहुलैस्तपोभिः ॥ "

मन्त्रिमण्डनवंशवर्णने काव्यमनोहरे (स० ७, श्लो० १९)

[1]वि. सं. १५१९ वर्षे जिनवल्लभसूरिरचितनाभेय–शान्ति–नेमि–पार्श्व–वीर जिनस्तोत्रचरितपञ्चकवृत्तिकारः साधुसोमगणिः—

" **जिनवल्लभ**सूरीन्द्रसूक्तिमौक्तिकपङ्क्तयः । दर्शितार्थाः सुदृष्टीनां सुखग्राह्या भवन्त्विति ॥ "

—चरित्रपञ्चकवृत्तिप्रान्ते (श्लो० ६)

[4]वि. सं. १५४४ वर्षे कमलसंयमोपाध्यायः—

" विचारवद्वाङ्मयवारिधाता गुरुर्गरीयान् **जिनवल्लभो**ऽभूत् ।
सूत्रोक्तमार्गाचरणोपदेशप्रावीण्यपात्रं नहि यादृशोऽन्यः ॥ "

—उत्तराध्ययनवृत्तौ सर्वार्थसिद्धौ (प्रश० श्लो० ४)

---

१ पुरे **नन्दवनाख्ये** च श्री**जालन्धर**भूषणे । **अनन्तपाल**भूपस्य राज्ये कल्पद्रुमोपमे ॥
श्रीमद्विक्रमभूपाला**दष्टषण्मनु**सङ्ख्यके । वर्षे कार्तिकराकायां ग्रन्थोऽयं पूर्तिमाययौ ॥—C

२ अस्य संक्षिप्तपरिचयो जे० भां० सूची (अप्रसिद्ध० पृ. ५४) दर्शनेन भविष्यति ।

३ जेसलमेरभां० सूची (प्रस्ता० पृ० १३, ४), पत्तनभां० सूची ।

४ जेसलमेरभां० सूची (प्रस्ता० पृ० १२; ४–५)

[1]वि. सं. १५९३ वर्षे पद्ममन्दिरगणिः—

"प्राप्तोपसम्पद्विभवस्तदन्ते द्विधाऽपि सूरिर्जिनवल्लभोऽभूत् ।
जग्रन्थ यो ग्रन्थमनर्थसार्थप्रमाथिनं तीव्रक्रियाकठोरः ॥"

—ऋषिमण्डलवृत्तौ (प्रश० श्लो० ७)

वि. सं. १६१९ वर्षे साधुकीर्तिगणिना जिनवल्लभीयसङ्घपट्टकस्यावचूरिर्व्यधायि।

वि. सं. १६४० वर्षे[3] पाठकपुण्यसागरः—

"स जयताज्जगतीजनवल्लभः परहितैकपरो **जिनवल्लभः** ।
चतुरचेतसि यस्य चमत्कृतिं रचयतीह चिरं रुचिरं वचः ॥"

—जिनवल्लभीयप्रश्नोत्तरषष्टिशतककाव्यस्य लघुवृत्तौ ।

[4]वि. सं. १६४६ वर्षे समयसुन्दरगणिः—

"कृत्वा समीपेऽभयदेवसूरिं येनोपसम्पद्ग्रहणं प्रमोदात् ।
पपौ रहस्यामृतमागमानां सूरिस्ततः श्रीजिनवल्लभोऽभूत् ॥"

—अष्टलक्षार्थी (प्रश० श्लो० ११)

[5]वि. सं. १६५१ वर्षे पाठकगुणविनयः—

---

१ एनां **जेसलमेरु**नाम्नि नगरे प्रारब्धवानश्विनी–
कोष्टे वाग्गुरु**पद्ममन्दिर**गणिः पूर्णीचकारानु च ।
वर्षे **वह्नि-शराशुगोडुप**मिते वैशाखशुक्लत्रयो–
दश्यां शुक्रकरोद्भवे शुभतमे योगेऽल्पधीशेखरः ॥ —ऋ. मं. वृ.

२ तच्छिष्येण सुविहिता सुगमेयं **साधुकीर्ति**गणिनाऽपि ।
एकोनविंशसमधिक**षोडश**संवत्सरे प्रवरे ॥
माघस्य शुक्लपक्षे पञ्चम्यां प्रवरयोगपूर्णायाम् ।
विबुधैः प्रपठयमाना समस्तसुखदायिनी भवतु ॥ —सङ्घ० अवचूरिः ।

३ समर्थिता **विक्रमसत्पुरे**ऽसौ वृत्तिर्विधद्-वार्धि-**रसेन्दु** १६४० वर्षे ।
गुरौ शुभश्वेतसहोदशम्यां श्री**जैनचन्द्रा**भिधसूरिराज्ये ॥— प्रश्नो० वृत्तिः ।

४ श्रीविक्रमनृपवर्षात् समये **रस-जलधि-राग-सो[म]**समेते ।
श्रीम**ल्लाभपुरे**ऽस्मिन् वृत्तिरियं पूर्णतां नीता ॥ —अ. र.

५ श्री**जिनचन्द्र**गुरूणां तेषां श्रीमद्युगप्रधानानाम् ।
राज्ये विजयिनि सैषा वृत्तिर्विदधे विधेयकृते ॥
वाचकवर**गुणविनय**ैः श्रीम**ज्जयसोम**पाठकविनेयैः ।
शुभवल्ली**पल्ली**पुरि **शशि-शर-कायेन्दु** १६५१ मितवर्षे ॥ —सं. स. वृ.

"सोऽभूद्**अभयदेवा**ख्यः, सूरिः श्री**जिनवल्लभः** ।
ज्ञान–दर्शन–चारित्रपात्रं भ्रेजे ततो भृशम् ॥
येन चण्डाऽपि **चामुण्डा** दर्शनं प्रापिता गुणैः ।
कर्ता **पिण्डविशुद्ध्या**दिशास्त्राणां तत्त्वशालिनाम् ॥"

—सम्बोधसप्ततिवृत्तौ (प्रश० श्लो० ७–८)

[1]वि. सं. १६५४ वर्षे ज्ञानविमलोपाध्यायः—

" [*]तत्पट्टे च विरेजुः **कर्मग्रन्थादि**शास्त्रकर्तारः ।
वैराग्यैकनिधानाः श्रीम**ज्जिनवल्लभा**चार्याः ॥"

—शब्दभेदप्रकाशटीकायाम् ।

इत्याद्यवदातावलोकनेन प्रस्तुतापभ्रंशकाव्यत्रयीप्रदर्शित**वि**धिपथप्रचारयितुरेतत्काव्यत्रयीकर्तृ**जिन**दत्तसूरिपूज्यस्य **जिन**वल्लभसूरेः सम्यक् परिचयो भविष्यतीति विस्तारभयाद् विरम्यते ।

जिनदत्तसूरिः ।

सुप्रसिद्धिमधिगतस्य परमपितामह(बड़ा दादा)प्रख्यया श्वेताम्बरजैनानुयायिभिर्विशेषतः खरतरगच्छीयैः प्रभूतपुरादिषु भक्तिप्राग्भारेणेदानीमपि स्तूप–प्रतिमा––प्रतिकृति–पादुकाप्रभृतिप्रतिष्ठापनपूर्वं प्रपूज्यमानस्य चतुरचित्तचमत्कृतकारिचारुचरितस्य प्रस्तुतापभ्रंशकाव्यत्रयीप्रणेतु**र्जि**नदत्तसूरेः परिचयः साम्प्रतं साम्प्रत इति स एव प्रस्तूयते ।

प्रस्तुतसूरिणा स्वगुर्वादेः स्वीयविद्वत्ताऽऽदेश्च प्रकटाप्रकटरूपः परिचयः स्वयमपि समकारि स्वकीयकृतिसन्दर्भेषु । यन्मध्यादेषा काव्यत्रयी त्वत्र प्रत्यक्षा तथा च तत्कृतिरूपं **ग**णधरसार्धशतकं **गु**रुपारतन्त्र्यं नाम ग्रन्थद्वयमप्यत्र परिशिष्टप्रदर्शितमुपयुक्तं प्रेक्ष्यते ।

प्रदृश्यतेऽद्यापि प्रस्तुतस्य सूरे**र्नि**शीथचूर्ण्यादि पुस्तकं प्रतिकृत्यौपवस्त्रं[2]प्रमुखं च **जे**सलमेरुदुर्गादौ । किञ्चैतत्सूरिशिष्येण **जिन**रक्षितसाधुना वि. सं. ११७० वर्षे

---

१ श्रीम**द्विक्रम**नगरे राजच्छ्री**राजसिंह**नृपराज्ये । सल्लोकचक्रवाकप्रमोदसूर्योदये सम्यक् ॥
चतुराननवदनेन्द्रिय–रस–वसुधासंमिते लसद्वर्षे । श्रीमद्विक्रमनृपतौ निष्क्रान्तेऽतीव कृतवर्षे ॥

—P. P. २, १२८

धारानगर्यां लिखितानि, ब्रह्मचन्द्रगणिना च वि. सं. ११७१ वर्षे पत्तने जयसिंह-देवराज्ये लिखितानि कविपल्हप्रणीतानि पट्टावली(जिनदत्तसूरिस्तुति)पद्यानि त्वत्र परिशिष्ट(४)प्रान्ते परिनिदर्शितानि पाठकैः प्रत्यक्षीकारिष्यन्ते ।

श्रीमतश्चास्य सूरेः शिष्येण स्थिरचन्द्रगणिना वि. सं. १२०७ वर्षेऽजयमेरौ दुर्गे पल्लीभङ्गे पञ्चाशकवृत्तेस्त्रुटितपुस्तकं गृहीत्वा गतं स्वयं लिखितमासीत्, तदपि विद्यते जेसलमेरुदुर्गभाण्डागारे ।

अपवर्गनाममालाकारो जिनप्रियविनेयो जिनभद्रसूरिर्जिनवल्लभ–जिनदत्तसूरि-सेवकत्वं निजं न्यदर्शयत्[1] ।

पूर्वपरिचायितजिनवल्लभसूरेः[2] पट्टप्रतिष्ठितेनानेन जिनदत्तसूरिणा निजपट्ट-धरपदवी जिनचन्द्रसूरये स्वयं व्यतारीत्यादीतिवृत्तोऽप्युपलभ्यते[3] । यस्य विनेयेन जिनमत-(? पति)यतिना वि. सं. १२१५ वर्षे विलिखिता राक्षसकाव्यटीकाऽऽदिपुस्तिका जेसलमेरुदुर्गभाण्डागारे दृश्यते[4] ।

सूरिवर्यस्यास्य शिष्य–प्रशिष्यपरम्पराप्रोद्भूतैः प्रभूतैः पण्डितप्रकाण्डैः प्रणीतेषु प्रचुरपुस्तक–प्रतिमा–प्रासाद–प्रशस्तिप्रभृतिषु प्रादुष्कृतं प्रविततमेतदीयं प्रोज्ज्वलं सुयशः परिपठ्यते । प्रेक्षावतां प्रीतये ततः प्रोद्धृत्यात्र किञ्चित् प्रदर्श्यते । तथाहि––

वि. सं. १२२३–७७ वर्षेषु सूरिपदे विद्यमानो जिनदत्तसूरिपट्टधरजिन-चन्द्रसूरिशिष्यो जिनपतिसूरिः—

---

१ जे. भां. सूची (पृ. ६) ।

२ जे. भां. सूची (पृ. ४५)।

३ " पूज्यश्रीजिनवल्लभप्रभुपदाध्यारोहरोहद्दयशः–
सूरिश्रीजिनदत्तदत्तपदवीराजीविनीभास्वतः ।
शिष्यः श्रीजिनचन्द्रसूरिसुगुरोर्विद्यासरस्वानिति
व्यध्वध्वंसविधिर्व्यधाज्जिनपतिः सूरिः प्रबोधोदयम्।।"
—जिनपतिसूरिः (जे. भां. सूची पृ. ६०)
" बाल्ये श्रीजिनदत्तसूरिविभुभिर्ये दीक्षिताः शिक्षिता
दत्त्वाऽऽचार्यपदं स्वयं निजपदे तैरेव संस्थापिताः ।
ते श्रीमज्जिनचन्द्रसूरिसुगुरवोऽपूर्वेन्दुबिम्बोपमा
न ग्रस्तास्तमसा कलङ्कविकलाः क्षोणौ बभूवुस्ततः ॥ "
—पूर्णभद्रगणिः (जे. भां. सूची पृ. २)

४ जे. भां सूची (अप्रसिद्ध० पृ. ५९) द्रष्टव्या ।

" तच्छिष्यो **जिनदत्त**सूरिरभवच्चारित्रिणामग्रणी–
र्यो मध्येसमयं विधिं च विषयं सत्पारतन्त्र्यं तथा ।
एतां सिद्धपदत्रयीं त्रिपथगां लब्ध्वा यथा मातृकां
व्याशिष्टाहितलक्षणः कृतमुखो विश्वं यथा शाब्दिकः ॥
लोला दोलाधिरोहात् कननशिखरिणः कन्दरोत्सङ्गरङ्ग–
क्षोणीमक्षूणशोभावधिमधिशयिताः पूर्णहन्नेत्र–कर्णाः ।
जीवातून् श्रोत्रवृत्तेर्निशमनमनसामन्तरङ्गं न मातः
शङ्के गानच्छलेन त्रिदिवयुवतयो यद्गुणानुद्गिरन्ति ॥ "

—**प**ञ्चलिङ्गीविवरणप्रान्ते (श्लो० ९–१०)

" जज्ञे श्री**जिनदत्त**यत्यधिपतिः शिष्यस्ततस्तस्य यः
सिद्धान्ताद् विधि–पारतन्त्र्य–विषयाभिख्यामभिख्यान्वितः ।
आसाद्य त्रिपदीं विधुर्बलिमिव व्यध्वं वृषध्वंसनं
चिच्छेद प्रतिपन्थिनं सुमनसां व्यक्तक्रमप्रक्रमः ॥
लावण्यावसथो यथा पतिरपां नो पर्वतक्षोभितः
शृङ्गीव द्युसदां सुवर्णसुभगो नोच्चैः सुरागाश्रयः ।
यः कल्पद्रुरिव द्रुतार्पितफलो नोद्यत्सदापल्लवः
साम्यं यस्य तथापि शस्ययशसस्तैः कुर्वते वालिशाः ॥ "

—**स**ङ्घपट्टकविवृतिप्रान्ते ।

वि. सं. १२८९ वर्षे **पू**र्णभद्रगणिः—

" भास्वांस्ततः समुदगा**ज्जिनदत्त**सूरि–
र्भव्यारविन्दचयबोधविधानदक्षः ।
गावः स्फुरन्ति **वि**धिमार्गविकासनैक–
तानास्तमोविदलनप्रवणा यदीयाः ॥ "

—**ध**न्य-शालिभद्रचरित्रे (जे. भां. सूची पृ. २)

वि. सं. १२९३ वर्षे **जि**नपालगणिः—

" **जिनदत्त** इति श्रीमान् सूरिस्तत्पदभूषणः ।
जज्ञे स ज्ञानमाणिक्यरोहणो **वि**धिपोषणः ॥ "

—**द्वा**दशकुलकविवरणप्रान्ते ।

---

१ तच्छब्देनात्राग्रेऽपि च पूर्वोक्तजिनवल्लभसूरेः परामर्शः ।

वि. सं. १२९५ वर्षे सुमतिगणिः—

" क्वैताः श्रीजिनदत्तसूरिसुगुरोर्वाण्योऽब्धिमध्योपमाः
क्वाहं दुर्गमहाटवीमृगनिभः प्रास्तान्तरप्रातिभः ।
तद्भक्त्याहितबुद्धिरुद्धतमतिः कर्णे यथा कुण्डलं
कुर्वन् वेधविधिच्युतेऽहमपि तल्लप्स्ये तथा हास्यताम् ॥
महात्मनः पुण्यनिधेस्तथापि तस्यैव माहात्म्यवशाद् विधास्ये ।
वृत्तिं विचित्रां गणभृच्छतस्य सार्धस्य संक्षिप्ततरां सुबोधाम् ॥ + +

तत्र च प्रवचनप्रभावनाप्रासादोत्तुङ्गशिखरखरतरमरुत्तरङ्गरङ्गचारुचामीकरोद्दण्ड-दण्डनिर्धौतपूतप्रवलकलकलाविद्राणरणत्किङ्किणीक्वाणपटपटायमानधवलध्वजपटायमानः श्रीमदुज्जयनीदुर्जयनीरन्ध्ररन्ध्रान्वेषिद्वेषिभोगियोगिनीचक्रचक्रचित्रचरित्रचमत्कारकारि(री) श्रीमरुमण्डलमण्डन—परचक्रपराक्रमखण्डन—श्रीविक्रमपुरनगरनिवासिभूत—प्रेत—परेतराज-निर्व्याजसंवासप्रोल्लासपरासनप्रवण—श्रवणसुखहर्षदद्वादशवार्षिकपराश्रुताप्रचारिप्रविहितसुं-विहितजनरञ्जननिदान—परिहितसुहितहाटक—प्रकटितविकटनाटक—श्रीमद्दणाहिलपाटक-सप्तसप्तिसप्तिप्रमितवर्षावस्थानविधान—प्र[ति]वादिपञ्चाननसिंहनादभञ्जन प्रदा(धान)—श्री [नि]कर्षसंनिकर्षनिष्कम्पितदारिद्र्यमुद्रामुखि(द्रि)त—श्रीत्रिभुवनगिरिनीवृत्पतिनियमितपञ्च-सप्तयतिवासप्त(प्र)वासि—श्रीवामाङ्गजोपरिनवफणिफणाधिरोपणरूप—वामावर्तारात्रिकस्था-पनस्वरूप—प्रमुखनानारूपसारशक्तिसम्भारस्फायमानः निरन्तरागच्छद्गच्छत्प्रपन्नभृत्य-भावभावसारप्रणमन्नानाप्रकारकान्तिभारभासुरसुरासुरव्यन्तरविद्याधरधरेश्वरनिषेधि(वि)त—सदैवतानिर्दैन्य-दीनातुरप्रचुरतरनिर्विवादप्रसादानिर्मलनिस्तुलसकलसत्पादकमलः प्रभाव-सारस्वतमन्त्रानुभावविभावितादेशनिर्मुग्धशेमुषीसमु(?)कविराज—स्क(स्वक)पो-लकल्पितानल्पजल्प[वि]कल्पलोलल्लोलबहललहरीपरीतानवगीतसमस्तशास्त्रार्थकल्पना-वलेपप्रक्लृप्तलिपिपरिज्ञानाकृष्टविष्टपप्रकृष्टकृष्टिजनमानसः तात्त्विकतत्त्वावबोधोद्बुद्धशुद्धबोध-निशितासिलताप्रहारप्रहताहिततथ्यापथ्यमिथ्यादर्शनशल्योत्थितातुल्यकल्यकल्याणकारिहारि-निर्मलतरसम्यग्दर्शनमणि—सात्त्विकशिरोमणि—श्रद्धानिधान—सात्त्विकश्राद्धप्रधान—पुन्ना-गनागदेवसेवनावर्जित—संक्लेशलेशवर्जित—समूर्जितश्रीमदुज्जयन्तोत्तुङ्गगुरुशिखरिशिखर-बद्धाधिवास—सोल्लाससाधिष्ठायकविलम्बिरोलम्बिचुम्बिरसालतुम्बिनिविष्टदृष्टि—सिद्ध—
—बुद्धाम्बिकाऽम्बिकादेवीस्वहरतप्रदत्तप्रशस्तप्रशस्तिरूपसम्प्रतितनयुगप्रधाननामाक्षर—

---

१ 'दासानुदासा इव सर्वदेवा यदीयपादाब्जतले लुठन्ति ।
मरुस्थले(ली)कल्पतरुः स जीयाद् युगप्रधानो जिनदत्तसूरिः ॥'
इत्येतत् काव्यं लिखितमासीदिति ख. पट्टावल्याम् ।

वाचनोत्पुसनोल्लसितयुगप्रधानपदवीविभ्राजिविराजिराजहंसिकाऽऽसिकावन्धनिर्बन्धस्थानचरणचङ्क्रमणरमणप्रधानमानसः परिहृतपरिग्रहो(हा)ग्रहमात्रातपदूत(?त्यद्भुत)चित्रचारित्रसम्पदु(?)रिर्भगवान् श्री**जिनदत्तसूरि**र्भूरिभव्यनव्यतरश्रद्धालुता[लता]वितानतानवोच्छेददक्ष निर्विपक्षविवेकविमलजलसेकप्रख्यं **ग**णधरसार्धशतकाभिख्यं प्रकरणं चिकीर्षुः + + + "

—गणधरसार्धशतकबृहद्वृत्तौ (प्रारम्भे) ।

प्रस्तुत**जि**नदत्तसूरिप्रशिष्य**जि**नपतिसूरिशिष्येण **सु**मतिगणिना **जि**नदत्तसूरिस्वर्गमनादनन्तरं चतुरशीतितमे वि. सं. १२९५ वर्षे समर्थितायां **जि**नदत्तसूरीय**ग**णधरसार्धशतकस्य **बृ**हद्वृत्तावित्थमुदलेखि **जिनदत्तसूरि-चरितम्**—

" अधुना पूर्वाचार्याम्नायप्रतिपादनप्रसङ्गादद्भुतनिधानानां श्री**जिनदत्त**सूरीणामेतत्प्रकरणकाराणां यथाश्रुति [यथास्मृति] किञ्चिच्चरितमुत्कीर्त्यते । तथाहि किल पूर्वं श्री**जि**नेश्वरसूरिसत्कश्री**ध**र्मदेवोपाध्याय-

जन्म दीक्षाऽऽदि

यस्य संयताभिर्गीतार्थाभिर्ध्वलक्कके चतुर्मासी कृताऽऽसीत् । तत्र च क्षपणकभक्त**वा**च्छिगश्रावकपत्नी **वा**हडदेवीति नाम्ना पुत्रसहिता तासां साध्वीनां पार्श्वे धर्मं श्रोतुं समागच्छति । ता अपि तस्या विशेषेण धर्मकथाऽऽदिकं कथयन्ति । पुरुषलक्षणं शुभाशुभं च ता गुरूपदेशाद् विदन्ति, तस्याः पुत्रस्य प्रधानलक्षणानि पश्यन्ति, तल्लाभनिमित्तं च तन्मातरं बह्वाक्षिपन्ति । किं बहुना ? तथाऽऽक्षिप्ता यथा [सा] कथितकारिणी जाता । ततो भणिताऽऽर्यिकाभिर्धर्मशीले ! एष त्वदीयः पुत्रो विशिष्टयुगप्रधानलक्षणधरस्तदेनं यद्यस्मद्गुरूणां प्रयच्छसि, तदा तव महान् धर्मो भवति, किञ्चैष समस्तजगन्मुकुटभूतो भवति । तयाऽपि [तत्] प्रतिपन्नम् । ततश्चतुर्मास्यनन्तरं श्रीधर्मदेवोपाध्यायानां स्वरूपं कथितं यदस्माभिरत्र पात्र(रत्न)मेकं प्राप्तमस्ति, यदि युष्माकं प्रतिभास्यति । ततः शीघ्रं समागताः [श्री]धर्मदेवोपाध्यायाः । दृष्टश्चासौ ज्ञातं च निश्चितं न सामान्यपुरुष एषः, किं तर्हि गुरुतरपदयोग्यो भविष्यति । तन्माता पृष्टा ' तव सम्मतं यद्येष दीक्ष्यते ? ' । तयोक्तं पुण्यपात्रया—' भगवन् (न्तः) ! प्रसादं कृत्वा कुरुतैवं येन ममापि निस्तारो भवति ' । पुनः पृष्टोपाध्यायैः—' कियद्वर्षप्रमाणोऽयम् ? ' । तयोक्तम्—' एकादशशतद्वात्रिंशत्संवत्सरे ११३२ जातः' इति । तत एकादशशतैकचत्वारिंशत्संवत्सरे ११४१ शुभलग्ने तस्योपाध्यायैर्दीक्षा प्रदत्ता नाम च कृतं **सो**मचन्द्र इति ।

---

१ गणधरसार्धशतके (गा. ७८,१४८) द्रष्टव्यम् ।

भणित उपाध्यायैः **स**र्वदेवगणिस्त्वया [कियद्वर्षाणि] प्रतिपाल्य एषः, सर्वं बहिर्भूमिनयनादिकं कार्यमस्य क्रियाकलापश्च शिक्षणीय इति । सूत्रादिपाठस्तेन पूर्वं स्वगृहस्थितेनैव कृतोऽस्ति । 'करेमि भंते ! सामाइयं' इत्यादि पाठ्यते । प्रथमव्रतदिन एवासौ **सो**मचन्द्रमुनिर्नीतोऽस्ति बहिर्भूमौ **स**र्वदेवगणिना । [अज्ञानत्वादुद्गतक्षेत्राणि तेन त्रोटितानि । ततः शिक्षानिमित्तं रजोहरणं मुखवस्त्रिका च गृहीता **स**र्वदेवगणिना] भणितश्च व्रते गृहीते किं क्षेत्राणि त्रोट्यन्ते ? तद् गच्छ स्वगृहम् । ततस्तदैवोत्पन्नप्रतिभेन तेनोक्तम्–'युक्तं कृतं गणिना, परं मम चोटिकाऽऽसीत् तां दापय येन गच्छामि' इत्युक्ते गणेराश्चर्यमभूदहो ! लघोरपि कीदृक् सदुत्तरत्वमेतस्य ? किं सम्प्रति प्रतिवचनं दीयते ? । एषा वार्ता **ध**र्मदेवोपाध्यायस्याग्रे जाता । **ध**र्मदेवोपाध्यायैश्चिन्तितम्–'भविष्यति योग्य एषः' ।

बाल्ये प्रतिभा

सर्वत्र **प**त्तने परिभ्रम्य लक्षण–पञ्जिकाऽऽदिशास्त्राणि भणितुमारब्धः **सो**मचन्द्रः । एवं च **भा**वडाचार्य–धर्मशालायां **प**ञ्जिकाभणनार्थमेकदा गच्छन्नुद्धतेन केनापि प्रतिपादितो यथा'ऽहो सितपटाः ! कपलिकाग्रहणं किमर्थम् ?'। **सो**मचन्द्रेणोक्तम्—" त्वदीयमुखचूरणार्थमात्मीयमुख**म**ण्डनार्थं च "। गतोऽसौ निरुत्तरो न किमपि वक्तुं शकितः ।

विद्याध्ययनम्

भणनस्थाने गतस्तत्रानेकेऽधिकारिपुत्राः **प**ञ्जिकां भणन्ति । कदाचित् तेनाचार्येण परीक्षार्थं पृष्टः–'भोः **सो**मचन्द्र ! न विद्यते वकारो यत्र स नवकार इति यथार्थं नाम ?' । प्रतिभावता प्रोक्तं झटिति **सो**मचन्द्रेण–" मैवमावेदयन्त्वाचार्याः, किं तर्हि नवकरणं नवकार इति व्युत्पत्तिः कार्या " । आचार्येण ज्ञातम्–'अहो ! अत्यन्तं सदुत्तर एषः, अनेन सह वक्तुं न शक्यते' ।

अन्यदा लोचदिने व्याख्यानभणनाय न गतः । व्याख्याने व्यवस्था चेदृशी यद्येकोऽपि च्छात्रो नागच्छति, तदा व्याख्यानं न भणत्याचार्य इति । ततो व्याख्यानमभणत्याचार्ये सगर्वैर्भणितमधिकारिपुत्रैः–'आचार्यमिश्राः ! **सो**मचन्द्रस्य स्थाने एष पाषाणो धृतो भणत यूयं व्याख्यानम् ' । ततस्तदुपरोधेन भणितं व्याख्यानम् । द्वितीयदिने समागतः **सो**मचन्द्रः पप्रच्छ च्छात्रान्–'व्यतीतेऽह्नि किं मां विना भणितं युष्माभिः ?' ।

---

१ 'अद्यापि यस्य **सर्वदेव**गणेः **स्त**म्भतीर्थवेलाकूलनिकटवर्ति–**शा**खिस्थलग्रामक्षेत्रभुवि स्तूपो मिथ्यादृष्टिभिरपि सप्रभावत्वेन रक्ष्यमाणः पूज्यमानो विद्यते ।'

—गणधरसार्धशतक (गा. ८०) बृहद्वृत्तौ सुमतिगणिः ।

तैरुक्तम्–' त्वदीयस्थाने पाषाणो धृतः '। **सो**मचन्द्रेणोक्तम्–" कश्चित् पाषाणः कश्चिन्नेत्यधुनैव ज्ञास्यते, यावती च **प**ञ्जिका भणिता, तावतीं मां पृच्छन्त्वेतानपि; यथार्थं यो न व्याख्यास्यति स एव पाषाणः "। आचार्येणोक्तम्–' भोः **सो**मचन्द्र ! त्वां प्रज्ञाऽऽदिसौरभगुणाढ्यं कस्तूरिकां जानाम्येव, परमेतैर्मूर्खैः प्रेरितोऽहं व्याख्यानेऽतः क्षन्तव्यं भवता। एवं **प**ञ्जिकां स पपाठ।

अशोकचन्द्राचार्येणोपस्थापना कृता। **ह**रिसिंहाचार्येण सर्वसिद्धान्तवाचना दत्ता पण्डित**सो**मचन्द्राय तथा मन्त्रपुस्तिका। यया सिद्धान्तवाचना स्वयं गृहीता सा कपलिका च भगवता तुष्टेन दत्ता। तथा **दे**वभद्राचार्येणापि तुष्टेन काष्ठोत्किरणं दत्तम्, येन **म**हावीरचरित–**पा**र्श्वचरितादीनि चत्वारि कथाशास्त्राणि पट्टिकायां लिखितानि। एवं च पण्डित**सो**मचन्द्रगणिर्ज्ञानी[ध्यानी]सैद्धान्तिकः सर्वजनमनोहारी श्रावकाणामानन्दकारी साध्वाचारेण ग्रामानुग्रामं विहरति।

जिनवल्लभसूरिपदे प्रतिष्ठा

इतश्च [श्री**दे**वभद्राचार्यैः श्रुतं **जि**नवल्लभसूरीणां देवलोकगमनम्] चिन्ता समुत्पन्नाऽतीव चित्तसन्तापो जातोऽहो ! सुगुरूणां पदमुद्योतितमभूत्, परं विघटितम्। पश्चाद्]**दे**वभद्राचार्याणामीदृशं चित्तं जातं यदि श्री**जि**नवल्लभसूरि–युगप्रधानपदं योग्यपदस्थापनेन नोद्धियते, तदा का भक्तिः ?। ततश्चिन्तितमाचार्यैरस्मिन् गच्छे कस्तत्पदयोग्य इति चिन्तयतां चित्ते पण्डित**सो**मचन्द्रगणिर्लग्नः। निश्चितमेष एव योग्यः श्रावकाणां ज्ञान-ध्यान-क्रियापरत्वेनानन्दकारी। पश्चात् सर्वसम्मते पण्डित**सो**मचन्द्राय लेखः प्रदत्तो यत् त्वया **चि**त्रकूटे

---

१ गणधरसार्धशतके (गा. ७७,७९,८१–८४,१४८) द्रष्टव्यम्। **अ**शोकचन्द्राचार्यस्य शिष्ये**णो**दयचन्द्रगणिना वि॰ सं॰ ११५४ वर्षे लेखितं ताडपत्रीय**मो**घयुर्निर्क्तिसूत्रं विद्यतेऽद्यापि **प**त्तनीयजैनभाण्डागारे। तत्रस्थश्चायमुल्लेखः—

" संवत् ११५४ वर्षे वैशाखशुक्लप्रतिपदायां रविदिने श्री**अ**शोकचंद्राचार्यशिष्येण **उ**दयचंद्रगणिना **जि**नभद्रलेखकहस्ताद् **वि**मलचंद्रगणिहस्ताच्च **ओ**घनिर्युक्तिसूत्रं लेखितं ॥ " P. P. ५,२९.

अनेनैवा**अ**शोकचन्द्राचार्येण **प्र**सन्नचन्द्र–**ह**रिसिंह–**दे**वभद्रादयः सूरिपदे प्रतिष्ठिता आसन्। यन्मध्याद् **दे**वभद्रसूरि**र्जि**नवल्लभ–**जि**नदत्तयोः सूरिपदप्रदाता बभूव। यदुक्तम्—' तेभ्यः श्री**दे**वभद्रसूरिभ्यः सूरिपदं आचार्यपदं दत्तं वितीर्णं कैरित्याह–**अ**शोकचन्द्रसूरिभिः श्री**जि**नचन्द्रसूरिप्रसादीकृताचार्यपदैः। तथा चैभिरेव प्रकरणकारिप्रभुभि**र्वि**शिकायामभ्यधायि यथा—

" अभिषेकवरसहोदर**स**हदेवगणेस्ततोऽभवच्छिष्यः। सूरि**स्त्व**शोकचन्द्रो **जि**नचन्द्राचार्यप्राप्तपदः ॥"

उक्तं च तत्रैव तैरेव यथा—

शीघ्रं समागन्तव्यम्, येन श्रीजिनवल्लभसूरिपदप्रतिष्ठायामपि नागतोऽभूः । बहवश्च तत्पदे स्थातुं लम्बकर्णा गौरवर्णाः श्रीपर्णपर्णाक्षाः साक्षादिव मकरध्वजा गूर्जरत्रासज्ञाताः संयता अभ्युद्यता आसन्, परं योग्यतां गुरव एव विदन्ति किं बहुना ? । देवभद्राचार्याः पण्डितसोमचन्द्रोऽन्येऽपि साधवश्चित्रकूटे समाजग्मुः । सर्वोऽपि लोको वेत्ति सामान्येन श्रीजिनवल्लभसूरिपदे सूरिपदस्थापनं भविष्यति, न ज्ञायते कश्चिदुपवेक्ष्यति । श्रीजिनवल्लभसूरिप्रतिष्ठिते साधारणसाधुकारिते श्रीमहावीरचैत्ये पदस्थापनं भविष्यति । ततः स्वपरिभावितलग्नदिनादर्वाग्दिने श्रीदेवभद्राचार्यैरेकान्ते भणितः पण्डितसोमचन्द्रगणिर्यदुतास्मिन् दिने युष्मदीयं पदस्थापनालग्नं परिभावितमस्ति । पं० सोमचन्द्रेणोक्तम्–' युष्माकं संग(म)तं तद् युक्तम्, परं यद्यस्मिँल्लग्ने स्थापयिष्यथ तदा न चिराय जीवितं भविष्यति । षण्णां दिनानामुपरि शनैश्चरवा[स]रे यल्लग्नं भविष्यति तत्रोपविष्टानां त्वस्माकं चतुर्दिक्षु विहरतां चतुर्विधः श्रीश्रमणसङ्घः श्रीजिनवल्लभसूरिवचने प्रभूतो भविष्यति चिरञ्जीवित्वं चै' । श्रीदेवभद्राचार्यैरुक्तम् ' एतदेव वयमपि गवेषयामहे, तदपि लग्नं न दूरे, तत्रैव भवतु' । ततस्तस्मिन्नेवं दिने श्रीजिनवल्लभसूरि[पदे विस्तरे]ण सन्ध्यासमये लग्नवेलायां संस्थापिताः श्रीजिनदत्तसूरिनामानो युगप्रवरास्ततो वादित्रैर्वाद्यमानैः समागता वसतौ । प्रतिक्रमणानन्तरं वन्दनकं दत्त्वा श्रीदेवभद्रसूरिभिर्भणितम्–' देशनां कुरुत' । ततः सिद्धान्तोक्तोदाहरणानुसारिहारिसुधासारणिकरणिगीर्वाणवाणीप्रबन्धेन तथा कृता पूज्यैः श्रीजिनदत्तसूरिभिर्देशना यथा 'ह्रस्वशरीरः श्यामवर्णोऽयं किमित्युप[वेश्यते ? किं न सन्त्यन्ये गौरवर्णा लम्बकर्णा विशाललोचना गच्छमध्ये साधवः ? ' इत्यादि कालुष्यमपहाय सर्वा प्रजा रञ्जिता सती भणति–' अहो ! सिंहा]नां पदे सिंह एवोपविष्टो विराजते । धन्याः श्रीदेवभद्राचार्या यैरीदृशं पात्ररत्नं परीक्षितम्, किमस्मादृशाः स्थूलमतयोऽन्तर्लक्षणानि जानन्ति ? ' ।

---

* " सूरिः प्रसन्नचन्द्रो हरिसिंहो देवभद्रसूरिरपि ।
सर्वेऽप्येते विहिता सूरिपदेऽशोकचन्द्रेण ॥ "
——गणधरसार्धशतक (गा. ८४) बृहद्वृत्तौ सुमतिगणिः ।

१ ' तथा च विंशिकायामप्येवमुक्तम्—
इतोऽप्यभयदेवाख्यसूरेः श्रीश्रुतसम्पदम् । समवाप्य ततो मत्वा चैत्यवासोऽस्ति पापकृत् ॥ १ ॥ '
श्रीमत्कूर्चपुरीयश्रीसूरिजिनेश्वरस्य शिष्येण । जिनवल्लभेन गणिना चैत्यनिवासः परित्यक्तः ॥ २ ॥
कृताङ्गिगणभद्रेण देवभद्रेण सूरिणा । श्रीचित्रकूटदुर्गेऽस्मिन् सोऽपि सूरिपदे कृतः ॥ ३ ॥ '
—ग. सा. श. (गा. ८४) बृहद्वृत्तौ सुमतिगणिः ।

२ अत्र विषये विशेषार्थिना खरतरगच्छपट्टावली निरीक्षणीया ।

३ ' सं. ११६९ वैशाखवदिषष्ठीदिने' इति ख. पट्टावल्यादौ ।

अन्यस्मिन् दिने विज्ञप्ताः श्रीजिनदत्तसूरयः श्रीदेवभद्राचार्यैर्यत् कतिपयदिनानन्तरं कतिचिद् दिनानि श्रीपत्तनाद् बहिर्विहर्तव्यम्। श्रीजिनदत्तसूरिभिरुक्तम्–'एवं विधास्यामः'। अपरदिने जिनशिखरेण साधुविषये किञ्चित् कलहादिकमयुक्तं कृतम् । ततो देवभद्राचार्यैर्गलके गृहीत्वा निष्कासितः । ततो यत्र श्रीजिनदत्तसूरयो बहिर्गच्छन्ति, तत्र गत्वा स्थितः । तत्र गतानां पूज्यानां पादयोर्लगित्वा दीनवागवादीत्–' प्रभो ! मदीयोऽयमन्याय एकवारं क्षन्तव्यः, न पुनः करिष्यामि ' । ततः कृपोदधयः श्रीजिनदत्तसूरयस्तं प्रवेशयामासुः । पश्चाद् देवभद्राचार्यैरुक्तम्–– 'युष्माभिर्न युक्तं कृतम्, एष दुरात्मा न भवतां सुखावहो भविष्यति । पामनोष्ट्रस्येवैतस्य बहिर्निष्कासनमेव श्रेयः ' । पूज्यैरुक्तम्––" श्रीजिनवल्लभसूरिपृष्ठे लग्नोऽयं यावदनुवर्तयितुं शक्यते तावदनुवर्त्यते " । श्रीदेवभद्राचार्यादयोऽन्यत्र विहारं चक्रुः, कालेन स्वःपदं सम्प्रापुरिति ।

औदार्यम्

[श्रीजिनदत्तसूरिभिरपि श्रीपत्तनाद् विजिहीर्षुभिः श्रीदेव–गुरुस्मरणार्थमुपवासत्रयं चक्रे । ततो देवलोकात् श्रीहरिसिंहाचार्य आगतः ' किमर्थं स्मृतोऽहम् ? ' इत्युवाच ।] श्रीजिनदत्तसूरिभिरुक्तम्–' कुत्र विहरामः?इति हेतुना ' ततो ' मरुस्थलादिषु विहर्तव्यम् ' इत्युपदेशं दत्त्वा गतोऽदर्शनं श्रीहरिसिंहाचार्यः । यावत् तत्रैव तिष्ठन्ति पूज्या लब्धोपदेशास्तावन्मरुस्थलीवास्तव्या मेहर–भोस्व(प)र–वासल–भरतादयः श्रावका व्यवहारेण तत्र सम्प्राप्ताः । ततः श्रीजिनदत्तसूरिगुरुं दृष्ट्वा वचनं च श्रुत्वाऽतीव तुष्टाः श्रीजिनदत्तसूरीन् गुरुत्वेन प्रतिपन्नाः । भरतः सुगुरुपार्श्वे वाचकत्वेन स्थितः, अन्ये तु मेहर–भोस्व(प)रादयः स्वस्थाने गताः स्वकुटुम्बाग्रतः प्रभुवर्णनं कुर्वन्ति–' एवंविधाः शुद्धचारित्रिणः श्रीजिनदत्तसूरयः ' इत्यादि । एवं तत्र देशे प्रवेशो जातः ।

मरुस्थलादिषु विचरणम्

ततो नागपुरे विहृताः । तत्र श्रावकधनदेवः श्रेष्ठी प्रतिपत्तिं करोति । [श्रुत्वाऽऽयतनानायतनादिविचारं भाणितं धनदेवेन–' भो आचार्य ! यदि मद्भाणितं करोषि, तदा सर्वोऽपि श्रावकवर्गस्त्वत्पृष्ठलग्नः परिवारभूतो भवति । '] पूज्यैः किलाजानानैरिवाभिहितम्––" धनदेवश्रेष्ठिन् ! किं तत् ? " धनदेव उवाच–

नागपुरे संवादः

" आयतनमनायतनं विधिमविधिं चैव सर्वविषयेऽपि ।
नो चेत् कथयसि लगयामि मेदिनीं तव(तदा) पृष्ठे ॥ "

तदाकर्ण्योक्तं श्रीपूज्यैः—

" धनदेव ! तावकीनं वचनं कुर्मोऽथवा नु तीर्थकृताम् ? ।
यदनायतनं सूत्रे भाणितं तद् ब्रूमहे नियतम् ॥ १ ॥
उत्सूत्रभाषणात् पुनरनन्तसंसार[कार]णाद् बहुशः ।
किं लोकेन त्वयोगिणो भवेत् प्रचुरो मक्षिकासङ्घः ॥ २ ॥
किञ्च--मैवं मंस्था बहुपरिकरो जनो जगति पूज्यतां याति ।
येन [बहु]तनययुक्ताऽपि शूकरी गूथमश्नाति ॥ ३ ॥ "

तद् वचनमतीव कर्णकटुकं दुःखदमभूद् धनदेवस्य । भवतु, तथापि गुरुणा युक्तमेव वक्तव्यम् । यतः—

" रूसउ वा परो मा वा विसं वा परियत्तउ ।
भासियव्वा हिया भासा सपक्खगुणकारिया ॥ "

इति सिद्धान्तप्रामाण्यात् केषाञ्चिद् विवेकिनां [पुन]स्तद् वचनं रुचितम् । ततो नागपुरादजयमेरौ विहृताः । तत्र च ठ० आसधर–साधु (साधारण)–

अजयमेरौ देवगृहादि, अर्णोराज-समागमः

रासलप्रभृतिश्रावकाः सन्ति । श्रीजिनदत्तसूरयो देववन्दनार्थं बाहडदेवगृहे गच्छन्ति । अन्यदा तत्राद्य आचार्य आगतः । स च पर्यायेण लघुरपि चैत्ये देववन्दनार्थं गतानां गुरूणां व्यवहारं नाकरोत् । ततः ठक्कुराशाधरप्रभृतिश्रावकैरुक्तम्–' किमत्र गच्छतां फलम् ? , यदि युक्तं न प्रवर्तते ' । ततो वन्दनादिव्यवहारो निवृत्तः । ततः श्रावकैर्विज्ञप्तोऽर्णोराजः—' देवास्माकं श्रीजिनदत्तसूरयो गुरवः समागताः सन्ति ' । राज्ञोक्तम्–" भद्रम्, यथाऽऽगताः कार्यं कथयत " । श्रावकैरुक्तम्-' देव ! भूमिखण्डमेकमवलोक्यते, यत्र देवगृहादिधर्मस्थानानि श्रावकाणां स्वकुटुम्बसदनानि च सम्पाद्यन्ते ' । पश्चादर्णोराजेनोक्तम्—" दक्षिणदिग्भागे यः पर्वतस्तस्मिन् स्थ(भूत)ले यद् देवगृहादिकं रोचते, तन्निःशङ्कं कुरुत, आत्मीयगुरवश्च मम दर्शनीयाः ' । एतत् स्वरूपं प्रभूणामग्रे श्रावका अचीकथन् । प्रभुभिः परिभाव्य भाषितम्–" भो ! य एवमस्मद्दर्शनोत्कण्ठितो नरेन्द्रस्तस्मिन्नाकारिते गुण एव स्यात् " । ततो गुरुवचनमनुकूलयद्भिः श्रावकैर्भव्यवासरे समाहूतोऽर्णोराज आगतः । क्षिप्रमेव नमस्कृताः श्रीजिनदत्तसूरयः । अभिनन्दित आशीर्वादेन प्रभुभिः । तथा चाशीर्वादः—

" विश्व[विश्व]विनिर्माण–स्थिति–प्रलयहेतवः ।
सन्तु राजेन्द्र ! भूत्यै ते ब्रह्म-श्रीपति-शङ्कराः ॥ १ ॥

---

१ रुष्यतु वा परो मा वा विषं वा परिवर्तताम् । भाषितव्या हिता भाषा स्वपक्षगुणकारिका ॥

तथा—नीतिश्चित्ते वसति नितरां लब्धविश्रान्तिरुच्चैः
श्रीरस्याङ्गे भुजयुगलमप्याश्रिता विक्रमश्रीः ।
एषोऽत्यर्थं क्षिपति बहुभिर्लोकवाक्यैः प्रियो मा-
मित्यर्णोराड् ! भ्रमति भुवनं कीर्तिरस्ताश्रया ते ॥ " इत्यादि ।

सद्गुरुमुखकमलविनिर्गतभारतीमाकर्ण्य तुष्टो राजा बभाषे—' सदैवात्र तिष्ठन्तु सुगुरवः ' । गुरुभिरुक्तम्—" युक्तमुक्तं महाराजेन परमस्मदीया स्थितिरेषा यत् सर्वत्र विहारक्रमः क्रियते लोकोपकाराय । अत्र पुनः पुनरागमिष्यामो यथा युष्माकं समाधानं भविष्यति तथा विधास्यामः ' । ततः समाधानेनोत्थितो राजा ।

ततः ठक्कुर आशाधरो भणितः पूज्यैर्यथा—
" इदमन्तरमुपकृतये प्रकृतिचला यावदास्ति सम्पादियम् ।
विपदि नियतोदयायां पुनरुपकर्तुं कुतोऽवसरः ? ॥ "

अतः स्तम्भनक-शत्रुञ्जयोज्जयन्तकल्पनया पार्श्वनाथ-ऋषभनाथ-नेमिनाथबिम्बस्थानानि परिभावनीयानि । उपर्यम्बिकादेवकुलिका तले च गणधरादिस्थानं चिन्तनीयम् " । इत्यभिधाय श्रीपूज्यैर्वाग्ग(ग्ज)डदेशे सुशकुनेन कृतो विहारः ॥

वाग्जडदेशे विहारः

तत्रत्यलोकाश्च [श्रीजिनवल्लभसूरिविषये प्रागेव समाहितचेतसोऽभूवन्, तन्नामग्रहणेऽपि नमनशीलास्तेषां देवलोकगमनवार्तामाकर्ण्य तेषां पदे ये संस्थापितास्ते 'ज्ञान—ध्यानगुणोपेताः] श्रीमहावीरवदनारविन्दविनिर्गतार्थ श्रीसुधर्मस्वामिगणधररचितसिद्धान्तवेदिनः श्रीजिनदत्तसूरिनामानः सुगुरवो युगप्रधानास्तीर्थकरकल्पा अत्रास्मद्देशे विहृताः सन्ति ' इति चोपश्रुत्य हृष्टा दर्शनोत्काण्ठितास्तत्पादाम्भोजवन्दनार्थमायाताः । ततः श्रीपूज्यदेशनां श्रुत्वा दृष्ट्वा च सौम्यतामत्यन्तमानन्दिताः सञ्जाताः । यद् यत् ते श्रावकाः पृच्छन्ति, तत् तत् कथयन्तः केवलिन इव श्रीजिनदत्तसूरयस्तेषां मनःसमाधानमुत्पादयन्ति । केचन सम्यक्त्वं केचन देशविरतिं केचन सर्वविरतिं तुष्टाः सन्तस्ते गृह्णन्ति । एवं च पूज्यैस्तत्र व्रतिनो बहवः कृता व्रतिन्यश्च तस्मिन् प्रस्तावे द्विपञ्चाशत् कृताः श्रूयन्ते । तस्मिन्नेव प्रस्तावे जिनशेखरमुपाध्यायं कृत्वा कतिचित्साधुसहितं रुद्रपल्ल्यां विहारक्रमेण प्रेषयाञ्चक्रुः । स च तपः करोति, स्वजनास्तत्र सन्तीति तेषां समाधानहेतोः ।

जयदेवाचार्यस्य सम्प्राप्तिः

तथेदं स्वरूपं जयदेवाचार्यैः स्वस्थानस्थितैः श्रुतं यत्—'श्रीजिनवल्लभसूरिपदे [प्रतिष्ठिताः] श्रीजिनदत्तसूरयः सर्वगुणोपेता अत्र देशे विहारेणायाताः' इति । ततश्चिन्तितं तैः—'शोभनं सञ्जातं श्रीजिनवल्लभगणेश्चैत्यवासपरिहारेण श्रीअभयदेवसूरिपार्श्वे वसतिवासप्रतिपत्तिं कृतां श्रुत्वा प्रागेवास्माकं वसतिवासाभिप्राय उत्पन्न आसीद्, इदानीं गत्वा दृश्यन्ते ते

सुगुरवः '। ततस्ते सपरिवारा वन्दनार्थं समागता [वन्दिताः] सविनयं श्रीजिनदत्तसूरयः। तैश्च तथा सम्भापिताः सिद्धान्तमधुरवचनैर्यथैवं परिणामोऽभूद् यदुत—' एत एव भवे भवेऽस्माकं गुरवो भूयासुः '। पश्चाद् भव्यदिने उपसम्पदं गृहीतवन्तः श्रीजयदेवाचार्याः पश्चान्नावलोकितं सनत्कुमारचक्रवर्तिवत्।

जिनप्रभाचार्यस्य चैत्यवासत्यागः

तथा श्रीजिनप्रभाचार्याः केवलिकापरिज्ञानेन सर्वजनप्रासिद्धास्ते च तुरुष्क [भूम्यां गताः केनचित्] नायकेन ज्ञानिनो ज्ञात्वा पृष्टा यथा—' मदीयहस्ते किमस्ति ? '। आचार्यैर्गणयित्वा कथितम्—' वदामः, खटिकाखण्डं वालश्च '। स च वालं न जानाति, ततस्तेन विस्मितेन दार्शितो हस्तो यावद् वालोऽपि खटिकायां लग्नोऽस्ति। तुरुष्काधिपस्तुष्ट आचार्यहस्तं गृहीत्वा चुम्बितवान्, ' चंगा चंगा ' इत्युक्तवांश्च। आचार्येण ज्ञातम्—' एप मामात्मना सह नेष्यति। दुष्टाभिसन्धयश्चैते कदाचिदनर्थमपि कञ्चन मम सम्पादयिष्यन्ति ' इति रात्रौ प्रपलाय्य स्वदेशे गतः। तत्रागतो जयदेवाचार्यं वसतिमार्गप्रतिपत्तारं श्रीजिनदत्तसूरिपार्श्वे श्रुत्वा तस्याप्यभिप्राय उत्पन्नोऽहमपि चैत्यवासं परित्यजामि, परमतीव गाढो मार्ग एतेषां श्रूयते। ' यदि काश्चित् सुकुमारतरो धर्ममार्गः स्याद् ' इति केवलिकापरिज्ञानेन चिन्तयति यावत् प्रथमवेलायां श्रीजिनदत्तसूरय इति नामागतम्। ततश्चिन्तितम्—' मा कथञ्चिदङ्कव्यत्ययो जातो भविष्यति ' द्वितीयवेलायां गणयति यावत् तथैव श्रीजिनदत्तसूरय इति नामागच्छति। पुनर्निश्चयाय यावत् तृतीयवेलायामपि गणयितुमारब्धः, ततोऽग्निपुञ्जो गगनात् पतित आकाशे वाणी चोत्थिता—" यदि शुद्धमार्गेण तव प्रयोजनम्, तत् किमिति बहुधा गण [यसि ?। अ] यमेव संसारनिस्तारकः शुद्धमार्गप्ररूपकः सुगुरुः " इति। ततोऽसौ निःसन्देहः सन् श्रीजिनदत्तसूरिपार्श्वे समागतः। ततो ज्ञानादित्येन भणितः—' तव चूडामणिपरिज्ञानमस्मत्समीपे न परिस्फुरिष्यति '। तेनोक्तम्—' मा स्फुरतु, मम विधिमार्गेण प्रयोजनम् ' इत्युक्ते दत्ता तस्य स्वकीयोपसम्पत्तिः। ततः सु(स)गुर्वाज्ञया विजहार।

विशिष्टः शिष्यादिपरिवारः

तथा तत्रैव स्थितानां श्रीजिनदत्तसरीणामतिशयज्ञानिनां पार्श्वे विमलचन्द्रगणिर्नाम चैत्यवासी जयदेवाचार्य—जिनप्रभाचार्ययोर्वसतिनिवासप्रति [पत्तिं श्रुत्वा वसति] मार्गमङ्गीचकार। तथा तस्मिन्नेव प्रस्तावे जिनरक्षित—शीलभद्रौ मात्रा सह प्रव्रजितौ, तथा स्थिरचन्द्र—वरदत्तनामानौ भ्रातरौ प्रव्रजितौ।

तथा जयदत्तनामा मुनिर्मन्त्रवादी बभूव। तस्य च पूर्वजा मन्त्रशक्तियुक्ता आसंस्ते च सर्वेऽपि रुष्टया दुःसाधितदुष्टदेवतया विनाशिताः। एप पुनर्नष्टः

श्री**जि**नदत्तसूरिणां शरणं गतो व्रतं जग्राह । ततः श्रीपूज्यैः शक्तिनिधानैः करुणा-निधानैर्दुष्टदेवतातो रक्षितः ।

तथा **गु**णचन्द्रगणिर्नाम यतिः सोऽपि **जि**नदत्तसूरिभिर्दीक्षितः । स हि पूर्वं श्रावकः सन् तुरुष्कैर्हस्तदर्शनेन ' चङ्गो भाण्डागारिको भविष्यति ' इति ज्ञात्वा नाशनभयाच्छृङ्खलया दृढं निबद्धः । तेन च भावनया नमस्कारलक्षं गुणितम् । तत्प्रभावाच्छृङ्खला स्वयमेव त्रुटिता । ततोऽलक्षितो निःसृत्य रजनीपश्चिमार्धे कस्याश्चिद् वृद्धाया गृहे प्रविष्टः । तया च कृपया कोष्ठिकामध्ये प्रक्षिप्तः । तुरुष्कैः प्रेक्षितो न लब्धः, ततो रात्रौ निर्गत्य स्वदेशे गतः । एवं च तेन जातसंवेगेन प्रभूणां पार्श्वे-वृत्तं(व्रतं) गृहीतमिति ।

तथा **रा**मचन्द्रगणि**र्जी**वानन्दपुत्रसहितोऽन्यगच्छाद् भव्यं धर्मं ज्ञात्वा श्री**जि**न-दत्तसूरीणामाज्ञां प्रतिपन्नः । तथा **ब्र**ह्मचन्द्रगणिर्व्रतमाददे ।

एतेषां मध्या**ज्जि**नरक्षित—**शी**लभद्र—**स्थि**रचन्द्र—**व**रदत्तप्रभृतिसाधवस्तथा **श्री**मति—**जि**नमति—**पू**र्णश्रीप्रभृतयः साध्व्यश्च वृत्ति—पञ्जिका—टीकाऽऽदिल-क्षणशास्त्रभणनार्थं श्री**धा**रायां प्रेषिताः । तैश्च तत् सर्वं भणितं भक्तिमन्महर्द्धिक-श्रावकसाहाय्येन ।

रुद्रपल्ल्यां विहारः

आत्मना श्री**जि**नदत्तसूरयो रुद्रपल्ल्यां विहृताः । तत्र च पथि गच्छतामेकस्मिन् ग्रामे श्रावक एकः प्रतिदिनं व्यन्तरेण प्रचण्डेन पीड्यते । तस्य च पुण्येन श्री**जि**नदत्तसूरयस्तत्रैव ग्रामे उत्तीर्णाः । तेन श्रावकेण विज्ञप्तं शरीरस्वरूपम् । परिभावितं श्रीपूज्यैर्यदुत -' एष मन्त्र-तन्त्राणामसाध्यो व्यन्तरः । ततो **गणधरसप्ततिकां** कृत्वा टिप्पनके लेखयित्वा तस्य व्यन्तरगृहीतस्य श्रावकस्य हस्ते टिप्पनकं दत्तम्, भणितश्च दृष्टिश्चात्र निवेशनीया । तेन च तथा कृतं यावदसौ व्यन्तरो गाढतरं पीडया समागतः खट्वासीमाम्, शरीरे न सङ्क्रान्तो **गणधरसप्ततिका**हृदयनिवेशनदर्शनप्रभावात् । द्वितीयदिने द्वारसीमां यावत् समागतः । तृतीयदिने त्वागत एव न । श्रावकस्तु सुस्थो जातः, किं बहुना ? ।

रुद्रपल्ल्यां सम्प्राप्ताः । **जि**नशेखरोपाध्यायाः श्रावकैः साहिताः सम्मुखमागताः, विस्तरेण मध्ये प्रविष्टाः । विंशोत्तरं शतं कुटुम्बानां तत्र श्री**जि**नवल्लभसूरिवचनव्यव-

---

१ **जे**सलमेरुदुर्गीय**चि**न्तामणिपार्श्वजिनालयान्तःस्थायाः प्रतिमाया अधोवर्तीत्थं पठ्यते लेखः—' संवत् ११४७ वर्षे श्री**ख**रतरगच्छेश**श्रीजि**नशेखरसूरिभिः श्री**ऋ**षभबिम्बं कारापितं ॥ ' इत्यत्र समय—गच्छ—सूरिपदानि चिन्त्यानि ।

स्थितं कारितम्। श्रीऋषभनाथ–श्रीपार्श्वनाथचैत्यद्वयं प्रतिष्ठितम्। केचित् सम्यक्त्वधारिणः, केचिद् देशविरतिग्राहिणः श्रावका बभूवुः। केचित् सर्वविरतिमग्रहीषुर्देवपालगणिप्रभृतयः। एवं तेषां समाधानमुत्पाद्यात्र जयदेवाचार्यं प्रेषयिष्याम इति भणित्वा पुनः पश्चिमदेशे विहृताः।

वाग्जडदेशे चर्चरी–रचना

ततो वाग(ग्ज)डदेशे समायाता व्याघ्रपुरे। तत्र स्थितैः श्रीजयदेवाचार्याः शिक्षां दत्त्वा रुद्रपल्यां प्रेषिताः। तत्र स्थितैरेव श्रीजिनवल्लभसूरिप्ररूपितश्रीचैत्यगृहविधिस्वरूपा चच्च(र्च)री कृता। सा च टिप्पनके लेखयित्वा प्रेषिता मेहर–वासलप्रभृतिश्रावकाणां ज्ञानार्थं विक्रमपुरे। देवधरसत्कसण्हियाभिधानजनकगृहसमीपे पौषधशालाऽस्ति। तस्यामुपविश्य श्रीजिनदत्तसूरिभक्तश्रावकैः[रुच्छोटितं चच्च(र्च)री]टिप्पनकम्। अत्रान्तरे मदोन्मत्तेन देवधरेणागत्य चच्च(र्च)रीटिप्पनकमिति भणित्वा हस्तादुद्दाल्य द्विधा कृतं तच्चच्च(र्च)रीटिप्पनकम्। तस्य च किमपि कर्तुं] न शक्यते उन्मत्तत्वादेव। तत्पितुरग्रे कथिता वार्ता। तेनोक्तम्–'बाढं दुर्दान्त एष, तथापि वारयिष्यामः'। पुनरपि पूज्येभ्यो दत्ता श्रावकैर्विज्ञप्तिका। तदन्तर्लिखितं चच्च(र्च)रीटिप्पनकपाटनस्वरूपम्। पूज्यैरपि लेखा[र्थ]मवधार्य पुनर्लेखयित्वा द्वितीयटिप्पनकं चच्च(र्च)र्याः प्रेषितम्, लेखश्च प्रेषितः। इदं च लिखितम्–देवधरस्योपरि विरूपकं केनापि न भणनीयम्, देव-गुरुप्रसादादेष भव्यो भविष्यति। तच्च द्वितीयटिप्पनकं प्राप्तं सत् प्रणिपत्य श्रावकैरुच्छोटितं समाधानं जातम्। देवधरेण पुनश्चिन्तितम्–यद्यपि मया टिप्पनकं पाटितम्, तथाप्याचार्यैः पुनरपि प्रेषितम्, अत्र कारणेन केनापि भवितव्यम्। तत् प्रच्छन्नं परिभावयाम्येकान्ते किं तत्र लिखितमास्ते(मास्ति)?'। ततो यदा श्रावकाः टिप्पनकं स्थापनाचार्यालये मुक्त्वा द्वारं स्थगयित्वा गतास्तदा स्वगृहादुपरि चा(वा)टकेन प्रविश्य बहिर्द्वारे स्थगितेऽपि टिप्पनकं गृहीतं वाचयितुं च प्रवृत्तः। ततो यथा यथा—

" जहि उस्सुत्तजणक्कमु कु वि किर लोयणिहि
कीरंतउ नवि दीसइ सुविहिपलोयणिहि।
निसि न ण्हाणु न पइट्ठ न [साहुहि] साहुणिहि
निसि जुवइहिं पवेसु न नट्ठु विलासिणिहि ॥ [का. १६]
बलि अत्थमियइ दिणयरि जहि नवि जिणपुरओ
दीसइ धरिउ न सुत्तइ जहि जणि तूररओ। [का. १८]
जहि रयणिहि रहममणु कयाइ न कारियइ
लउडारसु जहि पुरिसु वि दिंतउ वारियइ ॥ [का. १९]

जहि सावय तंबोलु न भक्खहि लिंति न य
जहि पाणहिय धरिंति न सावय सुद्धनय।
जहि भोयणु नवि सयणु न अणुचिउ बइसणउ
सहु पहरणि न पवेसु न दुट्ठउ बुल्लणउ ॥ [का. २१]
जहि न हासु नवि हुड्ड [न खिड्ड] न रूसणउ
कित्ति[नि]मित्तु न दिज्जइ जहि धणु अप्पणउ।
करहि जि बहु आसायण जहि ति न मेलियहि
मिलिय ति केलि करिंति समाणु महेलियहि ॥ [का. २२][1] इत्यादि।

तदर्थमवधारयति तथा तथा मनसि प्रमोद उत्पद्यते। अहो! अत्यन्तं शोभनो जिनभवनविधिः। एतदनुसारेण स्थालीपुलाकन्यायेनान्यदपि सर्वं शोभनं सम्भाव्यते। अतोऽत्र मार्गे मया प्रतिपत्तिः कर्तव्या, 'केवलं बिम्बमनायतनं स्त्रीः पूजां न करोति' एतत् सन्देहद्वयं प्रच्छनीयमस्ति' इति विचिन्त्य टिप्पनकं तथैव धृत्वा सन्मार्गविहितचेताः स्वगृहमागतो देवधरः।

शिष्यादिभ्यः पद-प्रदानम्

इतश्च वागडदेशे स्थितैः श्रीपूज्यैरपि ये धारायां प्रेषिता आसंस्ते सर्वेऽप्यानायिताः सिद्धान्तं श्राविताः। ततः स्वदीक्षितो जीवदेवनामाऽऽचार्यपदे संस्थापितः। तथा दश वाचनाऽऽचार्याः कृतास्तद्यथा वा० पं० जिनरक्षितः १, वा० पं० शीलभद्रगणिः २, वा० पं० स्थिरचन्द्रगणिः ३, वा० पं० ब्रह्मचन्द्रगणिः ४, वा० पं० विमलचन्द्रगणिः ५, वा० वरदत्तगणिः ६, वा० भुवनचन्द्रगणिः ७, वा० वरणागगणिः ८, वा० रामचन्द्रगणिः ९, वा० माणिभद्रगणिश्चेति १० दश।

तथा पञ्च महत्तराः कृतास्तथाहि–श्रीमतिमहत्तरा १, जिनमतिमहत्तरा २, पूर्णश्रीमहत्तरा ३, जिनश्रीमहत्तरा ४, ज्ञानश्रीमहत्तरा ५ [चेति]।

तथा हरिसिंहाचार्याणां शिष्यो मुनिचन्द्राभिध उपाध्याय आसीत्, तेन च जिनदत्तसूरिः प्रार्थितोऽभूद्–'यदि कश्चिन्मदीयशिष्यो योग्यो भवतां समीपे समागच्छति तदा तस्याचार्यपदं दातव्यमेव'इति प्रतिपन्नं प्रभुभिः। ततस्तस्य मुनिचन्द्रोपाध्यायस्य शिष्यो जयसिंहनामा मुनीन्द्रपदे निवेशितः। तस्यापि शिष्यो जयचन्द्रनामा पत्तने समवसरणे सूरिपदे स्थापितः। द्वयोरप्यग्रे भणितं यथा 'युष्माभिरस्मदुक्तरीत्या प्रवर्तितव्यमिति'।

---

१ परि० ४ पृ. ११२ प्रान्ते द्रष्टव्यम्।

एवं पदस्थान् कृत्वा ते[षां] शिक्षां दत्त्वा सर्वेषां विहारादिस्थानानि भणित्वा स्वयम-
जयमेरौ विहृताः श्रीपूज्याः । तत्र च श्रावकैश्चैत्यगृहत्रयाम्बिकाऽऽदि-
अजयमेरौ चैत्यगृहत्रय–प्रतिष्ठा स्थानानि पर्वतप्रगुणीकृतानि सन्ति । ततः श्रीजिनदत्तसूरिभिः
शोभनलग्ने मूलनिवेशे जिनमन्दिरेषु प्रचिक्षिपिरे वासाः । ततः शिख-
रादिनिवेशं कारयामासुः श्रावकाः ।

इतश्च श्रीविक्रमपुरे सण्हियापुत्रदेवधरेण श्रीजिनदत्तसूरिप्रेषितचच्च(र्चे)रीटिप्पनक-
चर्चरी–प्रभावः विक्रमपुरे विहारः दर्शनोन्मीलितसद्दर्शनकारिविधिबोधेन पञ्चदशस्वकुटुम्बश्रावकसमुदायं
कृत्वा स्वजनकश्रे० आसदेवादयो भणिताः श्रावकाः–'भोः ! मयाऽत्र श्रीजिनदत्तसूरयो विहारं कारयितव्याः' । तस्य चाग्रे कोऽपि किमपि भणितुं न शक्नोति । श्राद्धसमुदायेन निर्गतो नागपुरे सम्प्राप्तः । तदानीं च तत्र देवाचार्यो विशे-
षेण प्रसिद्धिपात्रं वर्तते । देवधरोऽपि विक्रमपुरादाग(दग्र)तः प्रसिद्धोऽस्ति जातः श्रुतस्तेन । पश्चाद् देवगृहे व्याख्यानप्रस्तावे देवाचार्य उपविष्ट आस्ते । देवधरोऽपि पादप्रक्षालनादिशौचं कृत्वा देवगृहं गतः। देववन्दनादि कृत्वा वन्दितो देवाचार्यः,तेनापि पृष्टा क्षेमवार्ता । ततः प्रथमत एव देवधरेण पृष्ट आचार्यः–'भगवन् ! [देवगृहे] रात्रौ स्त्रीप्रवेश–प्रतिष्ठा–बलिविधान–
नन्द्यादिकंयुज्यते नवा ?' । तच्छ्रुत्वा देवाचार्यश्चिन्तयति–'निश्चितं कथंचिज्जिनदत्ताचार्य मन्त्रोऽस्यकर्णे प्रविष्टोऽतस्तद्वासित इव लक्ष्यते' इति विचिन्त्योक्तम्–"श्रावक ! रात्रिस्त्री-
प्रवेशादिकं सङ्गतं न भवति । देवधरः––तर्हि किं न वार्यते ? । आचार्यः––लक्षसङ्ख्य-
लोकानां मध्ये को वार्यते ? । देवधरः––भगवन् ! यत्र देवगृहे जिनाज्ञा न प्रवर्तते, किं तर्हि जिनाज्ञानिरपेक्षः स्वेच्छया जनो वर्तते तज्जिनगृहं [जन]गृहं वा प्रोच्यते ? इति प्रतिपादयध्वं यूयम् । आचार्यः––यत्र साक्षाज्जिनोऽन्तर्निविष्टो दृश्यते, तत् कथं जिनम-
न्दिरं नोच्यते ? । देवधरः––आचार्य ! वयं तावन्मूर्खाः परमेतद् वयमपि जानीमो यदुत यत्र यस्याज्ञा न वर्तते, तद् गृहं तदीयं नोच्यते । एवं च पाषाणरूपार्हद्बिम्बमा-
त्रान्तर्निवेशनेन भगवदाज्ञापरिहारेण स्वेच्छया व्यवहारे कथं नाम तज्जिनमन्दिरमुच्यते ? परमेवं जानाना अपि यूयं प्रवाहमार्गं न निवारयध्वे, प्रत्युत पोषयध्वे तदेते वन्दिता अनुज्ञापिताश्च मया यूयम्––'यत्र तीर्थकराज्ञा प्रवर्तते, स मार्गो मयाऽभ्युपेतव्यः' इत्यभिधायोत्थितो देवधरः । सहानीतस्वकुटुम्बरूपश्रावकाणां जातं स्थिरीकरणं **विधि-
मार्ग**विषये । प्राप्तः श्रावकसमुदायसहितोऽजयमेरौ । वन्दिता भावसारं श्रीजिनदत्त-
सूरयः । तदभिप्रायावगमपूर्वकं कृता पूज्यैर्देशना जातोऽसौ निःसन्देहः । अभ्यर्थिताः प्रभवः श्रीविक्रमपुरविहारं प्रति । ततो विस्तरेण तत्र देवगृह–बिम्बाम्बिका–गणधरादि-
प्रतिष्ठां विधाय समागता देवधरेण सह श्रीविक्रमपुरे । प्रबोधितस्तत्रत्यो जनो बहुः । स्थापिता श्रीमहावीरप्रतिमा ।

तत उच्चायां गच्छतामन्तरे ये भूतादयस्तेऽपि प्रतिबोधिताः, किं पुनरुच्चकी-

प्रतिबोध-विचक्षणता

यलोकः ? । ततो नगरे विहृताः । ततस्त्रिभुवनगिरौ प्रतिबोधितस्तत्र कुमारपालो नाम राजा । कृतस्तत्र प्रचुरतरयतिजनविहारः । प्रतिष्ठितो भगवान् शान्तिनाथदेवः । तथोज्जयिन्या विहारेण प्रतिबोधितं पूज्यैर्योगिनीचक्रम् ।

तथैकदा श्रीचित्रकूटप्रवेशके दुष्टैरपशकुनाय सम्मुखीकृतो रश्मिबद्धः कृष्ण-भुजङ्गमः । ततो मन्दीभूतानि गीत-वादित्रादीनि । श्रावका अप्यहो ! न सुन्दरमिति जाताः सविषादाः । ततः प्रोक्तं ज्ञानदिवाकरैः श्रीजिनदत्तसूरिभिः-'भोः ! किमेवं विमनस्का यूयम् ? । यथैष कृष्णभुजङ्गो रज्जुबद्ध एवमन्येऽपि ये केचनास्मद्दुष्टास्तेषां बन्धनं पतिष्यतीति प्रेरयतातीव सुन्दरं शकुनमेतत्' । पुनरग्रतो गच्छतां दुष्टैरेका कृत्तनासिका दुर्निमित्तविधानाय प्रेषिता । सा चाग्रतः स्थिता दृष्टा पूज्यपादैर्जल्पिता च यथा—'आई ! भल्ली ?' ततस्तया दुष्टरण्डया दत्तं प्रतिवचः-'भल्लइ धाणुक्कइ मुक्की ।' पुनरुक्ता किञ्चिद् विहस्य सप्रतिभैः पूज्यैर्यथा-"पक्खाहरा तेण तुह छिन्ना" ततः सा गेय्य(गया) विलक्ख उत्तरानिक्खुट्टी (? गता विलक्षा निरुत्तरा)

इत्यनेकाश्चर्यनिधानानां निरन्तरं किङ्करैरिव सुरैः सर्वदोपास्यमानपादानां

उपसंहारः

करुणासमुद्राणां धारापुरी-गणपद्रादिस्थानेषु प्रतिष्ठितवीर-पार्श्व-शान्त्यजिततीर्थकृद्बिम्ब-देवगृहशिखराणां स्वज्ञानबलदृष्टनिजपट्टोद्धार-कारिरासलाङ्कुरुहाणां भास्करवद् विबोधितभुवनमण्डलभव्याम्भोरुहाणामेतच्छास्त्रकाराणां श्रीजिनदत्तसूरीणां चरितलेशः प्रतिपादितः ॥"

समनुवदन्ति समर्थयन्ति च सुमतिगणिसङ्कलितमेतच्चरितमेतदनुयायिनश्चारित्रसिंह-

जिनदत्तसूरिप्रशंसकाः

गणि-सर्वराजगणिप्रभृतयः पूर्वोक्तगणधरसार्धशतकवृत्तिप्रोद्धारकाः । तथा चान्ये प्रशंसुस्तत्परम्पराप्रविष्टाः प्रतिष्ठिताः प्रसिद्धाः प्राज्ञाः । तथा हि वि० सं० १३०७ वर्षे पूर्णकलशगणिः—

" तत्पट्टे जिनदत्तयोगितिलकः सन्मार्गपद्मार्यमा "

—प्राकृतद्वयाश्रयवृत्तौ (प्रश० श्लो० २)

वि. सं. १३१२ वर्षेऽभयतिलकगणिः—

" तत्पट्टाम्बरसूरडम्बरधरः कृष्णद्युतिर्दैवतैः
सेव्यः श्रीजिनदत्तसूरिरिबिभः प्राच्यां युगाग्रीयताम् ।

केनाप्यस्खलितप्रतापगरुडो यस्य त्रिलोक्यां स्फुरं–
स्त्रोटं त्रोटमपास्यति श्रितवतां विघ्नाहिपाशान् क्षणात् ॥"
—संस्कृतद्व्याश्रयवृत्तौ (प्रश० श्लो० ५

" आसीत् पदेऽस्य **जिनदत्त**गुरुर्भटेन
येनादधे **विधिपथः** सुवहः खिलोऽपि । "
—न्यायालङ्कारप्रान्ते ।

वि. सं. १३१२ वर्षे चन्द्रतिलकोपाध्यायः—

" ततोऽजनि श्री**जिनदत्तसूरि**र्येनेह कल्याणमदायि भूरि ।
यः **पा**रतन्त्र्यं **वि**षयं **वि**धिं च प्रकाशयामास विशेषतोऽपि ॥
भव्यान् सार्धं कुटुम्बैः शतश उपकृतौ कर्मठोऽबोधयद् यो
यस्याज्ञामत्र देवा अपि शिरसि दधुर्भक्तिभारेण नम्राः ।
यन्नामामानधामाधरितसुरवर–क्षोणिजन्माभिमानं
स्मर्तुं बद्धादराणां दलयति विपदोऽद्यापि दत्ते च भद्रम् ॥ "
—अभयकुमारचरिते (प्रश० श्लो० १२–१३)

वि. सं. १३१७ वर्षे लक्ष्मीतिलकगणिः—

" चिन्तामणिः कल्पतरुर्वराकौ कुर्वन्ति भव्याः किमु कामगव्या ?।
प्रसीदतु श्री**जिनदत्तसूरिः** सर्वे पदा हास्तिपदे प्रविष्टाः ॥ "
" तत्पट्टे **जिनदत्तसूरि**रुदगाद् यः सन्ततं दैवतैः
सेव्यांहिर्भृशमद्भुतैरतिशयैस्तैस्तैः सदाऽलङ्कृतः ।
आख्यातोऽम्बिकया स्वयं युगवरस्तीर्थङ्करस्य प्रति—
र्लुप्तेऽप्यस्मपदे ततश्च जिन इत्याख्यां दधौ सान्वयाम् ॥ "
—जिनेश्वरसूरीयश्रावकधर्मवृत्तौ (प्रा० श्लो० ५, प्रश० श्लो० ५)

वि. सं. १३२० वर्षे प्रबोधचन्द्रगणिः—

" स्वैरं यैर्विहरद्भिरत्र भुवने सर्वज्ञकल्पैस्तथा–
ऽनन्यव्याहतदेशनालहरिभिर्मिथ्यात्वमुन्मूलितम् ।
एते सम्प्रति संशयप्रभृतयस्तन्मूलभूता यथा
निर्जीवा इव नोच्छ्वसन्त्यपि मनाक् कालेऽनुकूलेऽपि हि ॥

तैः पूज्यपादैर्**जिनदत्तसूरि**भिः कृतेऽत्र शास्त्रे जिनशासनानुगे ।
संन्देहदोलावलिनाम्नि लेशतः करोमि वृत्तिं स्वगुरूपदेशतः ॥ "

" तत्पट्टे **जिनदत्तसूरि**रभवन्मार्तण्डचंण्डप्रभो •
यस्मिन् विष्टपशर्मणि त्वत इतः स्वच्छन्दसा भ्राम्यति ।
तज्ज्योतिर्गलहस्तिता घनतमःपिण्डा इव द्विड्-गजा
जग्मुर्दिक्षु विदिक्षु मङ्क्ष्वभिभवं वक्तुं तु दिग्दन्तिनाम् ॥ "

--जिनदत्तसूरीयसन्देहदोलावल्या बृहद्वृत्तौ ।

वि. सं. १३२६ (?) वर्षीये जिनमन्दिरप्रशस्तिशिलालेखे--

" तस्मिन् महात्मनि समेयुषि नाकलोकं
तीर्थं बभार भगवान् **जिनदत्तसूरि**: ।
नामापि यस्य बत पार्श्वविभोरिवाशु
सर्वं भयं हरति मंगलमातनोति ॥ १०३ ॥

यस्मिन्नंजनभृंगभासि तरुणांभोभृत्कुत्कुंजर-
श्रीलुंटाकगभीरवीरमधुरध्वाने वृषं जल्पति ।
पीयूषैरिव पूर्यमाणमनसो भव्याः प्रजह्रादिरे
विश्वे वादिगजा गलन्मदभरा द्राक् कांक्षिशीक्यं दधुः ॥१०४॥"

--वीजापुरवृत्तान्ते (पृ. ४)

---

१ " इह हि किलातिशायिज्ञानिभिर्भगवद्भिः [भट्टारक] श्री**जिनदत्तसूरि**भिर्दुःषमाकाल-माहात्म्याविर्भवदसन्मार्गसंसर्गोल्लसदनेकसंशयशङ्कापङ्ककलङ्कितानि भविष्यद्धार्मिकलोकधर्मानुष्ठानानि मा भूवन्निति परोपकाररसिकतया स्वोत्प्रेक्षितसम्भाव्यप्रश्नमालानुसारि सारोत्तराभिधायकं संशयपद-प्रश्नोत्तरनामकं प्रकरणं चक्रे तच्चेह ' **सन्देहदोलावली** ' इति नाम्ना प्रसिद्धम् ।

* * * * *

एवं च ' श्री**वी**न(ठ)णहिंडाभिधानपत्तनवास्तव्यया कयाचित् **खरतर**परमश्राविकया प्रति-दिनमात्मगुरूपदिष्टधर्मानुष्ठानान्यनुतिष्ठन्त्या स्वव्यापरणाननुरूपगच्छान्तरीयश्रावकव्यापरणदर्शनात् तथाविधसुगुरुसम्पर्काभावाच्च समुद्भवन्तः सन्देहाः सम्यगुत्तरलाभार्थं विज्ञप्तिकायां लिखित्वा दूर-देशप्रवेशपेशलितानार्यप्रायकु[ज]नमनसां श्रीअम्बिकादेवताप्रकटितयुगप्रधानत्वालङ्कृतनामधेयानां **श्रीजिनदत्तसूरी**णां पादमूले प्रेषिताः । श्रीमत्पूज्यैश्च वाचनानन्तरमेव तस्या भविष्यल्लोकानामप्यु-पकाराय सरलोक्तित्वात् सुगमार्थं सार्धशतगाथाप्रमाणमेतत् प्रकरणं विरचितम् ' इत्येषाऽपि प्रसिद्धि-र्वृद्धपरम्परया निशम्यमाना समूला भवतीति । "

—सन्देहदोलावलीबृहद्वृत्तौ प्रबोधचन्द्रगणिः ।

वि. सं. १३२८ वर्षे प्रबोधमूर्तिगणिः (जिनप्रबोधसूरिः)—

" तच्छिष्यमौलि**जिनदत्त**गुरुप्रवीर–
श्चक्रे खिलं **विधिपथं** सुवहं समन्तात् । "

—कातन्त्रदुर्गपदप्रबोधे ।

वि. सं. १३३४ वर्षे जिनप्रबोधसूरिणा प्रतिष्ठिता जिनदत्तसूरिमूर्तिरद्यापि प्रेक्ष्यते ऽणाहिलपाटक–पत्तने ।[1]

[2] वि. सं. १३८३ वर्षे जिनकुशलसूरिः—

" समस्तयोगिनीचक्रदेवदेवताव्रातविहितशासना नानाप्रभावनाप्रभावित–श्रीजिनशासना महर्द्धिक**नाग**देवश्रावकसमाराधितश्रीअम्बिकालिखितश्री**जिनदत्त**सूरियुगप्रधानेत्यक्षरवाचनमार्जनसमुपार्जितयुगप्रधानपदसत्यताप्रधानाः सकलातिशायिप्रगुणगुणगणमणिखनयः सकलशिष्टचूडामणयः प्रबोधितान्यगच्छीयातुच्छभूरिसूरयः श्री**जिनदत्त**सूरयः × × "

" तत्राभवन् श्री**जिनदत्त**सूरयः शश्वद् यदाज्ञां लुलुपुर्न भूरयः ।
देवा नृदेवा नततिर्यगङ्गिनः सिन्धुर्न चाग्निर्न च योगसङ्गिनः ॥ "

––जिनदत्तसूरीयदेववन्दन(सम्यक्त्वारोपविधि)कुलकवृत्तौ ।

वि. सं. १४११ वर्षे तरुणप्रभसूरिः––

" तत्पट्टशैलेऽजनि योगिराजः सुरानतः श्री**जिनदत्त**सूरिः । "

—श्रावकप्रतिक्रमणसूत्रवृत्तौ ।

वि. सं. १४१२ वर्षे भुवनहितोपाध्यायः—

"तत्पट्टे **जिनदत्त**सूरिरभवद् योगीन्द्रचूडामणि-
र्मिथ्याध्वान्तनिरुद्धदर्शन.....

---

१ ' टांगडिआवाडा 'नामकपाटके जिनमन्दिरे । मूर्तिप्रतिष्ठालेख इत्थं पठ्यते—

" संवत् १३३४ वैशाखवदि ५ श्री**जिनदत्तसूरि**मूर्तिः श्री**जिने**श्वरसूरिशिष्यश्री**जिन**प्रबोधसूरिणा..... [प्रतिष्ठिता] । "

२ 'तच्छिष्यः स्वल्पमेधा अपि **जि**नकुशलसूरिरेकान्तकान्त—
श्रीसिद्धान्ताभ्यासलेशाद् विरचितकतिचिदाख्यानकाख्यानरम्याम् ।
सम्यक्त्वारोपविध्युज्ज्वलकुलकवरस्यादधौ वृत्तिमेतां
त्र्यष्टत्र्येकैर्मिताब्दे गृहमणिदिवसे **वा**ग्भटश्रीपुरान्तः ॥ '

—चैत्यवन्दन(सम्यक्त्वारोपविधि)कुलकवृत्तिः (प्रश० १०)

श्रावक यो न्यदेशि सुगुरुः क्षेत्रेत्र सर्वोत्तमः
सेव्यः पुण्यवतां सतां सुचरण-ज्ञानश्रिया सत्तमः ॥ २१ ॥"

—राजगृहगिरिप्रशस्तौ ।

वि. सं. १४७३ —९९ वर्षे जयसागरगणिः—

" तत्रान्यदा ज्ञान—दर्शन—चारित्रगुणैकभूमयः श्रीमद्म्बिकोपासनोपलब्धकराक्षर-श्रीनागदेवसुश्रावकविज्ञातप्रकटीकृतयुगप्रधानपदवीसरिन्महाब्धयस्त्रिभुवनातिशायिभाग-धेया नानाश्रुतरत्नाकराः क्वचित् तथाविधदुष्टरोगव्यन्तरादिदोषदूषितं धार्मिकजनमुद्वीक्ष्या-क्षामकारुण्यविवशमनसः श्रीजिनदत्तसूरयो दोषप्रतिक्रियाकरणदक्षं तत्तादृक्षदेवदेवता-प्रणिधानप्रत्यस्तप्रतिपक्षं हितैपिमनीषिमनुजकण्ठकन्दलीविमलस्रगनुकारं ' तं जयउ ' इति लोकप्रसिद्धनामावतारं जागरूकास्तोकप्रभावप्राग्भारं श्रीविधिसङ्घरक्षाऽर्थं स्मरणास्तवं विरचितवन्तः । "

—जिनदत्तसूरीयस्मरणस्तववृत्तौ ।.

"इह हि पुरा नागदेवसुश्रावकयुगप्रधानजिज्ञासाविहितससोपवाससन्तुष्टोज्जयन्त-निवासिश्रीअम्बिकादेवता तत् ह(द्ध)स्तलिखितेतराचार्याज्ञेयलिपिरूपाक्षरवाचनोत्पुसनप्रका-रप्रकटितयुगप्रधानभावा ज्ञान—दर्शन—चारित्रागण्यपुण्यातिशयसत्त्वराजितश्रीशासनदेवता-वितीर्णोज्जयिनीस्थितमहाकालप्रासादमध्यवर्तिशैलमयभारपट्टवीटकान्तःसंगोपित—पुराश्री-सिद्धसेनदिवाकरवाचित—दशपूर्वधरश्रीकालिकसूरिविरचितानेकाद्भुतश्रीप्रथमानुयोगसि—द्धान्तपुस्तकरत्नार्थसम्यक्परिज्ञानजगद्विदितमहाप्रभावा निजप्रातिभवैभवविस्मापित—देव-सूरयः श्रीजिनदत्तसूरयो लोकप्रतिबोधार्थं सुविहितविहारेण विहरन्तोऽन्यदा रोगाद्युपद्रवो-पशमार्थं च सुगुरुजनपारतन्त्र्यस्तवरूपं स्मरणं महाप्रभावं ' मयरहियं ' इति प्रसिद्धं चिकीर्षवः × × × । "

—जिनदत्तसूरीयगुरुपारतन्त्र्यस्तववृत्तौ ।

---

१ ' श्रीजिनवर्धनसूरिवचनामृतपायिवाचनाचार्यजयसागरगणिना विरचिता स्मरणस्तव—वृत्तिः । ' इति प्रान्ते पठ्यते ।—C.

जयसागरगणिपरिचयो जे. भां: सूच्यामप्रसिद्धग्रन्थग्रन्थकृत्परिचये (पृ.५४)ऽस्माभिरकारि ।

२ वृत्तिप्रान्ते ' श्रीसागरचन्द्रसूरिप्रसादात् ' इत्युल्लेखदर्शनेनानुमीयते वि. सं. १४५९ वर्षे जिनराजसूरिनिदेशाज्जेसलमेरुदुर्गे लक्ष्मणराज्ये खरतरसङ्घकारिते जिनप्रासादे गर्भगृहे पार्श्वजिन-बिम्बस्थापकोऽयं सागरचन्द्रसूरिः स्याद् यस्य सूरेर्मूर्तिरद्यापि तत्र दृश्यते । तत्प्रासादप्रशस्ति-शोधकेन जयसागरगणिना (जे. सूची पृ. ५४,६३) एषा वृत्तिः कृता सम्भाव्यते ।

" इह हि परोपकारकृतधियो विशुद्धसिद्धान्ताचारशृङ्गारितचारित्रश्रियः **श्रीजिनदत्त-सूरय**स्तथाविधविषमदुष्षमासमुल्लसदसदुपदेशदायकवचनश्रवणान्यान्यक्रियाऽनुष्ठानदर्शनोद्भूतप्रभूतसन्देहावर्तपतितं लोकमालोक्य कथञ्चित् तमुद्धर्तुमनसः स्वपरसम्भावितप्रश्नतदनुसारितादृगुत्तरदानप्रधानं **संशय**पदप्रश्नोत्तरनामकं **सन्देह**दोलावलीति द्वितीयनामप्रसिद्धं प्रकरणमकार्षुः । "

—जिनदत्तसूरीयसन्देहदोलावल्या लघुवृत्तौ ।

वि. सं. १९४४ वर्षे कमलसंयमोपाध्यायः—

" कूष्माण्ड्याऽऽस्तिक**नागदेव**तपसा सन्तुष्टया यद्-युग-
प्राधान्यं प्रकटीकृतं सुकृतिनामानन्दकन्दाम्बुदम् ।
सैष श्री**जिनदत्त**सूरिरखिलश्रामण्यविद्योऽभवद्
वस्य श्लाघ्यचरित्रपङ्क्तिगणने नो पाटवं कस्यचित् ॥ "

—उत्तराध्ययनवृत्ति(सर्वार्थसिद्धि)प्रान्ते

वि. सं. १९९३ वर्षे पद्ममान्दिरगणिः—

" पट्टे तदीयेऽभवदद्भुतश्रीर्युगप्रधानो **जिनदत्त**सूरिः ।
यो योगिनीचक्रमुखादिदेवर्शार्पे निजाज्ञां मुकुटीचकार ॥ "

—ऋषिमण्डलवृत्तौ (प्रश० श्लो० ८)

वि. सं. १६४६ (?) वर्षे समयसुन्दरोपाध्यायः—

" यो योगिनीभ्यो जगृहे ददौ च वरान् वरान् जाग्रदनेकविद्यः ।
प ापि पीरान् स्ववशीचकार युगप्रधानो **जिनदत्त**सूरिः ॥ "

—कल्पसूत्रकल्पलतायाम् (प्रश० श्लो० ४)

" जिग्यिरे येन योगिन्यश्चतुःषष्टिर्यतीन्दुना ।
सूरिः श्री**जिनदत्तो**ऽभूत् तत्पट्टाम्बुजभास्करः ॥ "

—अष्टलक्षार्थी(प्रश० श्लो० १२)

वि. सं. १६४६–९१ वर्षे गुणविनयगणिः—

" शुद्धानेकरसप्रवाहविबुधासाधारणप्रीतिदा
रेजे यस्य सरस्वतीव सकलान् सम्पावयन्ती मुखे ।

मुक्तासारसरस्वती जनपदान् भव्यानभव्याश्रयं
तं श्रीमज्जिनदत्तसूरिमुगुरुं चित्ते निधायाधुना ॥"

—रघुवंशवृत्तौ (श्लो० ३)

"प्रौढं प्रौढयुगप्रधानपदसाम्राज्यं प्रतीतं पुरा
देवोक्त्या भुवि नागदेवभविकश्राद्धस्य साक्षात् पुरः ।
योगिन्योऽपि च येन मन्त्रमहिमप्रागल्भ्यतो जिग्यिरे
स्तुत्वा श्रीजिनदत्तसूरिमनघं तीव्रप्रतापारुणम् ॥"

—दमयन्तीचम्पूवृत्तौ ।

"तत्पट्टेऽभूच्चतुःषष्टियोगिनीनां प्रसाधकः ।
युगप्रधानतामाप्तः सूरिः श्रीजिनदत्तराट् ॥
यन्नाममन्त्रस्मरणात् सम्प्रत्यपि विलोक्यते ।
तडित्पातादिकष्टौघो ध्वस्यमानः क्षणाद् भुवि ॥"

—सम्बोधसप्ततिकावृत्तौ (प्रश० श्लो० ९–१०)

---

१ "श्रीमदकब्बरराजाधिराजलब्धप्रसादसौभाग्ये ।
राज्यं शासति जनताऽऽनन्दकरे न्यायवृत्तिधरे ॥
श्रीराजसिंहभूभुजि निजभुजबलनिर्जितारिनृपराजे ।
सन्ध्यादिगुणविचक्षणमन्त्रीश्वरकर्मचन्द्रवरे ॥
विक्रमतो रस-हरिभुज-रस-शशिवर्षे जनोत्सवोत्कर्षे ।
श्रीमद्विक्रमनगरे विनिर्मिता विमलमतिगम्या ॥"

—रघुवंशवृत्तिः (प्रश० श्लो० १०–१२)

२ "श्रीविक्रमवंशोद्भवसद्विक्रमराजसिंहनृपराज्ये ।
सत्कर्मकर्मचन्द्राभिधधीसखधुर्यसन्धार्ये ॥
श्रीमद्विक्रमभूपतेः स्वरसरस्वत्–तर्क–शक्रप्रमा—
ख्यातायां शरदि प्रमोदविसरभ्राजिष्णुपौराकुले
श्रीमेरुत्नकनाम्नि भद्रनगरेऽर्हच्चैत्यशोभाधरे
चक्रे श्रीदमयन्त्युदारचरिते टीकां महार्थां सुधीः ॥
अकबरनृपाधिनृपतौ विजयिनि शर–भुवन–सस्मिते वर्षे ।
श्रीमल्लाभपुरीयं प्राकाशि परा पुरस्सुधियाम् ॥"

–दमयन्तीचम्पूवृत्तिः(प्रश० श्लो० १५–१६,९)

वि. सं. १६५४ वर्षे ज्ञानविमलोपाध्याय:—

" तत्पट्टपूर्वाचलतिग्मरश्मयो युगप्रधाना **जिनदत्त**सूरय: ।
दिदीपिरे श्रावकलक्षबोधका: सुरासुरै: संस्तुतपादपङ्कजा: ॥ "

—शब्दप्रभेदवृत्तौ ।

क्षमाकल्याणादिकृतायामर्वाचीनायां खरतरगच्छपट्टावल्यामन्यत्रापि च प्राप्यते प्रस्तुतस्य सूरिवर्यस्य समुज्ज्वलयश:संवलितमद्भुतमन्यदपि सच्चरितम्, किन्तु कविसमयसार्माप्यसम्भवि पूर्वतनमाधिकं प्रामाणिकामिति तदेवात्र प्रादर्शि, समर्थितं चान्यप्रामाणिकप्राज्ञानामभिप्रेतै: । विस्तरभयात् तु विरम्यतेऽधिकवक्तव्यात् । विशेषजिज्ञासुना तदप्यवलोकनीयम् । सूरे: स्वर्गमनसमय–स्थलादिनिर्देशस्तत्रेत्थमसूचि—

" अथैवंविधा: क्षत्रिय–ब्राह्मणादिकुलीनलक्षश्राद्धप्रतिबोधका जलभ्रमोपरि कम्बलास्तरणादिप्रकारेण पञ्चनदीसाधकाः **सन्देहदोलावल्या**द्यनेकग्रन्थविधायका: परकायप्रवेशिन्यादिविविधविद्यासम्पन्ना: परोपकारकारिण: परमयश:–सौभाग्यधारिण: श्रीखरतरगच्छनायका महाप्रभावका: **श्रीजिनदत्तसूरय:** संवत् १२११ आषाढसुदि एकादश्यां **अजमेरु**नगरेऽनशनं कृत्वा स्वर्गं गता: ॥ ४८ ॥ " ख. पट्टावल्याम् ।

ग्रन्थरचना.

प्राकृतापभ्रंशादिभाषायां पद्यप्रमाणपरिगणनया लघवोऽप्यर्थतोऽतिगम्भीरा देव–गुरुस्तोत्र–चैत्यविधि–धर्मविधिप्रतिपादका विविधोपदेशपेशला निम्नसूचिता ग्रन्था: प्रस्तुताजिनदत्तसूरिप्रणीता ज्ञाता: सन्ति ।

१ गणधरसार्धशतकम् (प्रा.) गा. १९० २ सन्देहदोलावली (प्रा.) गा. १९०

---

१ " **जिणदत्तगणिगुणसयं** सपण्णयं **सोमचंद**बिंबं व ।
भव्वेहिं भणिज्जंतं भव–रविसंतावमवहरउ ॥"

इति प्रान्तपद्योपेतमेतदत्र (परि० २) प्रादर्शि । अस्य द्वादशसहस्रश्लोकपरिमिता बृहद्वृत्ति: सुमतिगणिना वि. सं. १२९५ वर्षे निरमायि (जे. भां. सूची क्र. ३१३–३१५; अप्रसिद्ध० पृ. ५०)

एतस्य षोडशशतश्लोकप्राया संक्षिप्ता वृत्ति: सर्वराजगणिना विक्रमीयचतुर्दशशताब्द्यां सङ्कलिता, मुद्रिता । बृहद्वृत्तेश्चाचार्यचरितोद्धारश्चारित्रसिंहगणिनाऽकारि, प्रसिद्ध: ।

२ " इय कइवय**संसयपय–पण्हुत्तर**पयरणं समासेणं ।
भणियं जुगपवरागम–**जिणवल्लहसूरि–सीसेण** ॥"

इति प्रान्तगाथापरिकलितं संशयपदप्रश्नोत्तरसङ्गकमेतद् वि० सं० १३२० वर्षे प्रबोधचन्द्रगणिना सार्धचतु:सहस्रश्लोकप्रमाणया बृहद्वृत्त्या समयोजि । एतस्य लघुवृत्तिर्जयसागरगणिना सार्धद्वयसहस्रश्लोकप्राया वि० सं० १४९५(?) वर्षे व्यरचि । द्वे अपि प्रकाशिते ।

३ चैत्यवन्दनकुलकम् (प्रा.) गा. २८ ४* गणधरसप्ततिः (प्रा.) गा. ७०

५ उपदेशरसायनम् (अप०) गा. ८० ६ चर्चरी (अप०) गा. ४७

७ कालस्वरूपकुलकम् (अप०) गा. ३२ ८ सर्वाधिष्ठायि(स्मरण)स्तोत्रम् गा. २६

---

३ "सव्वन्नूण मयं मएण रहिओ सम्मं सया साहए
भव्वाणं पुरओ पवाहविरओ निच्छम्म–निम्मच्छरो ।
सो मे धम्मगुरू सया गुणि–गुरू कल्लाणकारी वरो
लग्गो जो **जिणदत्त**–सोहणपहे नीससमुक्खावहे ॥"

इत्यन्तिमगाथायुक्तमेतद् वि. सं. १३८३ वर्षे **जिन**कुशलसूरिणा चतुश्चत्वारिंशच्छत-श्लोकपरिमितया वृत्त्या, लब्धिनिधानेन संक्षिप्तटिप्पनेन च व्यभूष्यत । देववन्दनकुलकं सम्यक्त्वारोप-विधिकुलकमित्यादिकाऽस्यापरा संज्ञा ज्ञायते । वृत्ति–टिप्पनसमन्वितमेतत् प्रसिद्धम् ।

४ अप्रसिद्धमेतत् । अस्य नामोपलभ्यते गणधरसार्धशतक–वृत्त्यादौ (अत्र भूमिका द्रष्टव्या पृ. ५१) जेसलमेरुदुर्गीयभाण्डागारे १५० क्रमाङ्कपुस्तिकायां प्राप्यतेऽपि ।

५ "इय **जिणदत्त**वएसरसायणु इह–परलोयह सुक्खह भायणु ।
कण्णंजलिहिं पियंति जि भव्वइं ते हवंति अजरामर सव्वइं ॥"

इति प्रान्तपद्यपर्यवसितमेतद् वि. सं. १२९४(२) वर्षे जिनपालोपाध्यायेन शतचतुष्टयश्लोक-परिमितया वृत्त्या संयोजितम् । तच्चात्र पूर्वमेव प्रकाश्यते ।

६ "इय जुगपवरह सूरिहि सिरि**जिणवल्लहह**
नायसमयपरमत्थह बहुजणदुल्लहह ।
तसु गुणथुइ बहुमाणिण सिरि**जिणदत्त**गुरु
करइ सु निरुवमु पावइ पउ जिणदत्तगुरु ॥"

इत्यन्त्यपद्योपेतैषा जिनपालोपाध्यायेन वि. सं. १२९४ वर्षे विहितया शतत्रयश्लोकप्रमितया वृत्त्या समायोजि । सा चात्र प्रथममेव प्रकाशभावं प्राप्नोति ।

७ "इय **जिणदत्तु**वएसु जि निसुणहि पढहि गुणहि परियाणवि जि कुणहि ।
ते निव्वाण–रमणी सहु विलसहि वलिउ न संसारिण सहु मिलिसहि ॥"

इति प्रान्तपद्यपर्यवसितं द्वात्रिंशिकारूपमेतत् कुलकं सूरप्रभोपाध्यायसङ्कलितया सार्धशतश्लोक-मितया वृत्त्या साकमत्र काव्यत्रय्यां तृतीयत्वेन निवेश्य प्रकाशितम् । उपदेशरूपमप्येतत् 'कालस्वरूपकुलक' इति वृत्तिकाराभिमताभिधया प्राख्यायि । जिनपालोपाध्यायकृताऽस्य वृत्तिः पत्तने विद्यत इति जैनग्रन्थावल्यामसूचि, किन्तु नास्माभिः सा दृष्टा ।

८ 'तं जयउ' इत्यादिपदेनोपलक्षितत्वात् तन्नाम्ना विशेषतः प्रसिद्धम्, प्रान्ते च—

"इय जो पढइ तिसंझं दुस्सज्झं तस्स नत्थि किं पि जए ।
जिणदत्ताणाइ ठिओ सुनिद्दियहो सुही होइ ॥"

इत्यनया गाथया समुपेतमेतच्चैकत्र मुद्रितम् । अस्य वृत्तिस्तु जयसागरोपाध्यायेन वि. सं. १४९५ (?) वर्षे विनिर्मिताऽप्रसिद्धा ।

९ सुगुरुपारतन्त्र्यम् (प्रा.) गा. २१ १० *विंशिका

११ विघ्नविनाशिस्तोत्रम् (प्रा.) गा. १४ १२ *उपदेशकुलकम्

१३* अवस्थाकुलकम् १४ *श्रुतस्तवः

१५* अध्यात्मगीतानि **१६ उत्सूत्रपदोद्घाटनकुलकम् ।**

---

९ " सच्चरियाणमहीणं **सुगुरूणं पारतंत**मुव्वहइ ।
जयउ **जिणदत्तसूरी** थिरिनिलओ पणयमुणितिलओ ॥"

इत्यन्तिमगाथोपेतमेतन्नैकशः प्रसिद्धम् । अस्य शतद्वयश्लोकप्रमाणा वृत्तिरप्युपलभ्यते । वृत्तिकारो जयसागरगणिरिति जैनग्रन्थावल्यामसूचि । तत्र च तद्वृत्तिरचनासमयो वि. सं. १३६८ वषरूपो निर्दिष्टश्चिन्त्यो यतोऽत्र सम्भाव्यमानजयसागरस्य समयो विक्रमस्य पञ्चदशशताब्युत्तरार्ध–षोडशशताब्दीप्रारम्भरूपः प्रामाणिकः (जे. भां. सूच्यामप्रसिद्ध० पृ०५४ इत्यत्र विलोकनीयम्)

१० अप्रसिद्धेषा । अस्या नामोपात्तं गणधरसार्धशतकबृहद्वृत्तौ । अत्र भूमिका (पृ.४४) द्रष्टव्या ।

११ 'सिग्घमवहरउ ' इत्यादिनाऽऽरब्धत्वात् तन्नाम्नैव विशेषतः प्रसिद्धिमधिगतम्,

" **जिणदत्ताणं** सम्मं मन्नंति कुणंति जे उ कारंति ।
मणसा वयसा वउसा जयंति साहम्मिया ते वि ॥
जिणदत्तगुणेहिं नाणाइणो सया जे धरंति धारंति ।
दंसियसियवायपहे नमामि साहम्मिया ते वि ॥"

इत्यन्तिमपद्यसूचितस्वाभिधानमेतदपि स्मरणस्तोत्रं नैकदा प्रकाशितम् । अस्य संक्षिप्ता वृत्तिरप्युपलभ्यते ।

१२, १३, १४, १५ क्रमाङ्केषु सूचिता कृतिर्जेसलमेरुदुर्गे भाण्डागारपुस्तिकायां पठ्यते, किन्तु विशिष्टावलोकनं विना नात्र किमपि तद्विषये स्पष्टीकर्तुं शक्यते । तथा च जैनग्रन्थावल्यां जिनदत्तसूरिकृतित्वेन निर्दिष्टाऽपि पट्टावली न तथा, किन्तु सा कविपल्हप्रणीता जिनदत्तसूरिस्तुतिरित्यत्र (परि० ४) दर्शनेन प्रतीतं भविष्यति पाठकानाम् ।

नामसाम्याद् वायटीयगच्छीयजिनदत्तसूरिकृतस्यापि शकुनशास्त्रस्य गूर्जरभाषानुवादपुस्तिकायां प्रस्तुतजिनदत्तसूरिप्रतिकृतिं निवेश्य प्रकारान्तरेणास्य सूरेः कृतिः सा इत्यसूचि तदनुवादक-प्रकाशकेन पं. हीरालालेन, तथा च कैश्चित् तच्चरितमत्र संमिश्रितम्, किन्तु तद् भ्रान्तिमूलं प्रतीयते प्रेक्षावताम्।

* अप्रसिद्धग्रन्थसंज्ञापकमेतदभिज्ञानम् ।

समकालीनसूरयः ।

प्रस्तुतजिनदत्तसूरि–जीवनसमये विक्रमस्य द्वादशशताब्द्यां त्रयोदशशताब्द्याश्च प्रथमचरणे सत्तां बिभ्राणाः प्रभूताः प्रौढाः सूरिपुङ्गवाः समजनिषत, सूर्यैरिव यैर्जिन-प्रवचन–गगनाङ्गणं स्वप्रतिभया द्योति ।

तत्र च केषाञ्चिदुल्लेखोऽत्राजनि । तदितरेषां जिनभद्रसूरि–देवचन्द्रसूरि–देव-भद्रसूरि–धनेश्वरसूरि–नन्नसूरि–पार्श्वदेवगणि (श्रीचन्द्रसूरि)–महेन्द्रसूरि–मुनिचन्द्र-सूरि–यशोदेवसूरि–यशोदेवोपाध्याय–रत्नप्रभसूरि–रामचन्द्रसूरि–रामदेवगणि–वर्धमा-नसूरि–शान्तिसूरि–सिद्धसूरि–हरिभद्रसूरि (१–२)–हेमचन्द्रसूरि (१–२) प्रभृतीनां संक्षिप्तपरिचयस्त्वस्माभिरन्यत्र (जे. भां. सूच्याम्, अप्रसिद्ध०) अकारि ।

तथा चान्येषामाम्रदेवसूरि–चक्रेश्वरसूरि–चन्द्रप्रभसूरि–चन्द्रसेनसूरि–विजय-सिंहसूरि(१–२)–श्रीचन्द्रसूरि–हेमचन्द्रसूरिप्रभृतीनां परिचयः प्रो० पिटर्सनादिसङ्कलि-तरिपोर्टपुस्तकादिपर्यवलोकनेन, वादिदेवसूरि–वीराचार्य–हेमचन्द्रसूरिप्रमुखाणां चरितं प्रभावकचरितादिप्रेक्षणेन, लक्ष्मणगण्यादीनां चापरेषां परिचयस्तत्तत्कृतिसुपार्श्वचरितादि-प्रशस्तिप्रान्तांशनिरीक्षणेनावगंस्यते । केषाञ्चिच्च परिचयः प्रकाश्यमानपत्तनीयजैनभाण्डा-गारीयग्रन्थसूच्यादावपि प्रदर्शयिष्यत इति नेह तदर्थं प्रयत्यते ।

केवलं जिनदत्तसूरेर्वादिदेवसूरि–हेमचन्द्रसूरिभ्यां साकं जन्म–दीक्षाऽऽदिसमय–स्थलादिविषयकं समवक्तव्यमत्र कोष्ठके प्रदर्श्य सन्तुष्यते—

		जिनदत्तसूरेः	वादिदेवसूरेः	हेमचन्द्रसूरेः
१	जन्मसंवत्	११३२	११४३	११४५
२	जन्मस्थलम्	धवलक्कपुरम् (गूर्जरदेशे)	मद्दाहृतम् (गूर्जरदेशे)	धन्धूकपुरम् (गूर्जरदेशे)
३	जन्मनाम	०	पूर्णचन्द्रः	चङ्गदेवः
४	ज्ञातिः	क्षपणकभक्ता (हुंबडवणिक्)	प्राग्वाटवणिक्	मोढवणिक्
५	पिता	वाछिगः	वीरनागः	चचः (चाचिगः)
६	माता	बाहडदेवी	जिनदेवी	चाहिणी (पाहिनी)
७	दीक्षासंवत्	११४१	११५२	११५० (४)
८	दीक्षानाम	सोमचन्द्रः	रामचन्द्रः	सोमचन्द्रः
९	दीक्षागुरुः	धर्मदेवोपाध्यायः	मुनिचन्द्रसरिः	देवचन्द्रसूरिः
१०	गच्छनाम	विधिपथः (खरतरः)	बृहद्(वड)गच्छः	पूर्णतल्लगच्छः
११	सूरिपदसंवत्	११६९	११७४	११६६
१२	परिचितनृपः	अर्णोराजः	सिद्धराजः	सिद्धराज-कुमारपालौ
१३	स्वर्गमनसंवत्	१२११	१२२६	१२२९
१४	स्वर्गमनस्थलम्	अजयमेरुदुर्गः	०	अणहिलपाटक(पत्तन)म्
१५	पट्टधरः	जिनचन्द्रसूरिः	भद्रेश्वरसूरिः	रामचन्द्रसूरिः
१६	मुख्यकृतिनाम	गणधरसार्धशतकम्	स्याद्वादरत्नाकरः	सिद्धहेमशब्दानुशासनम्

व्याख्याकारः

(१)

जिनपालोपाध्यायः ।

अपभ्रंशकाव्यत्रय्यन्तर्गतस्य **चर्चर्यु**पदेशरसायनाख्यकाव्यद्वयस्य व्याख्यातु-**र्जिन**पालस्य परिचितिरप्यत्रौचितीमञ्चति । विवृतिकर्त्राऽनेनैतदन्ते निजं **जिन**पतिसूरेः शिष्यत्वं **जिने**श्वरसूरेश्च निदेशवर्तित्वं स्पष्टं पर्यचायि । एतयो**र्जिन**पालस्यापि च संक्षिप्तपरिचयस्त्वस्माभिरन्यत्राकारीति विशेषतो निवेदनीयमेवात्र निवेद्यते ।

जिनपति-जिनेश्वरसूरिद्वयस्यापि प्रशस्तगुणगणप्रशस्तिः प्रचकाशे तत्परम्पराजा-तैस्तच्छिष्य-प्रशिष्यप्रभृतिभिः, परन्तु भूमिकाया अतिविस्तारभयात् तत्प्रदर्शने नोत्सहे; केवलं प्रस्तुतव्याख्याकारगुरो**र्जिनपतिसूरेः** परिचितिं किञ्चिदुद्धरामि । तथाहि—

वि. सं. १२८९ वर्षे जिनपतिसूरिशिष्यः पूर्णभद्रगणिः—

" यैर्वादीन्द्रकरीन्द्रदर्पदलने सिंहैरिव स्फूर्जितं
मोहध्वान्तविनाशने भुवि सदा सूर्यैरिवोज्जृम्भितम् ।
भव्यप्राणिसमूहकैरववने चन्द्रैरिवेहोद्गतं
ते श्रीम**ज्जिनपत्य**भिरूयगुरवोऽमूवन् यतीशोत्तमाः ॥ "

—धन्य-शालिभद्रचरित्रे (प्रश० श्लो० ८)

वि. सं. १२९३ वर्षे प्रस्तुतो जिनपालोपाध्यायः—

" नानासद्वादकेलीविदलितविलसन्मानशैलः परेषां
रेखां यः प्राप विद्वत्स्वनितरसुलभां सर्वविद्यावतंसः ।
दृष्टान्तत्वं चरित्रिष्वलभत[1] कुमतध्वान्तविध्वंसहंसः
स श्रीमान् सूरिराजो **जिनपति**रभवत् तत्पदालङ्करिष्णुः ॥"

—द्वादशकुलकविवरणे (प्रश० श्लो० ५)

---

१ जेसलमेरुभां० सूच्याम् (अप्रसिद्ध० पृ. २८, ३६, ४०, ४१; नामसूची)

२ तत्पदेनात्राग्रेऽपि चोपरिपरिचायितजिनदत्तसूरेः पट्टधरो 'जिनचन्द्रसूरिर्विज्ञेयः; यस्य जन्म वि. सं. ११९१ वर्षे, सूरिपदं वि. सं. १२११ वर्षे, स्वर्गमनं च वि. सं. १२२३ वर्षे खरतरगच्छ-पट्टावल्यादितो ज्ञायते ।

वि. सं. १२९६ वर्षे जिनपतिसूरिशिष्यः सुमतिगणिः—

" तस्याभूद् भूपमूर्ध्नोद्भटमुकुटतटीकोटिघृष्टांघ्रिपद्मः
शिष्यः शस्यो बुधौघैर्**जिनपति**रिति सन्नामतः सूरिरुच्चैः ।
विख्यातः क्षोणिपीठे सुविहितयतिराट् [राज]चक्राधिनाथ—
श्छन्दोऽलङ्कार—तर्कप्रमुखनिखिलसद्ग्रन्थविस्तारितार्थः ॥
प्रतिदिनमपि सिद्धिप्रेयसीसङ्गसौख्या—
नुगतनवकथास्वाक्षिप्तचित्तं निरीक्ष्य ।
क्षणमपि दयितं न ज्ञान—चारित्रलक्ष्म्यौ
मुमुचतुरुदितात्म[जात]भीत्येव यं च ॥ "

—गणधरसार्धशतक—बृहद्वृत्तौ (प्रश०)

वि. सं. १३०७ वर्षे जिनेश्वरसूरिशिष्यः पूर्णकलशगणिः—

" विज्ञाः केचन लक्षणेऽथ कतिचित् तर्के परेऽप्यागमे
काव्येऽन्ये च समग्रशास्त्रचतुराः प्रायेण नामून् विना ।
व्यक्तुं नूनमिदं विधिर्बहुविधैः शास्त्रैर्विजाप्यासमान्
प्राज्ञान् राजसभास्वलम्भयदतो यान् जैत्रपत्राण्यरम् ॥
भृङ्गायमाणपदपुष्कर्रराजहंसा
वर्ण—प्रतापजितपुष्कर्रराजहंसाः ।
श्री**जिन**चन्द्रपदपङ्कजराजहंसा—
स्ते जज्ञिरे **जिनपति**प्रभवोऽच्छ(थ) हंसाः ॥"

—प्राकृतद्व्याश्रयवृत्तौ (प्रश० श्लो० ३, ४)

वि. सं. १३१२ वर्षे जिनेश्वरसूरिशिष्योऽभयतिलकगणिः—

" आरुह्य क्षितिभृत्सभाचतुरिकां निर्जित्य दुर्वादिन—
स्तेजोऽग्नौ ज्वलिते लसत्यनुदिशं नादे यशोदुन्दुभेः ।
पाणौकृत्य जयश्रियो गुरुमहैर्यः सारदां मातरं
पृथ्वीं चोन्मुदितां व्यधा**ज्जिनपतिः** सूरिः स जज्ञे ततः ॥"

—सं. द्व्याश्रयवृत्तौ (प्रश० श्लो० ७)

वि. सं. १३१२ वर्षे जिनेश्वरसूरिशिष्यश्चन्द्रतिलकोपाध्यायः—

" तत्पट्टे श्री**जिनपति**सूरिर्जज्ञेऽथ **पञ्चलिङ्गी** यः
श्री**सङ्घपट्ट**कमलं विवृत्य चक्रे बुधाश्चर्यम् ॥

सिद्धान्ताम्बुधिकुम्भसम्भवसमः साहित्यलक्ष्मीप्रियः
पान्थो व्याकरणाटवीषु तिलको यस्तार्किकाणां व्रजे ।
वादीन्द्रद्विपभेदपञ्चवदने काव्यं महार्थं वरं
यस्मिन् कुर्वति भङ्गिभिर्जडतया **माघो**ऽपि माघायते ॥

यश्चाद्यसंहननकाय इवाधिसेहे
गाढोपसर्गभरमस्पृह एव देहे ।
आदाय शोधिमधिपोऽपि च योऽत्र षट् षण्-
मासान् परं च विकृतीर्बहुशो मुमोच ॥

छन्दो–लक्षण–तर्कशास्त्रविविधालङ्कारवित्कोविदे
पृथ्वीराजसभे कुतूहलगृहे श्री**गूर्जरत्रा**वनौ ।
तर्कन्यायवरोपपत्तिसहितैः सिद्धान्तवाक्यैस्तथा
तत्त्वं प्रोच्य महीतले **विधिपथं** प्रोत्सर्पयामास यः ॥ ”

——अभयकुमारचरिते (प्रश० श्लो० १६–१९)

वि. सं. १३१७ वर्षे जिनेश्वरसूरिशिष्यो लक्ष्मीतिलकोपाध्यायः——

“ येनामुद्यन्त सद्यः प्रतिनृपतिसभं वादिनां वक्त्रगेहा
उन्मुद्राणि त्वभूवंस्तदपमलयशोगीतिकोलाहलेन ।
अस्यो(न्यो)न्याशाङ्गनानां शिवपदकमलाकार्मणं यश्च मुद्रां
गच्छस्यादत्त सोऽभू**ज्जिनपति**जिनराट् तत्कपट्टेऽभिषिक्तः ॥ ”

——श्रावकधर्मप्रकरणवृत्तौ (प्रश० श्लो० ७)

वि. सं. १३२० वर्षे जिनेश्वरसूरिशिष्यः प्रबोधचन्द्रगणिः ——

“ येषां गीर्वाणवाणीलहरिभिरभितः पूर्यमाणाऽखिलाऽपि
श्रीपृथ्वीराजपृथ्वीपतिसमितिरिहाश्चर्यसिन्धौ ममज्ज ।
चित्रं तत्रापि शत्रोर्वपुषि ववृधिरे तर्ष–मालिन्य–तापाः
पापानां वा किमेत**ज्जिनपति**गुरवस्तेऽथ पट्टे बभूवुः ॥”

——सन्देहदोलावलिबृहद्वृत्तौ ।

वि. सं. १३२६ (?) वर्षे सङ्खपुरजिनालयाशिलालेखे——

“ ततो **जिनपतिः** प्रभुर्गुरुवतंसचूडामणि——

र्जिनाधिपतिशासनं समुदनीनमत् सन्मनाः ।
समग्रगुणमालिकासमतियातस्तर्यावले–
र्व्यलोक्यततरामहो किमपि वैशिष्ट्यमृत् ॥
यस्मिन् परिषहचमूभरसंसहिष्णौ
नानोपसर्गपटलीं विकटां विजिष्णौ ।
ऊर्जत्तपःश्रिये परोपकृतिप्रवीणे
श्रीवीरनाथजिनतां प्रथयन्ति धन्याः ॥"

—वीजापुरवृत्तान्ते ।

वि. सं. १३८३ वर्षे जिनकुशलसूरिः—

"अत एव श्रीआशापल्यां पूर्वसैद्धान्तिकचक्रचूडामणिभिर्वादीन्द्रद्विपदघटाविद्रावणकेसरिभिर्निश्छद्मशुद्धक्रियाकारिभिः श्रीजिनपतिसूरिभिः श्रीप्रद्युम्नसूरिभिः सहायतनानायतनवादं कुर्वाणैः सकलान्याचार्यचक्रप्रत्यक्षमोघनिर्युक्त्यादिसिद्धान्तानुसारेण सविस्तरमायतनं संस्थाप्यानायतनं निरीचक्रे ।"

तथा—

"दृष्ट्वा मोहव्यपोहं विदधत इह यान् मोहकर्त्री स्वकान्तां
श्यामां ज्ञात्वा च चन्द्रस्तदुपहतिभिया तां तनूकृत्य नूनम् ।
क्रोडीचक्रे कलङ्कच्छलत उडुवृतो व्योम्नि शून्येऽभ्रमच्च
श्रीमन्तस्तत्कपट्टे जिनपतिगुरवस्ते चकासाम्बभूवुः ॥"

—चैत्यवन्दनकुलकवृत्तौ (पृ. ९९, प्रश० श्लो० ४)

जिनपतिसूरिसत्काः कतिचित् पुस्तिका उपलभ्यन्तेऽद्यापि जेसलमेरुभाण्डागारादौ[1]। एवं प्रस्तुतस्य प्रौढविदुषो वादिविजेतुस्तस्य जिनपतिसूरेः शिष्योऽयं जिनपालोपाध्यायः ।

जिनपालस्य जन्म–दीक्षाऽऽदिसमयः सम्यग् नावबुध्यते, तथापि षट्स्थानकवृत्तिस्तेन वि. सं. १२६२ वर्षे विहिता विज्ञायत इति ततः पूर्वं विक्रमस्य त्रयोदशशताब्याः पूर्वार्धे वाऽनुमीयमानः स दोषावहो न प्रतिभाति । अनेनोपदेशरसायनविवरणरचना युग–नव–रविप्रख्ये वर्षे, चर्चरीविवृतिरचना च वेद–ग्रह–रविवर्षेऽकारीति स्पष्टं समसूचि । चर्चरी(गा. १२)विवृतौ निजं रसायनविवरणमस्मारि । युगशब्देन द्विकसङ्ख्याग्रहणमपि कर्तुं शक्यत इति विचार्यमाणे चर्चरीविवरणात् प्राग् रसायनविवरणप्रादुर्भावः प्रतिभासते ।

---

१ जेसलमेरुभां० सूच्यां प्रबोधोदयवादस्थलपरिचयोऽवलोकनीयः (अप्रसिद्ध० पृ० २८)

इत्थं चास्य कृतिक्रमः परिज्ञायते—

वि. सं. १२६२ वर्षे षट्स्थानक–वृत्तिः ।
सनत्कुमारचक्रिचरितं सटीकं महाकाव्यम् ।
वि. सं. १२९२ वर्षे उपदेशरसायन–विवरणम् ।
वि. सं. १२९३ वर्षे द्वादशकुलक–विवरणम् ।
„ „ पञ्चलिङ्गीविवरण–टिप्पनम् ।
वि. सं. १२९४ वर्षे चर्चरी–विवरणम् ।
अज्ञातरचनासमयं स्वप्नविचार–भाष्यादि ।

वि. सं. १२९५ वर्षे जिनदत्तसूरीयगणधरसार्धशतकस्य बृहद्वृत्तिकर्ता सुमतिगणिः समकालीनं स्वसतीर्थ्यमेतं जिनपालोपाध्यायमित्थं स्मरति स्म—

" नानातर्क–वितर्क–कर्कशलसद्वाणीकृपाणीस्फुरत्—
तेजःप्रौढतरप्रहारघटनानिष्पिष्टवादिव्रजाः ।
श्रीजैनागमतत्त्वभावितधियः प्रीतिप्रसन्नाननाः
सन्तु श्रीजिनपाल इत्यलमुपाध्यायाः क्षितौ विश्रुताः ॥
नानाऽलङ्कारसारं रचितकृतबुधाश्चर्यचित्रप्रकारं
नानाच्छन्दोऽभिरामं नगरमुखमहावर्णकाव्यप्रकामम् ।
दृब्धं काव्यं सटीकं सकलकविगुणं तुर्यचक्रेश्वरस्य
क्षिप्रं यैस्तेऽभिषेकाः प्रथमजिनपदाश्लिष्टपाला मुदे नः ॥"

—गणधरसार्धशतकबृहद्वृत्तौ (प्र० श्लो. १५, १६)

चन्द्रतिलकोपाध्यायेनाहङ्कारिवादिविजेतुरस्मादेव जिनपालोपाध्यायाद् नन्द्यादयागम-वाचनोपादायि । वि. सं. १३१२ वर्षे रचितं नवसहस्रश्लोकपरिमितमभयकुमारचरित्र-मपि तेनास्यैव जिनपालोपाध्यायस्य प्रेरणया व्यरचीति तत्प्रान्ते व्यक्तीचक्रे—

" भूयोभूमिभुजङ्गसंसदि मनोनानन्दविप्रं घना–
हङ्कारोद्धुरकन्धरं सुविदुरं पत्रावलम्बप्रदम् ।
जित्वा वादमहोत्सवे पुरि बृहद्वारे प्रदर्श्योच्चकै–
र्युक्तीः सङ्घयुतं गुरुं जिनपतिं यस्तोषयामासिवान् ॥

सम्यगध्याप्य निष्पाद्य यश्चान्तेवासिनो बहून् । चक्रे कुम्भ–ध्वजारोपं गच्छ–प्रासादमूर्धनि ॥
श्री**जिनपालो**पाध्यायमौलेस्तस्यास्य सन्निधौ । मयोपादायि नन्द्यादिमूलागमाङ्गवाचना ॥

× × ×

श्री**जिनपालो**पाध्यायकृतां त्रिः प्रेरणामहम् । चरित्रकरणे प्रापं सरस्वत्युपदेशवत् ॥
सुशकुनमिवास्मि तन्मन्वानो द्रढिमान्वितः । काव्याभ्यासविहीनोऽपि व्यधां काव्यमिदं ततः ॥"

—अभयकुमारचरित्रे (प्रश० ३७–४२)

वि. सं. १३२० वर्षे सन्देहदोलावलिवृत्तिकर्ता प्रबोधचन्द्रगणिश्चैनमेव जिनपालोपाध्यायं निजमागमगुरुमभ्यजिज्ञपत्—

" नृपसमिति विजितविविधप्रतिवादिवितीर्णजयपताकाऽऽढ्याः ।
जिनपालोपाध्याया आसन् यस्यागमे गुरवः ॥"—सन्देहदोलावलिवृत्तौ (प्रश०)

जिनपालस्य सतीर्थ्याः ।

(१) **जिनेश्वरसूरिः**—जिनपतिसूरेरयं पट्टधरः, अस्य परिचितिरुपरि समसूचि ।
(२) **पूर्णभद्रगणिः**—अस्य परिचयोऽकारि जेसलमेरुभां० सूच्याम् (पृ. ४९)
(३) **सुमतिगणिः**—परिचायितोऽयं जेसलमेरुभां० सूच्याम् (अप्रसिद्ध० पृ.९०)
(४) **सूरप्रभोपाध्यायः**—अस्य परिचयोऽग्रे कार्यते ।

---

(२)

सूरप्रभोपाध्यायः ।

अपभ्रंशकाव्यत्रय्यन्तर्गतायाः कालस्वरूपकुलकसंज्ञिकाया द्वात्रिंशिकाया वृत्तिकारो जिनपतिसूरिशिष्योऽयं स एवाभिज्ञायते, येन वि. सं. १२८९ वर्षे पूर्णभद्रगणिरचितं धन्य–शालिभद्रचरितं समशोधि—

" चरितमिदमखिलं निर्मलविद्याकूपारपारदृश्वानः ।
वाचकमुख्याः **सूरप्रभा**भिधाः शोधयाञ्चक्रुः ॥ "—जेसलमेरुभां० सूची ।

वि. सं. १२९५ वर्षे गणधरसार्धशतक–बृहद्वृत्तिकारः सुमतिगणिर्निजं सतीर्थ्यमेनमित्थमुपालक्षयत्—

" यद्वक्त्राम्भोज–रङ्गाङ्गणभुवि भुवि नामोगभङ्गीप्रबन्धा
नानाच्छन्दःप्रबन्धै रचितबुधमनश्चित्रचित्रप्रबन्धा ।
नर्नर्त्यु्दामकामप्रकटनविकटोत्पाटपाटप्रचारा
श्रीवाणी नर्तकीव प्रसभमभिसभं स्फारहारप्रकारा ॥

सूरप्रभाभिषेका विवेकसेकातिरेकतश्छेकाः ।
प्रपुनन्तु श्रीमन्तस्ते मच्चित्तं सुधीमन्तः ॥ "

—गणधरसार्धशतकबृहद्वृत्तौ (श्लो० १७, १८)

जिनपालोपाध्यायसतीर्थ्येनानेन सूरप्रभोपाध्यायेन स्तम्भतीर्थनगरे दिगम्बर-वादियमदण्डो विजितः । चन्द्रतिलकोपाध्यायोऽस्य पार्श्वे विद्यानन्दं पठितवान्, यो वि. सं. १३१२ वर्षेऽभयकुमारचरितं व्यरचयत्—

" सूरिं **जि**नेश्वरगुरुं जिनतीर्थयात्राऽभ्यायातसङ्घसहितं समरञ्जयद् यः ।
श्री**स्त**म्भतीर्थनगरे वरजल्पकेलौ निर्जित्य वादि**य**मदण्डादिगम्बरेशम् ॥
स श्री**सूरप्रभ**समभिधो बुद्धिधामाभिषेको
ज्ञाता नाम स्वमिव निखिला लक्षणाद्याश्च विद्याः ।
स्फायज्ज्यायस्त्वरितकवितानिर्मितौ ब्रह्मकल्पो
विद्यानन्दं शिशुमिव भृशं हेलयाऽभाणयन्माम् ॥ "

—अभयकुमारचरिते (प्रश० श्लो. ३०, ३१)

अस्य विदुषोऽन्यां कृतिं परिचितिं वा नैवोपलब्धुमपार्यमिति विरमामि ।

अपभ्रंशभाषा ।

भाषाभेदविवेचकैर्भाषासमुपासकैः संस्कृतशाब्दिकैरितरैश्च प्राज्ञैर्यस्या अपभ्रंश इति नाम परिकल्पितम्, कैश्चिच्च संस्कृतादपभ्रष्टेयमित्यादि यद्विषये प्रोद्घोषितम्; तस्याः सर्वसाधारणजनोपकारिण्या वर्तमानानां भारतवर्षीयाणां प्रायोऽशेषार्यदेशभाषाणां जननीरूपायाः प्राकृतापभ्रंशभाषाया विषये वक्तव्यमत्र प्रकाश्यते ।

प्रसिद्धमहर्षिपतञ्जलिना प्ररूपितं खल्वेतत् पाणिनीयमहाभाष्ये [१, १, १]

अपभ्रंशस्य प्राकृते समावेशः

शब्दापशब्दानामनुशासनविचारे—" भूयांसोऽपशब्दाः, अल्पीयांसः शब्दाः । एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः, तद्यथा गौरित्यस्य शब्दस्य **गावी गोणी** गोता गोपोतलिका इत्येवमादयोऽपभ्रंशाः ।" एतावता च प्रकारान्तरेण प्रख्यापितं प्राकृतशब्दानामेवापभ्रंशत्वं प्राचुर्यं च, यतस्त एव गावी–गोणी–प्रभृतयः शब्दाः प्राचीनजैनसिद्धान्तपुस्तकेषु बहुशः प्रयुक्ता दृश्यन्ते[1], चण्ड–हेमचन्द्रादिभिर्वैयाकरणैश्च निजे प्राकृतलक्षणे तेषां शब्दानां शुद्धता च निरदेशि[2] ।

तथा चापभ्रंशस्य लक्षणं प्रादर्शि कविदाण्डिना—

" आभीरादिगिरः काव्येष्वपभ्रंश इति स्मृताः ।
शास्त्रे तु संस्कृतादन्यदपभ्रंशतयोदितम् ॥ "—काव्यादर्शे [१, ३६.]

वि. सं. ११२५ वर्षे नमिसाधुश्च निर्दिशति स्म—

'तथा **प्राकृतमेवापभ्रंशः**'—रुद्रटीयकाव्यालङ्कारस्य टिप्पने [२, १२]

संस्कृतवैयाकरणैः संस्कृतशब्दानुशासनसिद्धात् संस्कृतादतिरिक्तं सर्वमप्यपभ्रंशमिति व्याहृतम्, तच्च प्रकृतिभवं प्राकृतमिति प्राकृतवैयाकरणैर्नियमितम् । एवं व्याकरणवेलया नियन्त्रितेऽपि प्राकृतजनभाषाव्यवहारस्वनपेक्ष्य शब्दशास्त्रनियमान् यथेष्टं स्वच्छन्दं प्रावर्तत, न च नियन्त्रणमधिसेहेऽत एव स विदग्धानां प्रसादेन 'अपभ्रंश'

---

१ 'खीरीणियाओ **गावी**ओ', '**गोणं** वियालं'—आचाराङ्गे [श्रु० २, उ० ४, ५]
'**गावी**ए पुण दिण्णं तणं पि खीरत्तणमुवेइ ।'—आवश्यकचूर्णौ ।
'**गोणी**णं संगेल्लं'—व्यवहारसूत्रे [उ० ४]
'वच्छग **गोणी** खुज्जा०', '**गोणी** चंदणकंथा०'—आव० नि० [गा० १३३,१३६.]
'एत्थं **गोणी**एँ दिट्ठंतो । अप्पण्हुया उ **गोणी** । **गोणि**सरिच्छो उ गुरू ।'
—दशवैकालिकवृत्तौ [पृ. ५] हरिभद्रसूरिणोद्धृतः पाठः ।

२ 'गोर् **गावी**'—चण्डकृते प्राकृतलक्षणे [२, १६]
'**गोणा**दयः'—सिद्धहेमचन्द्रशब्दानुशासने [८, २, १७४]

इति नाम्ना पप्रथे । कालक्रमेण वैयाकरणानां कृपया अपभ्रंशभाषासंज्ञयाऽपि प्रसिद्धिं प्राप । तानपि वैयाकरणनिबद्धानपभ्रंशभाषानियमानुल्लङ्घ्य प्रकृतिप्रवर्तमानो विविध-जनपदभाषाव्यवहारः सामान्यसंज्ञया 'प्राकृत' 'अपभ्रंश' इत्युच्यमानोऽपि विशिष्टतया तत्तद्देशभाषानाम्ना प्रसिद्धिं जगाहे । एवं विचार्यमाणे कथञ्चिद् भेदेनापभ्रंशनामधेयेऽपि प्राकृताङ्गभूतत्वात् तेनातीवसाम्याच्च 'प्राकृतमेवापभ्रंशः' इति वचनं नानुचितं प्रतिभाति ।

प्राकृतस्य सत्कारः

जिनवरैः प्राकृतभाषां सरलां सुगमां स्त्री–बाल–मन्दादिसर्वजनोपकृतिसमर्थां च विचार्य निजसिद्धान्तोऽर्थतस्तदद्वारैव प्रकाशितः । एतदर्थसंवादिकामिमामार्यामागमादुद्धृत्य प्रादर्शयद् वर्धमानसूरिः—

"मुत्तूण दिट्ठिवायं कालिय–उक्कालियंगसिद्धंतं ।
थी–बालवायणत्थं **पाईअ**(यय)मुइयं जिणवरेहिं ॥"–आचारदिनकरे [उ.१५]

जिनवरैरिव तदनुचरैस्तत्त्वज्ञगणधरैरपि तथैव तद्विशेषोपकारितामवधार्य तत्रैव सूत्रतो जैनसिद्धान्तरचनाऽकारि । समुपलभ्यन्ते चैतत्समर्थका नैकशः संवादाः—

" बाल–स्त्री–मूढ(मन्द)–मूर्खाणां नृणां चारित्रकाङ्क्षिणाम् ।
अनुग्रहार्थं तत्त्वज्ञैः सिद्धान्तः **प्राकृतः** स्मृ(कृ)तः ॥ "

उद्धियते स्मेदं पद्यं दशवैकालिकटीकायां [प.१०१] हरिभद्रसूरिणा, काव्यानुशासनटीकायां हेमचन्द्राचार्येण, तथा चान्यत्रान्यैरपि । जैनसिद्धान्तव्याख्यातृभिर्हरिभद्रसूरि–शीलाङ्काचार्याभयदेवसूरि–हेमचन्द्रसूरि–श्रीचन्द्रसूरि–मलयगिरिप्रभृतिभिः सूत्रपद–शब्दशुद्धिसिद्धिसूचनेऽसकृत् प्राकृतशैल्या प्राकृतलक्षणात् प्राकृतत्वाद् वेत्थमित्याद्युच्चारितम्[1] ।

राजशेखरसूरिः सं० १३८७ वर्षेऽनुवदति स्मेत्थं पूर्वपद्यम्—

" बाल–स्त्र्यादिजडप्रायभव्यजन्तुहितेच्छया ।
प्राकृतागमकर्तृभ्यो गणभृद्भ्यो नमो नमः ॥"—प्राकृतद्व्याश्रयवृत्तौ ।

---

१ मुक्त्वा दृष्टिवादं कालिकोत्कालिकाङ्गसिद्धान्तम् । स्त्री–बालवाचनार्थं **प्राकृत**मुदितं जिनवरैः ॥

२ '**प्राकृत**शैल्या बहुवचनम्, **प्राकृत**शैल्या चतुर्थ्यर्थे षष्ठी । उक्तं च—

" दुव्वयणे बहुवयणं छट्ठीविहत्तीएँ भण्णइ चउत्थी ।
जह हत्था तह पाया णमो त्थु देवाहिदेवाणं ॥"

"सप्तम्यन्तता चास्य–' ए होति अयारंते पयंमि बिइयाए बहुसु पुंलिंग ।
तइयासु छट्ठी–सत्तमीण एगंमि महिलत्थे ॥'

अस्माल्लक्षणात् सिध्यति, एवमन्यत्रापि **प्राकृत**शैल्या इष्टविभक्त्यन्तता पदानामवगन्तव्येति ।"
—आवश्यकसूत्रवृत्तौ, दशवैकालिकसूत्रवृत्तौ च (आ. समितिप्र० पृ. ११, ३२, १)
हरिभद्रसूरिः ।

विक्रमादित्यसत्कृतस्तत्समकालीनः सिद्धसेनदिवाकरः प्राकृतं जिनशासनमिति लोकोक्त्या लज्जमानः संस्कृतसिद्धान्तकरणार्थं सङ्घं व्यज्ञपयत्, किन्तु सङ्घेन तदनुचितं विचार्य प्राकृतसिद्धान्तद्वारैव बालादिसर्वजनस्य परमोपकृतिं निश्चित्य तादृक्चिन्तनेनापि परमगम्भीरसदाशयानां सुज्ञानिनां प्राकृतसिद्धान्तप्रणेतॄणां तीर्थकृद्–गणधरादीनामपमाननं वितर्क्य भविष्यल्लोकशिक्षणायापि प्रबलं प्रायश्चित्तं तस्मै व्यतारीत्यपि श्रूयते[1]

जैनसिद्धान्ते भणितिद्वयं संस्कृता प्राकृता चेत्यभाणि––

भाषाद्वये प्राकृतस्थानम्

" संकृता[2] **पागता** चेव दुहा भणितीओ आहिया ।
सरमंडलंमि गिज्जंते पसत्था **इसिभासिता** ॥"

—स्थानाङ्गसूत्रे (आ. समितिप्र० पृ. ३९४)

" सक्कया[3] **पायया** चेव भणिइओ होंति दोण्णि वा । "

––अनुयोगद्वारसूत्रे (आ. समितिप्र० पृ. १३१)

" सक्कयं[4]–**पायय**वयणाण विभासा जत्थ जुज्जते जं तु ।"

—बृहत्कल्पभाष्ये (लि. वृत्तिप. ९)

वि[5]. सं. ९६२ वर्षे सिद्धर्षिः प्रकाशयतीत्थं हार्दम्––

---

१ भद्रेश्वरसूरिः— " **उ**ज्जेणीए नयरीए महावाई महाकवी य **सि**द्धि(द्ध)सेणो नाम साहू । सो य कयाइ जंतो वाहिं दिट्ठो **वि**क्कमाइच्चराएणं चिंतिउं(यं) च–न जाणामि इमेसिं केरिसो आसीवाउ त्ति । कओ से दिट्ठिप्पणामो । लक्खिउं च तब्भावमुब्भवियहत्थेण **सि**द्धसे[णे]ण दिट्ठो(ण्णो) महासद्देणं धम्मलाभो । राएण छइल्लत्तणावज्जिएणं दव्वाविया से दव्वकोडी । भणियं च काराव रायपारिग्गहिएण **वि**क्कमाइच्चस्स वायपट्टिईए—

धम्मलाभो त्ति वुत्तम्मि दूरादुस्सियपाणिणो ।
साहुणो **सि**द्धसेणस्स दहो कोडिं निवाहिवो ॥

निवेइया य सा रायदिण्णा दि(द)व्वकोडी **सि**द्धसेणेणं गुरुस्स । तेणावि **संघ**स्स । संघेणावि कओ तीए साहारणसमुग्गओ । लज्जंतो य **पायय**ं जिणसासणं ति लोउत्तीए **सि**द्धसेण-(णो) विण्णवइ संघं– ' जइ भणह तो करेमि **सक्कयं** पि सिद्धंतं ' । संघो भणइ– " चिंतिएणावि इमेण पायच्छित्ती, किं पुण जंपिएण; ता चरसु तुमं पायच्छित्तं ॥"

—कथावल्याम् (पत्तनस्था ताडपत्रीया प्रतिः पृ. ३००)

२ संस्कृता **प्राकृता** चैव द्विधा भणिती आख्याते ।
स्वरमण्डले गीयमाने प्रशस्ता **ऋषिभाषिता** ॥

३ संस्कृता **प्राकृता** चैव भणिती भवतो द्वे वा ।

४ संस्कृत–**प्राकृत**वचनानां विभाषा यत्र युज्यते यत् तु ।

५ " संवत्सरशतनवके द्विषष्टिसहितेऽतिलङ्घिते चास्याः ।
ज्येष्ठे सितपञ्चम्यां पुनर्वसौ गुरुदिने समाप्तिरभूत् ॥ " –उ. भ. कथा ।

संस्कृता **प्राकृता** चेति भाषे प्राधान्यमर्हतः ।
तत्रापि संस्कृता तावद् दुर्विदग्धहृदि स्थिता ॥
बालानामपि सद्बोधकारिणी कर्णपेशला ।
तथापि प्राकृता भाषा न तेषामपि भासते ॥ "

—उपमितिभवप्रपञ्चाकथापीठे ।

प्राकृतभाषायाः प्राकृतकाव्यस्य च प्रशस्तत्वम्

संस्कृतकाव्यालङ्कार-च्छन्दोलक्षण-नाटकादिग्रन्थेषु पुरातनैः संस्कृतवदियंः प्राकृतभाषाऽपि समाश्रिता । तथा सुप्रसिद्धनृपसातवाहन-दण्डि-वाक्पति-राज—राजशेखर—प्राकृतमञ्जरीकार—शम्भुरहस्यकार—भूषणभट्टतनय—सिद्धर्षि—महेश्वरसूरि—जयवल्लभ—नमिसाधु—त्रिविक्रमदेवप्रभृतिभिर्भूरिभिर्भाषातत्त्ववेदिभिः प्राकृतभाषायाः प्राकृतकाव्यस्य च मधुरता मृदुता सरलता सर्वग्राह्यता सर्वोपकारिता हृदयङ्गमता च प्रोद्घोषि ।

तथाहि सातवाहनः—

प्राकृतकाव्यस्य माधुर्यम्

" अमयं **पाइयकव्वं**[1] पढिउं सोउं च जे न जाणंति ।
कामस्स तत्ततत्तिं कुणंति ते कह न लज्जंति ? ॥"

—गाथासप्तशत्याम् ।

जयवल्लभः—

" **पाइयकव्वस्स**[2] नमो **पाइयकव्वं** च निम्मियं जेण ।
ताहं चिय पणमामो पढिऊण य जे विजाणंति ॥"—वज्जालग्गे ।

कविदण्डी—

" महाराष्ट्राश्रयां भाषां प्रकृष्टं **प्राकृतं** विदुः ।
सागरः सूक्तिरत्नानां **सेतुबन्धादि** यन्मयम् ॥"

—काव्यादर्शे [१,३४]

प्राकृतमञ्जरीकारः—

" प्रसीदन्तु च वाचस्ता यासां माधुर्यमुच्छ्रितम् ।
प्राकृतच्छद्मना चक्रे **कात्यायन**महाकविः ॥
अहो ! तत् **प्राकृतं** हारि प्रियावक्त्रेन्दुसुन्दरम् ।
सूक्तयो यत्र राजन्ते सुधानिष्यन्दनिर्भराः ॥ "

—प्राकृतमञ्जर्याम् (प्राकृतप्रकाशवृत्तौ)

---

१ अमृतं **प्राकृतकाव्यं** पठितुं श्रोतुं च ये न जानते ।
कामस्य तत्त्वचिन्तां कुर्वन्ति ते कथं न लज्जन्ते ? ॥

२ **प्राकृतकाव्याय** नमः **प्राकृतकाव्यं** च निर्मितं येन ।
तांश्चैव प्रणमामः पठित्वा च ये विजानन्ति ॥

जयवल्लभः—

प्राकृतकाव्यस्य मृदुता

" पाइयकव्वुल्लावे पडिवयणं **सक्कए**ण जो देइ ।
सो कुसुमसत्थरं पत्थरेण अबुहो विणासेइ ॥
उज्झउ सक्कयकव्वं सक्कयकव्वं च निम्मियं जेण ।
वंसहरं व पलित्तं तडयडतट्टत्तणं कुणइ ॥
पाययकव्वं पढिउं गुंफेउं तह य कुज्जपसूणं ।
कुवियं च पसाएउं अज्ज वि बहवे न याणंति ॥ "

—वज्जालग्गे ।

राजशेखरः—

" पेरुसो **सक्कअ**बंधो **पाउअ**(इय)बंधो वि होइ सुउमारो ।
पुरिसाणं महिलाणं जेत्तियमिहंतरं तेत्तियमिमाणं ॥ "

—कर्पूरमञ्जरीसट्टके ।

वाक्पतिराजः—

प्राकृतस्य प्रभावः, प्राकृतादन्य-भाषानिर्गमः

" उम्मिल्लइ लायण्णं **पयय**च्छायाएँ **सक्कय**वयाणं ।
सक्कयसक्कारुक्करिसणेण **पयय**स्स वि पहावो ॥
णवमत्थदंसणं संनिवेससिसिराओ बंधरिद्धीओ ।
अविरलमिणमो आभुवणबंधमिह णवर **पयय**म्मि ॥
सयलाओ इमं वाया विसंति एत्तो य णेंति वायाओ ।
एन्ति समुद्दं चिय णेन्ति सायराओ च्चिय जलाइं ॥

---

१ **प्राकृतकाव्यो**ल्लापे प्रतिवचनं **संस्कृते**न यो ददाति ।
स कुसुमसस्तरं प्रस्तरेणाबुधो विनाशयति ॥
उज्झतु संस्कृतकाव्यं संस्कृतकाव्यं च निर्मितं येन ।
वंशगृहमिव प्रदीप्तं तडतडतट्टत्वं करोति ॥
प्राकृतकाव्यं पठितुं गुम्फयितुं तथा च कुब्जप्रसूनम् ।
कुपितं च प्रसादयितुमद्यापि बहवो न जानन्ति ॥

२ परुषः **संस्कृत**बन्धः **प्राकृत**बन्धस्तु भवति सुकुमारः ।
पुरुषाणां महिलानां यावदिहान्तरं तावदनयोः ॥

३ उन्मील्यते लावण्यं **प्राकृत**च्छायया **संस्कृत**वचसाम् (पदानाम्) ।
संस्कृतसंस्कारोत्कर्षणेन **प्राकृत**स्यापि प्रभावः ॥
नवमर्थदर्शनं संनिवेशशिशिरा बन्धर्द्धयः ।
अविरलमेतदाभुवनबन्धमिह नवरं **प्राकृते** ॥
सकला इदं वाचो विशन्ति, इतश्च निर्यान्ति वाचः ।
आयान्ति समुद्रमेव निर्यान्ति सागरादेव जलानि ॥

हरिसविसेसो वियसावओ य मउलावओ य अच्छीण ।
इह बहिहुत्तो अंतोमुहो य हिययस्स विप्फुरइ ॥"
—गउडवहे [६९, ९२–९४]

यायावरीयराजशेखरः—

" यद् **योनिः** किल **संस्कृतस्य** सुदृशां जिह्वासु यन्मोदते
यत्र श्रोत्रपथावतारिणि कटुर्भापाक्षराणां रसः ।
गद्यं चूर्णपदं पदं रतिपतेस्तत् **प्राकृतं** यद्वच—
स्तांल्लाटांल्ललिताङ्गि ! पश्य नुदती दृष्टेर्निमेषव्रतम् ॥"
—बालरामायणे [४८, ४९]

यायावरीयराजशेखरः—

प्राकृतस्य प्रचारः

' श्रूयते च **कुन्तलेषु सातवाहनो** नाम राजा, तेन **प्राकृतभाषा**-ऽऽत्मकमन्तःपुर एवेति समानं पूर्वेण ।'
—काव्यमीमांसायाम् [पृ. ५०]

भोजदेवः—

' केऽभूवन् **नाद्यराजस्य** राज्ये **प्राकृत**भाषिणः ? ।'
—सरस्वतीकण्ठाभरणे [२, १९]

भूषणभट्टतनयः—

प्राकृतभाषायां महिलानामादरः

" अइरमणीया रयणी सरओ वि मणोहरो तुमं च साहीणो ।
अणुकूलपरियणाए **मन्ने** तं नत्थि जं नत्थि ॥
ता किं पि पओसविणोअमेत्तसुहयं मणहरुल्लावं ।
साहेह अउव्वकहं सुरसं महिलायणमणोज्जं ॥
तं सु(मु)द्धमुहंबुरुहाहि(ए) वयणयं निसुणिऊण **णे** भणियं ।
कुवलयदलच्छि ! एत्थं कईहि तिविहा कहा भणिया ॥

---

१ हर्षविशेषो विकासकश्च मुकुलीकारकश्चाक्ष्णोः । इह बहिर्मुखोऽन्तर्मुखश्च हृदयस्य विस्फुरति ॥

२ अतिरमणीया रजनी शरदपि मनोहरा त्वं च स्वाधीनः ।
अनुकूलपरिजनाया मन्ये तन्नास्ति यन्नास्ति ॥
तत् किमपि प्रदोषविनोदमात्रसुखदां मनोहरोल्लापाम् ।
कथयतापूर्वकथां सुरसां **महिलाजन**मनोज्ञाम् ॥
तत् शुद्ध(मुग्ध)मुखाम्बुरुहाया वचनं निश्रुत्यानेन भणितम् ।
कुवलयदलाक्षि ! अत्र कविभिस्त्रिविधाः कथा भणिताः ॥

तं[1] जह दिव्वा तह दिव्व-माणुसी माणुसी तह चेय ।
तत्थ वि पढमेहिं कयं कईहि किर लक्खणं किं पि ॥
अन्नं **सक्कय-पायय**-संकिन्नकहा सुवन्नरइयाओ ।
पुव्वं(वुच्चं)ति महाकइपुंगवेहि तिविहाउ सुकहाउ ॥
ताणं मज्झे अम्हारिसेहिं अबुहेहिं जाउ सीसंति ।
ताउ कहाउ न लोए मयच्छि ! पावंति परिहावं ॥
ता किं मं उवहसेसि सुयणु ! असुएण सद्दसत्थेण ? ।
उल्लविय(उं) न तीरइ किं पुण वियडो कहाबंधो ? ॥
भणियं च पिययमाए पिययम ! **किं तेण सद्दसत्थेण ? ।**
जेण सुहासियमग्गो भग्गो अम्हारिसजणस्स ॥
उवलब्भइ जेण फुडं अत्थो अकयत्थिएण हियएण ।
सो चेय परो सद्दो इट्ठो किं लक्खणेणम्ह ? ॥
एमेय सुद्धजुयइं मणोहरं पाययाइ भासाए ।
पविरल**देसि**मुलक्खं कहसु कहं दिव्वमाणुसियं ॥ "

—लीलावतीकथायाम् [वि. सं. १२९५ वर्षे लि. जे. भा. ताडपत्रीया प्रतिः]

हरिभद्रसूरिः—

"निरगादि तया प्रियतम ! मम नैपुण्यं समस्ति शस्तम(त)मम् ।
पाइयवाणीए[2] तओ पढियं तह केरिसं सहइ ? ॥
रेणेऽथ कुमारेणेति सुतनु ! मा वद वदन्ति यत् कृतिनः ।
उत्तिविसेसो[3] कव्वं भासा जा हो[उ] सा होउ ॥"

---

१ तद् यथा दिव्या तथा दिव्य-मानुषी मानुषी तथैव । तत्रापि प्रथमैः कृतं कविभिः किल लक्षणं किमपि॥
अन्यत् **संस्कृत-प्राकृत**-संकीर्णकथाः सुवर्णरचिताः । उच्यन्ते महाकविपुङ्गवैस्त्रिविधाः सुकथाः ॥
तासां मध्येऽस्मादृशैरबुधैर्याः कथ्यन्ते । ताः कथा न लोके मृगाक्षि ! प्राप्नुवन्ति परिभावम् ॥
तत् किं मामुपहससि सुतनु ! अश्रुतेन शब्दशास्त्रेण । उल्लपितुं न शक्यते किं पुनर्विकटः कथाबन्धः ? ॥
भणितं च प्रियतमया प्रियतम ! **किं तेन शब्दशास्त्रेण ? ।**
येन सुभाषितमार्गो भग्नोऽस्मादृशजनस्य ॥
उपलभ्यते येन स्फुटमर्थोऽकदर्थितेन हृदयेन ।
स एव परः शब्द इष्टः किं लक्षणेनास्माकम् ? ॥
एवमेव शुद्धद्युतिं मनोहरां **प्राकृतया** (°तायां) भाषया (°षायाम्) ।
प्रविरल**देशी**मुलक्ष्यां कथय कथां दिव्य-मानुषीम् ॥

२ **प्राकृतवाण्यां** ततः पठितं तथा कीदृशं शोभते ? ।

३ उक्तिविशेषः काव्यं भाषा या भवतु सा भवतु ।

—कुमारपालभूपालमहामात्यपृथ्वीपालकारिते मल्लिनाथचरिते [लि. प. १४३]

नाट्ये स्त्रीणां पाठ्यं प्रायः प्राकृतं भवति । यदाह धनञ्जयः—

'स्त्रीणां तु **प्राकृतं** प्रायः'—दशरूपके [पारि० २,६०]

महेश्वरसूरिः—

प्राकृतकाव्यस्य प्राकृतभाषायाश्च सर्वेषां सुखबोधकता हृदयङ्गमताऽऽदि

"**सक्कयकव्व**स्सत्थं जेण न याणंति मंदबुद्धिया ।
सव्वाण वि सुहबोहं तेणेमं **पाइयं** रइयं ॥ १ ॥
गूढत्थदेसिरहियं **सुललियवन्नेहिं विरइयं रम्मं** ।
पाइयकव्वं लोए कस्स न हिययं सुहावेइ ? ॥
परउवयारपरेणं सा भासा होइ एत्थ भणियव्वा ।
जायइ जीए विबोहो सव्वाण वि बालमाईणं ॥"

—पञ्चमीमाहात्म्ये (वि. सं. १००९ वर्षे लि० जे० भां०ता०प्रतिः)

जयवल्लभः—

प्राकृतकाव्ये रस-लालित्यादि

" **पाइयकव्वम्मि रसो** जो जायइ तह व छेयभणिएहिं ।
उययस्स य वासियसीयलस्स तित्तिं न वच्चामो ॥
देसियसद्दपलोट्टं **महुरक्खरछंद**संठियं **ललियं** ।
फुडवियडपायडत्थं पाइयकव्वं पढेयव्वं ॥
ललिए महुरक्खरए जुवईयणवल्लहे ससिंगारे ।
संते **पाइयकव्वे** को सक्कइ **सक्कयं** पढिउं ? ॥"

—वज्जालग्गे (पद्यालये)

त्रिविक्रमदेवः—

" **अनल्पार्थसुखोच्चारश्शब्दसाहित्यजीवितम्** ।
स च **प्राकृत**मेवेति मतं सूक्तानुवर्तिनाम् ॥"

—प्राकृतशब्दानुशासने ।

---

१ **संस्कृतकाव्य**स्यार्थं येन न जानन्ति मन्दबुद्धयः । सर्वेषामपि सुखबोधं तेनेदं **प्राकृतं** रचितम् ॥
गूढार्थदे**शी**रहितं सुललितवर्णैर्विरचितं रम्यम् । **प्राकृतकाव्यं** लोके कस्य न हृदयं सुखयति ? ।
परोपकारपरेण सा भाषा भवत्यत्र भणितव्या ।
जायते यया विबोधः सर्वेषामपि बालकादीनाम् ॥

२ **प्राकृतकाव्ये** रसो यो जायते तथा च छेकभणितैः । उदकस्य च वासितशीतलस्य तृप्तिं न व्रजामः ॥
देशीशब्दपर्यस्तं मधुराक्षर-च्छन्दःसंस्थितं ललितम् । स्फुटविकटप्रकटार्थ **प्राकृतकाव्यं** पठितव्यम् ॥
ललिते मधुराक्षरे युवतिजनवल्लभे सशृङ्गारे । सति **प्राकृतकाव्ये** कः शक्नोति **संस्कृतं** पठितुम् ? ॥

वि'. सं. ११२९ वर्षे नमिसाधुः—

प्राकृतस्य व्याख्या, विशालता च

" सकलजगज्जन्तूनां व्याकरणादिभिरनाहतसंस्कारः सहजो वचनव्यापारः प्रकृतिः, तत्र भवं सैव वा **प्राकृतम्**। ' आरिसवयणे सिद्धं देवाणं **अद्धमागहा** वाणी ' इत्यादिवचनाद् वा प्राक् पूर्वं कृतं **प्राक्कृतं बाल-महिलाऽऽदिसुबोधं सकलभाषानिबन्धनभूतं वचनमुच्यते।** मेघनिर्मुक्तजलमिवैकस्वरूपं तदेव च देशविशेषात् संस्कारकरणाच्च समासादितविशेषं सत् संस्कृताद्युत्तरविभेदानाप्नोति। अत एव शास्त्रकृता **प्राकृत**मादौ निर्दिष्टम्, तदनु संस्कृतादीनि।

पाणिन्यादिव्याकरणोदितशब्दलक्षणेन संस्करणात् **संस्कृत**मुच्यते। तथा **प्राकृत**भाषैव किञ्चिद्विशेषलक्षणान्**मागधिका** भण्यते। तथा **प्राकृत**मेव किञ्चिद्विशेषात् **पैशाचिकम्**। **सू(शौ)रसेन्य**पि **प्राकृतभाषैव**। तथा **प्राकृतमेवापभ्रंशः**"

—रुद्रटीयकाव्यालङ्कारटिप्पने [२, १२]

प्राकृतनिन्दा-परिहारः

" को विनिन्देदिमां भाषां भारतीमुग्धभाषितम्?।
यस्याः **प्रचेतसः पुत्रो** व्याकर्ता भगवान् ऋषिः॥
प्राकृतं चार्षमेवेदं यद्भि **वाल्मीकि**शिक्षितम्।
तदनार्षं भवे(णे)द् यो वै प्राकृतः स्यात् स एव हि॥"

—शम्भुरहस्ये [प. १७, १८]

" अन्यदा कोऽपि मत्सरी श्री**हेम**सूरितेजोऽसहिष्णुरेकान्ते राजानमिदमवादीत्—' देव! प्रायः **प्राकृत**मेते पठन्ति सिद्धान्तोऽप्येतेषां **प्राकृत**मयः। तत् प्रभाते [ऽ] श्रोतव्यमिदम्। ' **संस्कृतं** स्वर्गिणां भाषा ' सैव महतां प्रत्यूषे श्रोतव्या श्रेयस्करी चेति किमर्थं प्रथमं तच्छ्रवणं विधीयते?।'

एतदाकर्ण्य राजा विज्ञातभाषाभेदतत्त्वः किञ्चित् **प्राकृते** कृतादरस्तत्स्वरूपं श्रीगुरूणामकथयत्। श्रीगुरवः प्राहुः—अनुपासितसद्गुरुकुलस्य, अज्ञातवाङ्मयतत्त्वस्य कस्यापीदं वचः। राजन्! अनेकधा भाषाभेदवैचित्र्येऽपि परं युगादौ प्रथमपुरुषेण ज्ञातत्रैलोक्यस्वरूपेण प्रथमं चतुर्दशस्वराष्टत्रिंशद्व्यञ्जनरूपा द्विपञ्चाशदक्षरप्रमाणा मातृकैवोपदिष्टा। सा च **प्राकृत**स्वरूपा सर्वप्राकृतलोकानामुपकारिणीति।

---

१ ' पञ्चविंशतिसंयुक्तैरेकादशसमाशतैः। विक्रमात् समतिक्रान्तैः प्रावृषीदं समर्थितम्॥'—रु.टि.

ततो बाह्या येऽष्टत्रिंशद् वर्णास्तैः संस्कारे कृते **संस्कृतं** जातम्। ततश्च अनेके भाषाभेदा अभूवन्। तेन सकलशास्त्रमूलं मातृकारूपं **प्राकृत**मेव प्रथमम्। युगादौ सर्वज्ञैरिति लोकोपचा(का)राय प्रथमं **प्राकृत**मुपदिष्टम्। सर्वाक्षरसंनिपातलब्धीनां श्रीद्वादशाङ्गीनिर्माणसूत्रधाराणां श्रीगणधराणां सिद्धान्त**प्राकृत**करणे कारणमिदम्—

'बाल-स्त्री-मूढ-मूर्खाणां नृणां चारित्रकाङ्क्षिणाम्।
अनुग्रहार्थं तत्त्वज्ञैः सिद्धान्तः **प्राकृतः** कृतः॥'

राजन्! भाषा भवतु याऽपि साऽपि, परं तु परमार्थ एव विलोक्यते। यत् पठन्ति लोकाः—

'अत्थनिवेसो त च्चिय सद्दा त च्चेव परिणमंता वि॥
उत्तिविसेसो कव्वं भासा जा होउ सा होउ॥'[1]

परं कस्यापि ज्ञानलवदुर्विदग्धस्य खण्डखण्डपाण्डित्यतुण्डकण्डूकरालितस्येयं **प्राकृत**निन्दा। यदुक्तम्—

'सोहेइ[2] सुहावेइ उवभुंजंतो लवो वि **लच्छी**ए।
एसा(देवी) **सरस्सई** पु(उ)ण असमग्गा कं न(किंपि) विनडेइ॥'

[गउडवहे गा. ६८]

इति श्रुत्वा राजादयः सर्वेऽपि **प्राकृत**प्रशंसां कुर्वन्तो विशिष्य तदर्थश्रवणप्रवणा बभूवुः॥"

—कुमारपालप्रबन्धे (वि.सं. १४७९ वर्षे लि.पत्तनजैनभा० प्रतिप.८१)

प्राकृतभाषा किम् संस्कृतभाषाया विकृतिरूपा?

[3]कोचिदावेदयन्ति-"प्राकृतभाषा संस्कृतभाषाया विकृतिरूपा ततोऽपभ्रंश्य समुत्पन्ना यतः शाब्दिकश्चण्डो निजे प्राकृतलक्षणे 'संस्कृतयोनि' इति प्राकृतस्य प्रकारं लक्षितवान्। तथा प्रतिष्ठितप्रामाणिकहेमचन्द्राचार्योऽपि निजे प्राकृतशब्दानुशासने 'अथ प्राकृतम्' [८, १, १] इत्यस्य स्वोपज्ञव्याख्यायाम्-'प्रकृतिः संस्कृतम्। तत्र भवं तत आगतं वा प्राकृतम्।' इति व्याख्यातवान्। एवमन्येऽप्यूचुः। यथा कविदण्डी—

'संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः। **तद्भ**वस्तत्समो देशीत्यनेकः **प्राकृत**क्रमः॥'

—काव्यादर्शे [१, ३३]

---

१ अर्थनिवेशः स एव शब्दास्त एव परिणमन्तोऽपि। उक्तिविशेषः काव्यं भाषा या भवतु सा भवतु॥

२ शोभते सुखयत्युपभुज्यमानो लवोऽपि **लक्ष्म्याः**। एषा **सरस्वती** पुनरसमग्रा कं न विनटयति?॥

३ ई. बी. कॉवेलप्रभृतिमहाशयाः प्राकृतप्रकाशप्र तावनाऽऽदिषु।

तथा वाग्भटः--

'संस्कृतं स्वर्गिणां भाषा शब्दशास्त्रेषु निश्चिता। **प्राकृतं तज्ज**-तत्तुल्य-देश्यादिकमनेकधा॥'

--काव्यालङ्कारे [२, २]

तथा चान्ये—

' प्रकृतेः **संस्कृतायास्तु विकृतिः प्राकृती** मता। '

—रूपकपरिभाषायाम्।

' तद्भवा **संस्कृतभवा** सिद्धा साध्येति सा द्विधा। '

— षड्भाषाचन्द्रिकायाम्।

इत्यादयोऽनेक उल्लेखा उपलभ्यन्ते।''

चिन्त्यं खल्वेतत् सुसूक्ष्मचिन्तनशीलैः प्रेक्षावद्भिः, शाब्दिकानां सदाशयस्तैर्नैव सम्यग् व्यचारि वा नैव समवबोधीति ज्ञायते। संविदितं खलु लक्षणप्रवृत्तिर्लक्ष्यदर्शनपूर्विका भवति। लाक्षणिकैः शाब्दिकैः केवलं लक्ष्यदृष्टानां प्राक्सिद्धानामेव शब्दानामनुशासनं क्रियते। तैश्च व्युत्पित्सूनां तत्तद्भाषाशब्दज्ञानार्थं वर्णानुपूर्वीदार्ढ्याय च व्याकरणपद्धत्या प्रकृति-प्रत्यय-लोपागमादेश-वर्णविकारादिसूचनपूर्वं पदान्वाख्यानं क्रियते। तदपि भिन्नभिन्नवैयाकरणैर्भिन्न-भिन्नप्रकारेण द्योत्यते। एवं शब्दशुद्धि-सिद्धिज्ञापने तदैव तथैव वा भाषाशब्दोत्पत्तिर्जातेति मन्तव्यं न चौचित्यमञ्चति। अद्यावधि भिन्न-भिन्नजनपदेषु प्रयुज्यमानाः सहस्रशोऽपि प्राकृताः शब्दाः वर्षसहस्रद्वयादपि प्राग्भवेषु जैनसिद्धान्तसूत्रेषु कथा-नाट्यप्रभृतिषु च प्रयुक्तास्तथैव किञ्चिदिव परावृत्ताश्च दृश्यन्ते।

पाणिनीयभाष्यकारेण पतञ्जलिना यथा ' सिद्धे शब्दार्थसम्बन्धे ' संस्कृतशब्दानामनुशासनप्रवृत्तिरसूचि तथैव प्राकृतशब्दानां सिद्धतां विचार्य तत्संसूचनाय शाब्दिकचण्डेन ' सिद्धं प्राकृतं त्रेधा ' इति सूत्रं प्राकृतलक्षणप्रारम्भे व्यरचि।

वररुचिर्निजे प्राकृतप्रकाशे ' प्रकृतिः शौरसेनी ' [१०, २; ११, २] ' शौरसेनी। प्रकृतिः संस्कृतम् ' [१२, १, २] इत्यादीनि सूत्राणि निर्मितवान्। भामहेन च मनोरमायां तद्व्याख्येत्थमदर्शि—' अस्याः पैशाच्याः प्रकृतिः शौरसेनी। स्थितायां शौरसेन्यां पैशाचीलक्षणं प्रवर्तयितव्यम्। अस्या मागध्याः प्रकृतिः शौरसेनीति वेदितव्यम्।' एवं हेमचन्द्राचार्यादिभिरपि प्राकृतस्य प्रकृतिः संस्कृतमित्युच्चारितेऽपि तथैव वेदितव्यं भवति—' स्थिते संस्कृते प्राकृतलक्षणं प्रवर्तयितव्यम् ' सिद्धां साध्यमानां च संस्कृतप्रकृतिमुपादाय तत्र प्रत्यय-लोपागम-वर्णविकारादेशादिविभागदर्शनेन लक्षणपद्धत्या लक्ष्यदृष्टानां सिद्धानां प्राकृतशब्दानां ज्ञानं कर्तव्यम्। संस्कृतभाषायामेतादृशः शब्दास्ते च प्राकृतभाषायामेतादृशः,तत्र चैतावान् भेद इति ज्ञातव्यमयमाशयः। न चैतावता प्राकृतभाषा

संस्कृतभाषातः प्रादुर्भूतेत्याम्नातम्। ततः खलु लक्षणेऽपि केचिच्छब्दाः संस्कृतप्रकृतित्वेन, न सिध्यन्ति, लक्ष्येषु च दृश्यन्ते, तेषां शुद्धताज्ञापनाय 'दाढादयो बहुलम्' [परि० ४, ३४] इति सूत्ररचना प्राकृतप्रकाशे कृता विलोक्यते। भामहेन तदित्थं व्याख्यातम् 'आदिशब्दोऽयं प्रकारे तेन सर्व एव देशसङ्केतप्रवृत्तभाषाशब्दाः परिगृहीताः' इत्युक्तम्। प्राकृतमञ्जर्यां प्राकृतप्रकाशस्य पद्यविवृतौ च तदित्थं विवेचितम्—

"एषामपरिमेयत्वाद् दाढाऽऽदीनां पदं प्रति। न शक्या गणना वीचीर्गणयेत् को नु सागरे?॥
याः सर्वलोकसामान्याः संस्कृतान्विता गिरः। अङ्गमङ्गप्रभृतयस्ताश्चाप्यत्रैव दर्शयेत्॥
संस्कृतप्रकृतित्वेन ये न सिध्यन्ति केवलम्। तेषां लक्ष्येषु शब्दानां दाढादित्वं विमृश्यताम्॥"

संस्कृतयोनि—संस्कृतभव—तज्जप्रभृतिशब्दानामप्याकूतमितोऽन्यद् वितर्क्यमाणं न समीचीनमाभाति। मानवानां सहजवचनव्यापाररूपप्रकृतिभवाः स्वभावसिद्धाः प्राग्भवा अपि प्राकृतशब्दास्तत्र तत्र शब्दानुशासने तु संस्कृतप्रकृतिमुपादाय संस्कृतसंस्कारोत्कर्षणपूर्वं ज्ञापिता यावत् प्रदर्शिता एवं च संस्कृतप्रकृतौ साधिता अत एवोपचारात् ते तत्र संस्कृतयोनयः संस्कृतभवाः संस्कृतजा इत्यादिरूपेणोच्चार्यन्ते, परमार्थतस्तु ते प्रागेव सिद्धाः। अत एव वाक्पतिराजेन गौडवधे—'सकलाश्चेमा वाचः प्राकृतमहार्णवाद् निर्यान्ति, तत्रैव च प्रविशन्ति' इत्याद्युदगारि, यायावरीयराजशेखरेण काव्यमीमांसायाम्—'तद्योनिः किल संस्कृतस्य' इत्यादि वदता तदेवासूचि, नमिसाधुना रुद्रटीयकाव्यालङ्कारस्य टिप्पनेऽपि च तथा व्याख्यायि [भूमिका पृ० ८०].

हेमचन्द्राचार्यस्याशयोऽस्मादन्यथा न सम्भाव्यते। येन हेमचन्द्राचार्येण निजे प्राकृतशब्दानुशासने उदाहृतिनिदर्शने जैनसिद्धान्तसूत्रपाठा उदाहार्यन्त, तत्प्रणेतॄणां सर्वेषां तीर्थङ्कराणां च भाषा प्राकृतापरसंज्ञाऽर्धमागधी[2] भवतीति स्वोपज्ञालङ्कारचूडा-

---

१ 'उसभमजिअं च वन्दे'—नामस्तवे [हैम. ८।१।२४]
'देवं नाग-सुवण्ण-'—श्रुतस्तवे [हैम. ८।१।२६]
'लोगस्सुज्जोअगरा'—नामस्तवे [हैम. ८।१।१७७]
'चउवीसं पि जिणवरा'—नामस्तवे [हैम. ८।३।१३७]
'तेणं कालेणं तेणं समएणं'—कल्पसूत्रे [हैम. ८।३।१३७]

२ "अकृत्रिमस्वादुपदां परमार्थाभिधायिनीम्। सर्वभाषापरिणतां जैनीं वाचमुपास्महे॥
एकरूपाऽपि हि भगवतोऽर्धमागधीभाषा वारिदविमुक्तवारिवदाश्रयानुरूपतया परिणमति।"
—काव्यानुशासने [१,१]

'वाणी भाषा **अर्धमागधी** नर-तिर्यक्-सुरलोकभाषया संवदति तद्भाषाभावेन परिणमतीत्येवंशीला।' —हैमीनाममालायाम् [१,५९]

मणिसमुपेते काव्यानुशासने स्वोपज्ञाभिधानचिन्तामणिवृत्त्युपेतायां नाममालायां च प्रत्य पादि, अनादिप्रवृत्तप्राकृतभाषाविशेषो देशीति देशीनाममालायां प्रादर्शि, प्रमाणमी· मांसायां विद्यानामनादित्वं न्यरूपि, इमाः सकला वाचः प्राकृतमहार्णवाद् निर्गता इति निरूपयितुर्वाक्पतिराजस्य कृतेर्गौडवधस्योदाहरणानि च निजे प्राकृतशब्दानुशासने न्यदर्शिषत; तस्याशयो यथा 'प्राकृतभाषा संस्कृतभाषातः समुत्पन्ना' इति कल्प्यते तथा नैव सम्भावयामः, प्रत्युत तेन प्राकृतभाषायाः प्राग्भवत्वं प्रत्यष्ठापि, तच्च कुमारपालप्रबन्धत उद्धृत्योपरि समटङ्कि। अत्र विषये बहु वक्तव्यमपि भूमिकाया विस्तार· भयादियताऽपि विरम्यते।

अर्धमागधी भाषा

जिनवर–गणधरैर्निजसिद्धान्तः प्राकृतभाषायां प्राणायीति प्राक् प्रमाणपूर्वं प्रादर्शयम्। ऋषीणां चेदं प्राकृतमार्षप्राकृत· संज्ञयाऽप्युच्यते। सामान्यप्राकृतात् किञ्चिद्वैशिष्ट्योपेतं चैतादृग् अर्धमागधीभाषानाम्ना पुरातनैर्व्याहारि। जैनसिद्धान्तादिगतोल्लेखदर्शनेन परिज्ञायते खल्वर्धमागधीभाषायाः प्रतिष्ठा। अन्तिमस्तीर्थकृद् भगवान् महावीरस्तथाऽन्येऽपि सर्वे तीर्थङ्करा अस्यामेव भाषायां धर्ममुपदिशन्ति स्म। पुराणं जैनसिद्धान्तसूत्रमेतद्भाषानियतमाम्नायते। देवा अप्येतां भाषां भाषन्ते। एषैव भाषा भाष्यमाणाऽन्यभाषाभ्यो विशिष्यते। भाषाऽऽर्याश्चै· तस्यां भाषायां भाष्यमाणायां भाष्यन्ते। संस्कृतप्रधाने नाट्ये चेट–राजपुत्र–श्रेष्ठिप्रभृतीनां पाठ्यत्वेनास्या एव नियोजना निरदेशि तद्विदैः। एतत्प्रतिष्ठापका उल्लेखाश्चेमे—

---

१ "देसविसेसपसिद्धीइ भण्णमाणा अणंतया हुंति।
तम्हा **अणाइपाइयपयट्टभासाविसेसओ** देसी॥
स्वोपज्ञव्याख्या—तस्मादनादिप्रवृत्तप्राकृतभाषाविशेष एवायं देशीशब्देनोच्यते।"
—देशीनाममालायाम् [४]

२ "ननु यदि भवदीयानीमानि जैनसिद्धान्तसूत्राणि, तर्हि भवतः पूर्वं कानि किमीयानि वा तान्यासन्निति।

अत्यल्पमिदमन्वयुङ्क्थाः, पाणिनि–पिङ्गल–कणादाक्षपादादिभ्योऽपि पूर्वं कानि किमीयानि वा व्याकरणादिसूत्राणीत्येतदपि पर्यनुयुङ्क्ष्व।

अनादय एवैता विद्याः संक्षेप–विस्तरविवक्षया नव–नवीभवन्ति, तत्तत्कर्तृकाश्चोच्यन्ते। किं नाश्रौषीर्न कदाचिदनीदृशं जगदिति॥" —प्रमाणमीमांसायाम्।

३ 'हेट्ठट्ठियसूरनिवारणाय—'[गउडवहे गा. १५; हैम. ८।४।४४८]
'अत्थालोअणतरला—' [गउडवहे गा. ८६; हैम. ८।१।७]
'उवमासु अपज्जत्तेभ–' [गउडवहे गा. १८८; हैम. ८।१।७]
'विससिजन्तमहापसु–' [गउडवहे गा. ३१९; हैम. ८।१।८]

समवायाङ्गसूत्रे—

अर्हद्देशना-भाषा

"भगवं च णं **अद्धमागहीए भासाए** धम्ममाइक्खइ । सा वि य णं **अद्धमागही भासा** भासिज्जमाणी तेसिं सव्वेसिं आरियमणारियाणं दुप्पय–चउप्पय–मिय–पसु–पक्खि–सरीसिवाणं अप्पप्पणो हिय–सिव–सुहदायभासत्ताए परिणमइ ।" —[स्था. ३४ आ. समितिप्र० पृ. ६०]

औपपातिकसूत्रे—

"**अद्धमागहाए** भासाए भासति अरिहा धम्मं ।"

"तए णं समणे भगवं **महावीरे** कूणिअस्स भंभसारपुत्तस्स **अद्धमागहाए** भासाए भासति ।" —[आ. स. पृ. ३४, ७७]

महावीरनिर्वाणात् ५३० (वि. सं. ६०) वर्षे[४] विमलसूरिः—

"आयेरिससमा धरणी जायइ इह **अद्धमागही वाणी** ।
तो **अद्धमागहीए भासाए** सव्वजीवहियजणणं ।
जलहरगंभीररवो कहेइ धम्मं जिणवरिंदो ॥"

—पउमचरिए [प. ५, ६, उ. २; गा. ३४, ६१]

हेमचन्द्राचार्यः—

"वाणी नृ–तिर्यक्–सुरलोकभाषासंवादिनी ।
स्वो० व्या० [तीर्थङ्कराणां] वाणी भाषा **अर्धमागधी** नर–तिर्यक्–सुरलोकभाषया संवदति तद्भाषाभावेन परिणमतीत्येवंशीला ।"

—अभिधानचिन्तामणिनाममालायाम् [का० १, श्लो० ५९]

---

१ भगवांश्च किलार्धमागध्यां भाषायां धर्ममाख्याति । साऽपि च किलार्धमागधी भाषा भाष्यमाणा तेषां सर्वेषामार्यानार्याणां द्विपद–चतुष्पद–मृग–पशु–पक्षि–सरीसृपाणामात्मात्मनो हित–शिव–सुखदायभाषातया परिणमति ।

२ अर्धमागध्यां भाषायां भाषतेऽर्हन् धर्मम् ।

३ ततः किल श्रमणो भगवान् महावीरः कूणिकस्य भम्भासारपुत्रस्य अर्धमागध्यां भाषायां भाषते ।

४ "पंचेव य वाससया दुसमाए तीसवरिससंजुत्ता । वीरे सिद्धिमुवगए तओ निबद्धं इमं चरियं ॥ राहूनामायरिओ ससमयपरसमयगहियसब्भावो । विजओ य तस्स सीसो नाइलकुलवंसनंदियरो ॥ सीसेण तस्स रइयं राहवचरियं तु सूरिविमलेणं । सोऊणं पुव्वगए नारायण–सीरिचरियाइं ॥"

—जै. ध. प्र. सभया प्रकाशिते ।

५ आदर्शसमा धरणी जायते इहार्धमागधी वाणी ।
ततोऽर्धमागध्यां भाषायां सर्वजीवहितजननम् । जलधरगम्भीररवः कथयति धर्मं जिनवरेन्द्रः॥

"एकरूपाऽपि हि भगवतोऽर्धमागधीभाषा वारिदविमुक्तवारिवदाश्रयानुरूपतया परिणमति" इत्यादि । —स्वोपज्ञकाव्यानुशासनवृत्तौ [श्लो० १]

वाग्भटः—

" सर्वार्धमागधीं सर्वभाषासु परिणामिनीम् ।
सर्वेषां सर्वतो वाचं सार्वज्ञीं प्रणिदध्महे ॥ " —काव्यानुशासने ।

पारिष्ठापनिकाविधौ—

जैनसूत्रभाषा

" पुव्वावरसंजुत्तं वेरग्गकरं सतंतमविरुद्धं ।
पोराणमद्धमागहभासानिययं हवइ सुत्तं ॥ "

—आवश्यकसूत्रे [दे. ला. प्र. प. १२८]

हेमचन्द्राचार्यः—

'पोराणमद्धमागहभासानिययं हवइ सुत्तं' इत्यादिना आर्षस्य अर्धमागधभाषानेयतत्वमाम्नायि वृद्धैस्तदपि प्रायोऽस्यैव विधानात् न वक्ष्यमाणलक्षणस्य ।

—[है. प्रा. ८।४।२८७]

भगवतीसूत्रे—

देव-भाषा विशिष्टा भाषा

" देवा[1] णं भंते ! कयराए भासाए भासंति ? । कयरा वा भासा भासिज्जमाणी विसिस्सइ ? । गोयमा ! देवा णं अद्धमागहाए भासाए भासंति । सा वि य णं अद्धमागही भासा भासिज्जमाणी विसिस्सइ ।

—[श० ५, उ० ४, सू. १९१ आ. स. पृ. २३१]

नमिसाधुरुद्धरतीदं प्राचीनं पद्यम्—

" आरिसवयणे सिद्धं देवाणं अद्धमागही वाणी । "—रु. टिप्पने ।

प्रज्ञापनासूत्रे—

भाषाऽऽर्याणां भाषा

से किं तं भासारिया ? । भासारिया जे णं अद्धमागहाए भासाए भासंति । जत्थ वि य बंभी लिवी पवत्तइ ।

—[आ. स. पृ. ९६]

---

१ पूर्वापरसंयुक्तं वैराग्यकरं स्व(स)तन्त्रमविरुद्धम् । पुराणमर्धमागधभाषानियतं भवति सूत्रम् ॥

२ देवा ननु भगवन् ! कतरायां भाषायां भाषन्ते ?, कतरा वा भाषा भाष्यमाणा विशिष्यते ?। गौतम ! देवाः किलार्धमागध्यां भाषायां भाषन्ते । साऽपि च किलार्धमागधी भाषा भाष्यमाणा विशिष्यते ।

३ आर्षवचने सिद्धं देवानामर्धमागधी वाणी ।

४ अथ के ते भाषाऽऽर्याः ? । भाषाऽऽर्या ये किलार्धमागध्यां भाषायां भाषन्ते । यत्रापि च ब्राह्मी लिपिः प्रवर्तते ।

भरतमुनिः—

नाट्ये पाठ्या भाषा

" मागध्यवन्तिजा प्राच्या शूरसेन्यर्धमागधी ।
वाल्हीका दाक्षिणात्या च सप्त भाषाः प्रकीर्तिताः ॥ "
" चेटानां राजपुत्राणां श्रेष्ठिनां चार्धमागधी[1] । "

—नाट्यशास्त्रे [अ. १७, श्लो० ४८,९०]

शकसं. ५९८ (वि. सं. ७३३) वर्षे जिनदासमहत्तरः—

अर्धमागधी-शब्दव्याख्या

" मगहद्धविसयभासानिबद्धं अद्धमागहं[3] । अहवा अट्ठारसदेसीभासा-णियतं अद्धमागधं । " —निशीथचूर्णौ ।

वि. सं. ११२०–८ वर्षे अभयदेवसूरिः—

" अद्धमागहीय त्ति ' प्राकृता[2]दीनां षण्णां भाषाविशेषाणां मध्ये या मागधी नाम भाषा ' रसोर्लशौ मागध्याम् ' इत्यादिलक्षणवती सा असमाश्रितस्वकीयसमग्रलक्षणा ' अर्धमागधी ' इत्युच्यते । " —समवायाङ्गसूत्रवृत्तौ [पृ. ९८]

" रसोर्लशौ मागध्याम् ' इत्यादि यन्मागधभाषालक्षणं तेनापरिपूर्णा प्राकृत-[भाषालक्षण]बहुला ' अर्धमागधी ' इत्युच्यते । " —औपपातिकसूत्रवृत्तौ ।

" मागधभाषालक्षणं किञ्चित् किञ्चिच्च प्राकृतभाषालक्षणं यस्यामस्ति सा ' अर्ध मागध्याः ' इति व्युत्पत्त्या अर्धमागधी । " —भगवतीसूत्रवृत्तौ ।

मलयगिरिः—

"अतः सौ पुंसि' इति मागधिकभाषालक्षणात् सर्वमपि हि प्रवचनमर्धमागधिक-भाषाऽऽत्मकम्, अर्धमागधिकभाषया तीर्थकृतां देशनाप्रवृत्तेः ।" —नन्दीसूत्रवृत्तौ ।

मार्कण्डेयः—

"शौरसेन्या अदूरत्वाद् इयमेवार्धमागधी ।" —प्राकृतसर्वस्वे [पृ. १०३]

---

१ भरतमुनिप्रणीते नाट्यशास्त्रेऽभिनवगुप्तविरचितायामभिनवभारत्यां तट्टीकायां चार्धमागधी-संज्ञिकाया गीतेर्विषयोऽपि विवेचितः (गा. ऑ. सिरीझ प्र. अ. ५, पृ. २५५–२५७) जिज्ञासुना द्रष्टव्यः ।

२ जिनदासमहत्तरकृता नन्द्यध्ययनचूर्णिः शकसं. ५९८ वर्षेषु समाप्तेति तत्प्रान्ते पठ्यते— " सकराइओ पंचसु वर्षशतेषु व्यतिक्रांतेषु अष्टनवतिषु नंद्यध्ययनचूर्णी समाप्ता । "

—पत्तनभां० सूची ।

३ मगधार्धविषयभाषानिबद्धमर्धमागधम् । अथवाऽष्टादशदेशीभाषानियतमर्धमागधम् ।

क्रमदीश्वरः—

" महाराष्ट्रीमिश्राऽर्धमागधी । " —संक्षिप्तसारे [पृ. ३८, सू. ९७]

अष्टादश देशीभाषाः

जिनदासमहत्तरेणार्धमागध्या अष्टादशदेशीभाषानियतत्वमसूचि, तथा जैनसिद्धान्तेऽपि राजकुमार–गणिकाऽऽदीनामष्टादशदेशीभाषाविशारदत्वं व्यावर्णि । ततो ज्ञायते खलु भारतवर्षेऽष्टादशदेशीभाषाणां प्राक् प्रतिष्ठा ।

तथा च ज्ञातसूत्रे—

" तते[1] णं से **मेहे** कुमारे बावत्तरिकलापंडिए णवंगसुत्तपडिबोहिए **अट्ठारसविहि(इ)प्पयारदेसिभासा**विसारए गीयरई गंधव्वणट्टकुसले ××। "

" तत्थ[2] णं **चंपाए** णयरीए **देवदत्ता** णामं गणिया परिवसइ चउसट्ठिकलापंडिया चउसट्ठिगणियागुणोववेया अउणत्तीसविसेसरममाणी एक्कवीसंरइगुणप्पहाणा बत्तीसंपुरिसोवयारकुसला णवंगसुत्तपडिबोहिया **अट्ठारसदेसीभासा**विसारया सिंगारागारचारुवेसा ××। "

—[ओ. इ. ता. प. २९,७१; आ. समितिप्र० ३८,९२]

विपाकश्रुते—

"तत्थ[3] णं **वा**णियगामे **कामज्झया** नामं गणिया होत्था बावत्तरिकलापंडिया चउसट्ठिगणियागुणोववेया एगूणतीसविसेसे रममाणी एक्कवीसरतिगुणप्पहाणा बत्तीसपुरिसोवयारकुसला णवंगसुत्तपडिबोहिया **अट्ठारसदेसीभासा**विसारया सिंगारागारचारुवेसा गीयरई गंधव्वनट्टकुसला ।

—[अ. २, सू. ८, आ. समिति. पृ. ४९]

औपपातिकसूत्रे—

"तए[4] णं से **दढपइण्णे** दारए बावत्तरिकलापंडिए नवंगसुत्तपडिबोहिए **अट्ठारस-**

---

१ ततः खलु स मेघः कुमारो द्वासप्ततिकलापण्डितो सुप्तप्रतिबोधितनवाङ्गोऽष्टादशविधदेशीभाषाविशारदो गीतरतिर्गान्धर्व–नाट्यकुशलः * * ।

२ तत्र खलु **चम्पायां** नगर्यां **देवदत्ता नाम** गणिका परिवसति चतुःषष्टिकलापण्डिता चतुष्षष्टिगणिकागुणोपपेता एकोनत्रिंशद्विशेषरममाणा एकविंशतिरतिगुणप्रधाना द्वात्रिंशत्पुरुषोपचारकुशला सुप्तप्रतिबोधितनवाङ्गा **अष्टादशदेशीभाषाविशारदा** शृङ्गारागारचारुवेषा ।

३ तत्र खलु **वाणिजग्रामे** **कामध्वजा** नाम गणिकाऽभूत् द्वासप्ततिकलापण्डिता चतुःषष्टिगणिकागुणोपपेता एकोनत्रिंशद्विशेषरममाणा एकविंशतिरतिगुणप्रधाना द्वात्रिंशत्पुरुषोपचारकुशला सुप्तप्रतिबोधितनवाङ्गा **अष्टादशदेशीभाषाविशारदा** शृङ्गारागारचारुवेषा गीतरति–गान्धर्वनाट्यकुशला * * ।

४ तत्र खलु स दृढप्रतिज्ञो दारको द्वासप्ततिकलापण्डितो नवाङ्गस्रोतःप्रतिबोधकोऽष्टादशदेशीभाषाविशारदो गीतरतिर्गान्धर्वनाट्यकुशलः * * ।

देसीभासाविसारए गीयरती गंधव्वणट्टकुसले।" —[आ. समितिप्र० प. ९८]

राजप्रश्नीयसूत्रे—

"तए णं से **दढपतिण्णे** दारए उम्मुक्कबालभावे विण्णायपरिणयमित्ते जोव्वणगमणुपत्ते बावत्तरिकलापंडिए **अट्ठारसविहदेसिप्पगारभासा**विसारए णवंगसुत्तपडिबोहए गीयरई गंधव्वनट्टकुसले सिंगारागारचारुवेसे * *।"

—[आ. समितिप्र० प. १४८]

कुवलयमालाकथायाम्—

विक्रमीयनवमशताब्दीपूर्वार्धभवायां कुवलयमालाकथायामष्टादशदेशीभाषाणां दिग्दर्शनं कारितं तत्तद्देश्यानां वर्ण—वपुर्वेष—प्रकृतिप्रदर्शनपुरःसरम्। परिचेतव्यः खलु प्राक् कुवलयमालाकथा—कर्तृ—समयादिसम्बन्धो यतोऽवसीयतेऽपभ्रंश—देशीभाषाऽऽदीनां विशिष्टं स्वरूपम्। क्षत्रियराजकुलोत्पन्नेनाचार्योद्योतनेन दाक्षिण्यचिह्नसूरिणा जावालिपुरे निजविद्यागुरुवीरभद्रकारिते ऋषभजिनेन्द्रायतने स्थित्वा शककाले एकदिनोनेषु सप्तसु शतेषु व्यतीतेषु (वि. सं. ८३९ वर्षे) चैत्रस्य कृष्णपक्षे चतुर्दश्यामपराह्णे एषा कुवलयमालासंज्ञिका धर्मकथा रचिताऽऽसीद्, यदा तत्र श्रीवत्सराजनामा रणहस्ती पार्थिवो विद्यमान आसीत्[2]। अस्याः कथायाः प्राचीनं वि. सं. ११३९ वर्षे लिखितं ताडपत्रीयमादर्शपुस्तकमद्यापि जेसलमेरुदुर्गीयजैनभाण्डागारे विद्यते[3]। वि. सं. ११६० वर्षे देवचन्द्रसूरिणा, त्रयोदशशताब्द्यां माणिक्यचन्द्रसूरिणा चेयं कथा शान्तिनाथचरितेऽस्मारि, रत्नप्रभसूरिणा च चतुर्दशशाताब्दीप्रारम्भे संस्कृतभाषायां संक्षेपरूपेणावातारि।

---

१ तत्र खलु स **दृढप्रतिज्ञो** दारक उन्मुक्तबालभावो विज्ञानपरिणतमात्रो यौवनमनुप्राप्तो द्वासप्ततिकलापण्डितोऽष्टादशविधप्रकारदेशीभाषाविशारदः सुप्त—प्रतिबोधितनवाङ्गो गीतरतिर्गान्धर्वनाट्यकुशलः शृङ्गारागारचारुवेषः * *।

२"आसी तिकम्माहिरउ **म**हादुवारम्मि खत्तिउ पयडो।**उ**ज्जोअणो त्ति णामंत चिअ परिभुंजिरे तइआ॥
तस्स वि पुत्तो संपइ णामेण **वडेसरो** त्ति पयडगुणो।त**स्सुज्जो**अ**ण**णामो तणउ अह विरइआ तेण॥
तुंगमलंघं जिणभवणमणहरं सार(व)याउलं विसमं। **जा**वालिउरं अद्दावयं व अह अत्थि पुहईए॥
तुंगं धवलं मणहारिरयणपसरंतधयवडाडोवं। **उ**सहजिणिंदायतणं करावियं **वी**रभद्देण॥
तत्थ ठिएणं अह चोद्दसीए चेत्तस्स कण्हपक्खम्मि। णिम्मविआ बोहिकरी भव्वाणं **होउ** सव्वाण॥
परभडभिउडीभंगो पणईयणरोहणो कलाचंदो। सिरि**वच्छरा**य**ण**णामो रणहत्थी पत्थिवो जइआ॥
* * * **चं**दकुलावयवेणं **आयरियउज्जो**अ**ण**ेण रइआ मे। * * *
सगकाले वोलीणे वरिसाण सएहिं सत्तहिं गएहिं। एगदिणेणूणेहिं रइआ अवरण्हवेलाए॥"

—कुवलयमालाकथायाम् [जे. भां. ता. प. २५३]

३ **जे. भां. सूची** [अप्रसिद्ध० पृ. ४२–४३; २७] द्रष्टव्या।

चन्द्रकुलीनोऽसावुद्योतनसूरिर्महाद्वारनिवासिक्षत्रियोद्योतनस्य पौत्रो वटेश्वरस्य च तनय आसीदित्यादिनिजपरिचयं स्वयं तत्प्रशस्तावसूचयत्[1]।

---

१ कवेर्जनको वटेश्वरः स एव कवेर्गुरोस्तत्त्वाचार्यस्य गुरुरासीदिति तत्प्रशस्तितो ज्ञायते-उत्तरापथे चन्द्रभागासरितस्तीरे स्थिता **पवैतिकापुरी तोर**राजस्य राजधान्यासीत्। तोरराजस्य गुरुणा गुप्त-वंशीयहरिगुप्ताचार्येण तत्र निवेशो दतोऽभूत्। तस्य शिष्यो महाकविर्देवगुप्तनामा तथा शिवचन्द्र-गणिर्महत्तरश्च। स जिनवन्दनहेतवे भ्राम्यन् क्रमेण भिल्लमालनगरे संस्थितः। तस्य शिष्यो यक्षदत्तग-णिनामा•क्षमाश्रमणो महात्मा त्रैलोक्येऽपि प्रकटयशा आसीत्। तस्य प्रभूताः शिष्यास्तपो–वीर्य–वचन–लब्धि–सम्पन्ना आसन्, यैर्देवगृहैर्गूर्जरदेशो रम्यः कृतः; ते च षडिमे आसन्— १ नागः, २ वृन्दः, ३ मम्मटः, ४ दुर्गः, ५ आचार्योऽग्निशर्मा, ६ वटेश्वरश्च। तेन (वटेश्वरेण) आका-शवप्र(?)नगरे रम्यो जिनालयो निर्मापित आसीत्, तस्य मुखदर्शनादेव प्रकुपितोऽपि प्रशाम्यति स्म। तस्यान्तिमः शिष्यस्तत्त्वाचार्यनामा तपः–शीलादिगुणवानासीत्। तस्य शिष्येण हीदेवीदत्तदर्शनमनसा विलसदाक्षिण्यचिह्नेनैषा कुवलयमालाकथा रचिता। आचार्यवीरभद्रो हरिभद्रश्चैतस्य विद्यागुरू स्त इत्यादीत एव ज्ञायते—

"अत्थि पुहईपसिद्धा दोण्णि पहा दोण्णि चेय देस त्ति। तत्थ त्थि पहं णामेण **उत्तरावहं** बुहजणाइण्णं॥
सुइदिअचारुसोहा विअसिअकमलाणणा विमलदेहा। तत्थत्थि जलहिदइआ सरिआ अह **चंदभाय** त्ति॥
तीरम्मि तीय पयडा **पव्वइया** णाम रयणसोहिल्ला। जत्थ त्थि ठ्ठिए भुत्ता पुहई सिरि**तोरराए**ण॥
तस्स गुरू **हरिउत्तो** आयरिउ आसि **गुत्त**वंसाउ। तीय णयरीय दिण्णो जेण णिवेसो तहिं काले॥
तस्स वि सिस्सो पयडो महाकई **देवउत्त**णामो त्ति। .....**सि**वचंदगणी यह मयहरो त्ति॥
सो जिणवंदणहेउं कह वि भमंतो कमेण संपत्तो। सिरि**भिल्ल**मालणयरम्मि संठिउ कप्परुक्खो व्व॥
तस्स खमासमणगुणा णामेण **जक्ख**यत्तगणिणामो। सीसो **महइ** महप्पा आसि तिलोए वि पयडजसो॥
तस्स य प(ब)हुयसीसा तववीरिअवयणलद्धिसंपण्णा। रम्मो **गुज्ज**रदेसो जेहि कउ देवहरएहिं॥
णागो **विं**दो **म**म्मड **दुग्**गो आयरिय**अग्गि**सम्मो य। छट्ठो **वडेसरो** छम्मुहस्स वअणस्स ते आसि॥
आगासवप्पणरो जिणालयं तेण णिम्मवियं **रम्मं**।तस्स मुहदंसणे च्चिअ अवि पसमइ जो अचत्थो वि॥
तस्स वि सीसो अंतो **तत्ताअरिउ** त्ति णाम पयडगुणो। आसि तवतेयणिज्जियपविगयमोहो॥
.....सीलंगविउलसालो लक्खणरुक्खो व्व णिक्कंपो॥
सीसेण तस्स एसा **हरिदेवी**दिण्णदंसणमणेण। रइया **कुवलयमाला** विलसिय**दक्खिण्ण**इङ्केण॥
दिण्णजहिच्छियफलउ बहुकित्तीकुसुमरेहिराभोउ।आयरिय**वीरभद्दो** अत्थावरो कप्परुक्खो व्व॥
सो सिद्धंतेण गुरू जुत्तीसत्थेहि जस्स **हरिभद्दो**। बहुसत्थगंथवित्थरपत्थरियपयडसव्व(च्च)त्थो॥"

—कुवलयमालाकथायाम् [जे. भां. ता. प. २५२–३]

दाक्षिण्यचिह्नेनोद्योतनाचार्याभिधेनैतेन कविना पादलिप्त–सातवाहन–छप्पण्णय (षट्पर्णक)–गुणाढ्य–व्यास–वाल्मीक–बाण–विमलाङ्क–देवगुप्त–हरिवंशकार–सुलोचनाकार–प्रभञ्जन–रविषेण(?)भव-विरहाङ्कप्रभृतिमहाकवीनां तरङ्गवती–कोश(गाथासप्तशती)–छेकभणिति–बृहत्कथा–भारत–रामायण–कादम्बरी–प्राकृत–त्रिपुरुषचरित–हरिवंश–सुलोचना–यशोधरचरित–पद्मचरित–समरमृगाङ्ककथाकृतयः कुवलयमालाकथाप्रारम्भे प्रशंसिताः। तत्र च त्रिपुरुषचरितकारो महाकविर्देवगुप्तस्तूपरि यथाऽसूचि तथा तोरराजगुरुगुप्तवंशीयहरिगुप्तस्य शिष्यः, कुवलयमालाकर्तुश्च तस्यैव पूर्वजो ज्ञायते।

एषा कुवलयमालाकथा संकीर्णकथात्वेन प्राधान्येन प्राकृतभाषायां रचिताऽपि कुतूहलेन क्वचित् परवचनवशेन संस्कृतापभ्रंश-पैशाचीभाषास्वपि निबद्धाऽत एव कविना देशीभाषालक्षणविद्भ्यस्तद्विज्ञेभ्योऽपि च कुवलयमालापठनार्थमप्रार्थि[2]। हीदेवीप्रसादसम्भवायामत्र कथायां प्रसङ्गतोऽष्टादशदेशीभाषाणां मध्याद् गोल्ल[1]-मध्यदेश[2]-मगध[3]-अन्तर्वेदी[4]-कीर[5]-टक्क[6]-सिन्धु[7]-मरु[8]-गूर्जर[9]-लाट[10]-मालव[11]-कर्णाटक[12]-ताजिक[13]-कोसल[14]-महाराष्ट्र[15]-आन्ध्र[16]-भवानां षोडशदेश्यानां वणिजां वपुर्वर्ण-वेष-प्रकृतिपूर्वं भाषास्वरूपं प्रदर्शितमित्थमवलोक्यते—

"जाव थोअंतरे दिट्ठं इमिणा अणेयप(व)णिअपसारयाबद्धकयविक्कयपयत्तवट्टमाणकलयलरवं हट्टमग्गं ति। तत्थ य पविसमाणेण दिट्ठे अणेयदेसभासालक्खिए देसवणिए। तं जहा—

---

१ "**पायय**भासारइया मरहट्ठय-देसिवण्णयणिवद्धा। सुद्धा सयलकह चिय तावस-जिण-सत्थवाहिल्ला॥ कोऊहलेण कत्थइ परवयणवसेण **सक्कय**णिवद्धा। किंचि **अवब्भंस**कआ दा विय **पेसाय**भासिल्ला॥" सव्वकहागुणजुत्ता सिंगारमणोहरा सुरइअंगी। सव्वकलागमसुहया **संकिण्णकह** त्ति णायव्वा॥ एयाणं पुण मज्झे एस चिअ होइ एत्थ रमणिज्जा। सव्वभणिईण सारो जेण इमा तेण तं भणिमो॥"

—कुवलयमालाकथायाम् [जे. भां. ता. प. ३]

२ "लद्धं पि थिरं होहिति होइ विअड्ढो कई य पत्तट्ठो। तम्हा **कुवलयमालं** वाएज्ज सुहो पयत्तेण॥ जो जाणइ **देसीउ हासाउ** लक्खणाइं वा ज(धाऊ)य। वयणय गाहा छेअं **कुवलयमालं** पि सो पढउ॥ एआइं जो ण याणइ सो पि हु वाएउ पोत्थयं घेत्तुं। एत्थं चिय अह णाहिति कइणो हि उ णिउ[ण]त्तणगुणेण॥ जो सज्जणो विअड्ढो एसा रामेइ तं महालक्खं। जो पिसुणदुव्विअड्ढो रसहावं तस्स णो देइ॥"

—कुवलयमालाकथायाम् [जे. भां. ता. प. २५२]

३ हीदेवीप्रसादाद् विरचितामेतां धर्मकथां सुजन-पाणिगृहीतीं कुर्वता तेन कविजनकेनेदं व्यज्ञपि—'हे सुजन! दुर्गतबालेव ऋजुपदगामिनी सरलोल्लापा भूषणविहीना चैषा कथा—कन्या मया तुभ्यं स्नेहेन दत्ताऽस्यै स्नेहं दद्याः, अस्याः स्खलितं छादयेः, वचनं पूरयेः, अथवा तव कुलस्य सदृशं कुर्याः' इति। एताश्च तत्प्रतिपादिका गाथाः—

जीए मह **देवय**ाए अक्खाणं साहियं इमं सव्वं। तीए चिअ णिम्मविया एसा अम्हे मिसं एत्थ॥ दिअहस्स पहरमेत्ते गंथसयं कुणउ भणसु को पुरिसो। हिअयगया **हिरिदेवी** जइ मि लिहं तस्स णो देइ॥ पउमासणंमि पउमंमिआए पउमेण हत्थपउमम्मि। हिअयपउमम्मि सा मे **हिरिदेवी** होउ सण्णिहिआ॥ जइ किंचि लिंगभिण्णं विभत्तिभिण्णं च कारयवीहीणं। रहसेण मए लिहियं को दोसो एत्थ देवीए?॥ उज्जअपयगमणिल्ला सरलुल्लावा य **भूसण**विहूणा। दुग्गयबाल व्व मए दिण्णा तुह सुअण! णेहेण। णेहं देज्ज इमीए खलिअं छाएज्ज वयणयं पुलए। अहवा कुलस्स सरिसं करेज्ज हो! तुज्झ जं सुअणा!॥ दंसिअकलाकलावा **धम्मकहा** णेयदिक्खियणरिंदा। इह लोए होइ थिरा एसा **उसहस्स** कित्ति व्व॥"

—कुवलयमालाकथायाम् [जे. भा. ता. प. २५२]

४ यावत् स्तोकान्तरे दृष्टोऽनेनानेकवणिक्प्रसारितावद्धकयविक्रयप्रवृत्तिवर्तमानकलकलरवो हट्टमार्ग इति। तत्र च प्रविशता दृष्टा अनेकदेशभाषालक्षिता देशवणिजः। तद् यथा—

कसिणे णिट्ठुरवयणे बहुकसमरभुंजए अलज्जे य ।
'अरे' त्ति उल्लवंते अह पेच्छइ **गोल्लए** तत्थ ॥
णय–णीति–संधि–विग्गहपडुए बहुजंपिरे य पयतीए ।
'तेरे मेरे आउ' त्ति जंपिरे **मज्झदेसे** य ॥
णीहरियपोट्टदुव्वण्णमडहए सुरयकेलितल्लिच्छे ।
'एगे ले' जंपुल्ले अह पेच्छइ **मागहे** कुमारो ॥
कविले पिंगलणयणे भोअणकहमेत्तदिण्णवावारे ।
'कित्तो किम्मो जिअ' जंपिरे य अह **अंतवेते** य ।
उत्तुंग–थूलघोणे कणयवण्णे य भारवाहे य ।
'सरि वा(पा)रि' जंपिरे **कीरे** कुमारो पलोएइ ॥
दक्खिण्ण–दाण–पोरुस–विण्णाण–दयाविवज्जियसरीरे ।
'एहं तेहं' चवंते **टक्के** उण पेच्छए कुमारो ॥
सललित–मिदु–मंदपए गंधव्वपिए सदेसगयचित्ते ।
'व(च)उडयमे' भणिरे सुहए अह **सेन्धवे** दिट्ठे ॥
वंके जडे य जड्डे बहुभोइ कठि(ढि)ण–पीण–सू(थू)णंगे ।

---

१ कृष्णान् निष्ठुरवचनान् बहुकसमरभुञ्जानानलज्जांश्च ।
'अर रे' इत्युल्लपतोऽर्थं प्रेक्षते **गोल्लकां**स्तत्र ॥
नय-नीति-सन्धि-विग्रहपटुकान् बहुजल्पाकांश्च प्रकृत्या ।
'तेरे मेरे आओ' इति जल्पतो **मध्यदेश्यां**श्च ॥
निःसृतोदर-दुर्वर्ण–वामनान् सुरतकेलितल्लिप्सान् ।
'एगे ले' जल्पाकानथ प्रेक्षते **मागधान्** कुमारः ॥
कपिलान् पिङ्गलनयनान् भोजनकथामात्रदत्तव्यापारान् ।
'कित्तो किम्मो जिअ' जल्पाकान**थान्तर्वेद्यां**श्च ॥
उत्तुङ्ग-स्थूलघोणान् कनकवर्णांश्च भारवाहांश्च ।
'सरि पारि' जल्पाकान् **कीरान्** कुमारः प्रलोकयति ॥
दाक्षिण्य-दान-पौरुष-विज्ञान-दयाविवर्जितशरीरान् ।
'एहं तेहं' ब्रवाणान् **टक्कान्** पुनः प्रेक्षते कुमारः ॥
सललित-मृदु-मन्दपदान् गान्धर्वप्रियान् स्वदेशगतचित्तान् ।
'चउडय मे' भणतः सुभगानथ **सैन्धवान्** दृष्टवान् ॥
वक्रान् जडांश्च जाड्ये बहुभोजिनः कठिन-पीन-स्थूलाङ्गान् ।

' अप्पा तुप्पा ' भणिरे अह पेच्छइ **मारुए** तत्तो ॥
घयलो(ला)लियपुट्ठंगे धम्मपरे संधि–विग्गहं णिउणे ।
' णउ रे **भल्लुं** ' भणिरे अह पेच्छइ **गुज्जरे** अवरे ॥
ण्हाउलित्त–विलित्ते कयसीमंते सुसोहियसुगत्ते ।
' आहम्ह काइं तुम्हं मित्तु ' भणिरे पेच्छए **लाडे** ॥
तणु–साम–मडहदेहे कोवणए माण–जीविणो रोद्दे ।
' भाउअ भइणी तुम्हे ' भणिरे अह **मालवे** दिट्ठे ॥
उक्कडदप्पे पिअमोहणे ए(प)यरोद्दे पयंगवित्ती य ।
' अद्रि पोण्डि म(न)रे ' भणिरे पेच्छइ **कण्णाडए** अ०
कुप्पासपाउअंगे मासरुई पाणमयणतल्लिच्छे ।
' इसि किसि मिसि ' भणमाणे अह पेच्छइ **ताइए** अवरे
सत्थकलापत्तट्ठे(ड्ढे) माणी पिअकोवणे काढिणदेहे ।
' जल तल ले ' भणमाणे **कोसलए** पुलइए अवरे ॥
दढ–मडह–सामलंगे सहिरे अहिमाण–कलहसीले य ।
' दिण्णल्ले गहिल्ले ' उल्लविरे तत्थ **मरहट्ठे** ॥
पिअमहिला–संगामे सुंदरगत्ते य भोइणे रोद्दे ।

---

१ ' अप्पा तुप्पा ' भणतोऽथ प्रेक्षते **मारवां**स्ततः ॥
घृतलो(ला)लितपुष्टाङ्गान् धर्मपरान् सन्धि-विग्रहे निपुणान् ।
' णउ रे **भल्लुं** ' भणतोऽथ प्रेक्षते **गौर्जरा**नपरान् ॥
स्नातोल्लिप्त-विलिप्तान् कृतसीमन्तान् सुशोभितसुगात्रान् ।
' आहम्ह काइं तुम्हं मित्तु ' भणतः प्रेक्षते **लाटी**यान् ॥
तनु-श्याम–लघुदेहान् कोपनान् मानजीविनो रौद्रान् ।
' भाउअ भइणी तुम्हे ' भणतोऽथ **मालवी**यान् दृष्टवान् ॥
उत्कटदर्पान् प्रियमोहनान् पदरौद्रान् पतङ्गवृत्तींश्च ।
' अद्रि पोण्डि म(न)रे भणतः प्रेक्षते **कर्णाटकी**यानन्यान् ॥
कूर्पासप्रावृताङ्गान् मांसरुचीन् पान–मदनतल्लिप्सान् ।
' इसि किसि मिसि ' भणतोऽथ प्रेक्षते **ताथिका**नपरान् ॥
श(शा)स्त्रकलाकुशलान् मानिनः प्रियकोपनान् कठिनदेहान् ।
' जल तल ले ' भणतः **कौशलिका**न् प्रलोकतेऽपरान् ॥
दृढ-लघु-श्यामाङ्गान् सहमानानभिमान-कलहशीलांश्च ।
' दिण्णल्ले गहिल्ले ' उल्लपतस्तत्र **महाराष्ट्री**यान् ॥
प्रियमहिला-सङ्ग्रामान् सुन्दरगात्रांश्च भोगिनो रौद्रान् ।

'अटि पुटि रटिं' भणंते र(अ)न्ध्रे कुमरो पलोएइ ॥
इअ **अट्ठारस देसीभासा**उ पुलइऊण **सिरिअत्तो** ।
अण्णाइं अ पुलएई **खस-पारस-बब्बरा**दीए ॥"

—कुवलयमालाकथायाम् । [जे. भां. ता.१३१–२]

देशभाषाणां प्राचीनता

उद्धृतैरुपरितनैः कुवलयमालाया उल्लेखैरवगम्यते खलु तत्तद्देशभाषाणां प्राचीनतेति तदर्वाचीनताविषयकं केषाञ्चिदभिमतं निरस्तं भवति । पादलिप्ताचार्यादिविरचितदेशीशास्त्रपरिशीलनेन विरचिते देशीशब्दसङ्ग्रहे सूच्यते खलु हेमचन्द्राचार्येण देशविशेषप्रसिद्धशब्दानामनन्तत्वमशक्यसर्वसङ्ग्रहत्वं च[2] । बृहत्कल्पप्रभृतिषु जैनसिद्धान्तग्रन्थेषु महाभारत–नाट्यशास्त्र–कामशास्त्र–विष्णुधर्मोत्तर–मृच्छकटिक–मुद्राराक्षस–कादम्बरी–दशरूपकप्रभृतिष्वन्यग्रन्थेष्वपि देशभाषाणां स्मरणान्यवाप्यन्ते । तथाहि–

'**नाणाविहदेसभासा**[3]नू × × गुणसयकलिओ जुत्तो(ग्गो) पवयणसारं परिकहेउं ।'
[बृहत्कल्पे प. ४९, दशवैकालिकवृत्तौ प. ९ उद्धियते हरिभद्रसूरिणा]

" **नाणादेसी**[4]कुसलो **नाणादेसी**कप्पस्स सुत्तस्स ।
अभिलावे अत्थकुसलो होई तओऽणेण गंतव्वं ॥"

—बृहत्कल्पे [उ. ६, वृ. प. ८३१]

---

१ 'अटि पुटि रटिं' भणत **आन्ध्रान्** कुमारः प्रलोकते ॥
इत्यष्टादश **देशीभाषाः** प्रलोक्य **श्रीदत्तः** ।
अन्यांश्च प्रलोकयति **खस-पारस-बर्बरादीन्** ॥

२ " इदानीं नानादेशप्रसिद्धभाषास्वतिव्याप्तिवारणाय देशीलक्षणमाह—
देसविसेसपसिद्धीइ भण्णमाणा अणंतया हुंति । तम्हा अणाइपाइयपयट्ठभासाविसेसओ देसी ॥
देशविशेषा महाराष्ट्र–विदर्भाभीरादयस्तेषु प्रसिद्धया मया पश्चात्, निक्कइला जितः, उक्खुरुहुंचिओ उत्क्षिप्तः, प्रेयंडो धूर्तः, हिड्डो जारः, विड्डो प्रपञ्चः, दढ–मूढो मूर्ख एकग्राही इत्येवमादयः शब्दा यदि उच्चेरन् तदा देशविशेषाणामनन्तत्वात् पुरुषायुषेणापि न सर्वसङ्ग्रहः स्यात्; तस्मादनादिप्रवृत्तप्राकृतभाषाविशेष एवायं देशीशब्देनोच्यते इति नातिव्याप्तिः । यदाह—
'वाचस्पतेरपि मतिर्न प्रभवति दिव्ययुगसहस्रेण ।
देशेषु ये प्रसिद्धास्तान् शब्दान् सर्वतः समुच्चेतुम् ॥"
–देशीनाममालायाम् [गा. ४.]

३ नानाविधदेशभाषाज्ञः × × गुणशतकलितो योग्यः प्रवचनसारं परिकथयितुम् ।

४ नानादेशी(देशभाषा)कुशलो नानादेशीकल्पस्य सूत्रस्य ।
अभिलापेऽर्थकुशलो भवति ततोऽनेन गन्तव्यम् ॥

महर्षिव्यासः—

" नानाचर्मभिराच्छन्ना **नानाभाषा**श्च भारत ! ।
कुशला **देशभाषा**सु जल्पन्तोऽन्योन्यमीश्वराः ॥"
—महाभारते (शल्यपर्व अ० ४६, श्लो० १०३)

भरतमुनिः—

" अत ऊर्ध्वं प्रवक्ष्यामि **देशभाषा**विकल्पनम् ॥ × ×
सौरसेनं समाश्रित्य भाषा कार्या तु नाटके ।
अथवा च्छन्दतः कार्या **देशभाषा** प्रयोक्तृभिः ॥
नानादेशसमुत्थं हि काव्यं भवति नाटके ॥"
—नाट्यशास्त्रे [अ. १७, श्लो० २४, ४६, ४७]

वात्स्यायनः—

" नात्यन्तं संस्कृतेनैव नात्यन्तं **देशभाषया** ।
कथां गोष्ठीषु कथयंल्लोके बहुमतो भवेत् ॥"–कामसूत्रे [१,४,९०]

" सुरते कर्णमूलेषु यच्च (तु निज)**देशीयभाषया** ।
दम्पत्योर्जल्पितं मन्दं मन्मनं तद् विदुर्बुधाः॥ " —अन्यत्र ।

" संस्कृतैः प्राकृतैर्वाक्यैर्यैः शिष्यमनुरूपतः ।
देशभाषाऽऽद्युपायैश्च बोधयेत् स गुरुः स्मृतः ॥"—विष्णुधर्मोत्तरे ।

शूद्रकः—

" चन्दनकः–अरे ! को अप्पच्चओ तुह ? वअं दक्खिणत्ता अव्वत्तभासिणो खस–खत्तिखड–खडड्ढे–विलअ–कण्णाट–कण्णप्पावरणअ–दविड–चोल–चीण–बर्बर–खेरखान–मुख–मधुघातप्रभृतीनां म्लेच्छजातीनाम् **अनेकदेशभाषा**भिज्ञा यथेष्टं मन्त्रयामो दिट्ठो दिट्ठा वा अज्जो अज्जआ वा किं शब्दविचारः ? स्त्री–पुं–नपुंसकव्याख्यानमप्रस्तुतम् ।" —मृच्छकटिके [अ. ६, पृ. २२९]

विशाखदत्तः—

" प्रयुक्ताश्च स्वपक्ष–परपक्षयोरनुरक्तापरक्तजनजिज्ञासया बहुविध**देश**–वेष–**भाषा**–ऽऽचार–सञ्चारवेदिनो नानाव्यञ्जनाः प्रणिधयः । "—मुद्राराक्षसे [१,९]

बाणभट्टः—

' शिक्षिता**शेषदेशभाषे**ण सर्वलिपिज्ञेन । ' —कादम्बर्याम् [पृ. १०२]

धनञ्जयः—

" **देशभाषा**–क्रिया–वेषलक्षणाः स्युः प्रवृत्तयः ।
लोकादेवागम्यैता यथौचित्यं प्रयोजयेत् ॥
यद्देशं नीचपात्रं यत् **तद्देशं** तस्य **भाषितम्** । "
—दशरूपके [२,५८,६१]

देशभाषाणामपभ्रंशे निवेशः

कुवलयमालाकर्तुरभिप्रेतमपभ्रंशलक्षणं भाषाचतुष्टयेऽपभ्रंशस्थानमित्यत्राग्रे दृग्गोचरं भविष्यति। पुरातनैः प्राज्ञैर्देशभाषाणामपभ्रंशे समावेशः पर्यदार्शी।

तथा रुद्रटः—

'षष्ठोऽत्र भूरिभेदो **देश**विशेषा**दपभ्रंशः**।' —काव्यालङ्कारे [२, १२]

" देशेषु देशेषु पृथग् विभिन्नं न शक्यते लक्षणतस्तु वक्तुम्।
लोकेषु यत् **स्यादपभ्रष्टसंज्ञं** ज्ञेयं हि तद्देशविदोऽधिकारम्॥"

—विष्णुधर्मोत्तरे [खं. ३ अ. ७]

वाग्भटः—

'**अपभ्रंशस्तु** यच्छुद्धं तत्तद्देशेषु भाषितम्।' —काव्यालङ्कारे [२, ३]

रामचन्द्र-गुणचन्द्रौ—

" देशोद्देशे स्वदेशगीः। तिर्यग्जात्यन्तरादीनामानुरूप्येण संकथा।

देशस्य कुरु-मगधादेरुद्देशः प्रकृतत्वं तस्मिन् सति स्वस्वदेशसम्बन्धिनी भाषा निबन्धनीयेति। इयं च **देशगी**श्च प्रायोऽ**पभ्रंशे** निपततीति॥"

—स्वोपज्ञविवरणोपेते नाट्यदर्पणे [प. १२४]

भाषात्रयेऽपभ्रंशस्थानम्

उपलभ्यमानैः प्रमाणैः प्रतीयते खलु विक्रमीयप्रथमशताब्याः पूर्वमप्यपभ्रंशभाषायां गद्य-पद्यमयानि काव्यानि स्युरिति। छन्दो-लक्षण-काव्यालङ्कारानुशासकैः पिङ्गल-भामह-स्वयम्भू-हेमचन्द्रप्रभृतिभिरन्यैरपि च भाषात्रये तत्काव्यसूचनमकारि। तथा च शकसं. ४०० तमवर्षीये धरसेन-ताम्रपत्रे—

'संस्कृत-प्राकृत**ापभ्रंश**भाषात्रयप्रतिबद्धप्रबन्धरचनानिपुणतरान्तःकरणः'

—वलभीराजगुहसेनविशेषणे [इ. ए. १०, २८४]

भामहः—

" शब्दार्थौ सहितौ काव्यं गद्यं पद्यं च तद् द्विधा।
संस्कृतं प्राकृतं चान्य**दपभ्रंश** इति त्रिधा॥"—काव्यालङ्कारे [१, १६]

" संस्कृतं प्राकृतं चैव गीतं द्विविधमुच्यते।
अपभ्रष्टं तृतीयं च तदनन्तं नराधिप!॥
देशभाषाविशेषेण तस्यान्तो नेह विद्यते।"

—विष्णुधर्मोत्तरे [खं. ३, अ. ३]

हेमचन्द्राचार्यः—

" पद्यं प्रायः संस्कृत-प्राकृत**ापभ्रंश**-ग्राम्यभाषानिबद्धभिन्नान्यवृत्त-सर्गाश्वास-सन्ध्यवस्कन्धकबन्धं सत्सन्धि शब्दार्थवैचित्र्योपेतं महाकाव्यम्।

अपभ्रंशभाषानिबद्धसन्धिबन्धमब्धिमथनादि, **ग्राम्यापभ्रंशभाषा**निबद्धावस्कन्धकबन्धं **भी**मकाव्यादि।" —काव्यानुशासने [अ. ८, ३३०-७]

भाषाचतुष्टये अपभ्रंश-स्थानम्

वाङ्मयस्य काव्यकायरूपाणां भाषाणां वा चातुर्विध्यमपि प्रतिपादित प्रतिष्ठितैः पुरातनैस्तद्विद्भिः खल्वपभ्रंशस्य प्रतिष्ठया। सातवाहननृपाश्रितगुणाढ्यकविविशेषणेऽप्येतद् द्योतितं सम्भाव्यते[1]। तथा कविदण्डी—

" तदेतद् वाङ्मयं भूयः संस्कृतं प्राकृतं तथा।
अपभ्रंशश्च[2] मिश्रं चेत्याहुरार्याश्चतुर्विधम्॥ "

—काव्यादर्शे [अ. १, ३२]

वि. सं. ८३९ वर्षे दाक्षिण्यचिह्नोद्योतनाचार्यः—

" आयण्णिऊण य चिंतियं णेण—'अरे! कयलीए उण **भासाए** एयं उल्लवियइ केणावि किंपि? हूं अरे! **संस्कृतं** ताव ण होइ, जेण तं अणेयपय—समास—णिवाउवसग्ग—विभत्ति—लिंगपरिअप्पणाकुवियप्पसंगदुग्गमं दुज्जणहिययं पिव विसमं।

इमं पुण एरिसं। ता किं **पायेयं** होज्ज?। हूं, तं पि णो जेण तं सयलकलाकलाप(व)मालाजलकल्लोलसंकुलं लोयवुत्तंतमहोअहिमहापुरिसम(मु)हणुग्गयामयणीसंदबिंदुसंदोहं संघडिएएक्केक्कमवण्णापय—णाणारूवविरयणासहं सज्जणवयणं पिव सुहसंगयं।

एयं पुण ण सुट्ठु। ता किं **अवहंसं** होहिइ?। हूं। तं पि णो जेण [तं] **सक्कय—पाय—उभयसुद्धासुद्धपयसमतरंगरंगंतवग्गिरं णवपाउसजलयपवाहपूरपवालियगिरिणइसरिसं समविसमं पणयकुवियपियपणइणीसमुल्लावसरिसं मणोहरं।**

---

१ " इति श्रीमत्कुन्तलजनपदेश्वर—प्रतिष्ठानपत्तनाधीश—शातकर्णोपनामकद्वीपिकर्णोत्मज—मलयवतीप्राणप्रिय—कालापप्रवर्तक—शर्ववर्मधीसख—मलयवत्युपदेशपण्डितीभूत—त्यक्तभाषात्रय-स्वीकृतपैशाचिकपण्डितराजगुणाढ्यनिर्मितभस्मीभवद्बृहत्कथाऽवशिष्टसप्तमांशावलोकनप्राकृतादिवाक्पञ्चकप्रीत—कविवत्सल—हालायुपनामकश्रीसातवाहननरेन्द्रनिर्मिता विविधान्योक्तिमयप्राकृतगीर्गुम्फिता शुचिरसप्रधाना काव्योत्तमा सप्तशत्यवसानमगात॥"—गाथासप्तशतीप्रान्ते [पि. रि. ३, ३४९]

२ आकर्ण्य च चिन्तितमनेन—अरे! कतरया पुनर्**भाषयै**तदुल्लप्यते केनापि किमपि?। हुं। अरे! **संस्कृतं** तावद् न भवति, येन तदनेकपद—समास—निपातोपसर्ग—विभक्तिलिङ्गपरिकल्पनाकुविकल्पसङ्कटुर्गमं दुर्जनहृदयमिव विषमम्।

इदं पुनरीदृशम्। तत् किं **प्राकृतं** भवेत्?। हुं। तदपि नो येन तत् सकलकलाकलापमालाजलकल्लोलसङ्कुलं लोकवृत्तान्तमहोदधि—महापुरुषमुखनिर्गतामृतनिःस्यन्दबिन्दुसन्दोहं सङ्घटितैकैकक्रमवर्ण—पद—नानारूपविरचनासहं सज्जनवचनमिव सुखसङ्गतम्।

एतत् पुनर्न सुष्ठु। तत् किम् **अपभ्रंशं** भविष्यति?। हूं। तदपि नो येन [तत्] **संस्कृत—प्राकृतोभयशुद्धाशुद्धपदसमतरङ्गरङ्गद्वल्गु नवप्रावृड्जलदप्रवाहपूरप्लावितगिरिनदीसदृशं समविषमं प्रणयकुपितप्रियप्रणयिनीसमुल्लापसदृशं मनोहरम्।**

एयं पुण ण सुट्ठु । किं पुण होहिइ त्ति चिंतयंतेण पुणो समायण्णिअं । अरे अत्थि **चउत्था(त्थी) भासा पेसाची,** ता सा इमा होहि त्ति ॥[1]"

--कुवलयमालाकथायाम् [जे. भां. ता. प. ५७, ५८]

भाषाचतुष्टयकवित्वविषये उपलभ्यन्तेऽन्येऽपीमे उल्लेखाः । राजशेखर उद्धरति तदुक्तमित्युल्लिख्य प्राचीनमिदं पद्यद्वयम्--

"एकोऽर्थः **संस्कृ**तोक्त्या स सुकविरचनः **प्रा**ंकृतेनापरोऽस्मिन्
अन्योऽ**पभ्रंश**गीर्भिः किमपरमपरो भूत**भा**षाक्रमेण ।
द्वित्राभिः कोऽपि वाग्भिर्भवति चतसृभिः किञ्च काश्चिद् विवेक्तुं
यस्येत्थं धीः प्रपन्ना(गल्भा) स्नपयति सुकवेस्तस्य कीर्तिर्जगन्ति ॥"

"**गौ**डाद्याः **संस्कृ**तस्थाः परिचितरुचयः **प्रा**कृते **ला**टदेश्याः
सापभ्रंशप्रयोगाः सकल**मरु**भुव**ष्टक्क**भादानकाश्च ।
आवन्त्याः **पा**रियात्राः सह **द**शपुरजै**र्भू**तभाँषां भजन्ते
यो मध्ये**मध्य**देशं निवसति स कविः सर्वभाषानिषण्णः ॥"

—काव्यमीमांसायाम् [अ. ९, १०; ४८,९१]

राजशेखरः--

"गिरः श्रव्या **दि**व्याः प्रकृतिमधुराः **प्रा**कृतेधुरः
सुमध्योऽ**पभ्रंशे**ः सरसरचनं भूतवचनम् ।
विभिन्नाः पन्थानः किमपि कमनीयाश्च त इमे
निबद्धा यस्त्वेषां स खलु निखिलेऽस्मिन् कविवृषा ॥"

--बालरामायणे [१,११]

"ससंस्कृतमपभ्रंशं लालित्यालिङ्गितं पठेत् ।
प्राकृतं भूतभाँषां च सौष्ठवोत्तरमुद्गिरेत् ॥"

--काव्यमीमांसायाम् [अ० ७, पृ. ३३]

---

१ एतत् पुनर्न सुष्ठु । किं पुनर्भविष्यति ? इति चिन्तयता पुनः समाकर्णितम् । अरे ! अस्ति **चतुर्थी भाषा पैशाची** । तत् सेयं भविष्यति इति ॥

" तस्यां राजासनम् । तस्य चोत्तरतः संस्कृताः कवयो निविशेरन् ।
.....पूर्वेण प्राकृताः कवयः ।.....
.....पश्चिमेनापभ्रंशिनः कवयः ।.....
.....दक्षिणतो भूतभाषाकवयः ।..... "

—काव्यमीमांसायाम् [अ० १०, पृ. ९४–९९]

वाग्भटः—

" संस्कृतं प्राकृतं तस्यापभ्रंशो भूतभाषितम् ।
इति भाषाश्चतस्रोऽपि यान्ति काव्यस्य कायताम् ॥"

—वाग्भटालङ्कारे [प २; १,३]

भाषाषट्केऽपभ्रंश-स्थानम्

चण्ड–हेमचन्द्र–हृषीकेश–त्रिविक्रम–सिंहराज–लक्ष्मीधर–क्रमदीश्वर–शेषकृष्ण–मार्कण्डेयादिभिर्व्याकरणादिनाऽवबोधितासु षट्सु भाषास्वपभ्रंशभाषाऽपि प्राबोधि । अन्यैरपि च रुद्रट–भोजराज–जिनदत्तामरचन्द्रादिभिर्निजे निजे ग्रन्थे भाषाषट्कं निर्दिश्य तत्रापभ्रंशस्य स्मरणमकारि । तथाहि चण्डः—

" संस्कृतं प्राकृतं चैवापभ्रंशोऽथ पिशाचिकी ।
मागधी शौरसेनी च षड् भाषाश्च प्रकीर्तिताः ॥ "—प्राकृतलक्षणे ।

रुद्रट :—

" वाक्यं भवति द्वेधा गद्यं छन्दोगतं च भूयोऽपि ।
भाषाभेदनिमित्तः षोढा भेदोऽस्य सम्भवति ॥
प्राकृत–संस्कृत–मागध–पिशाचभाषाश्च सू(शू)रसेनी च ।
षष्ठोऽत्र भूरिभेदो देशविशेषादपभ्रंशः ॥ "

—काव्यालङ्कारे [अ. २, श्लो० ११–१२]

भोजराज :—

" संस्कृतेनैव कोऽप्यर्थः प्रकृतेनैव चापरः । शक्यो वाचयितुं कश्चिदपभ्रंशेन वा पुनः॥
पैशाच्या शौरसेन्या च मागध्याऽन्यो निबध्यते।द्वित्राभिः कोऽपि भाषाभिः सर्वाभिरपि कश्चन॥'

—सरस्वतीकण्ठाभरणे ।

हेमचन्द्राचार्य :—

' भाषाः षट् संस्कृतादिकाः । '

"भाष्यन्ते भाषाः संस्कृत–प्राकृत–मागधी–शौरसेनी -पैशाच्यपभ्रंशलक्षणाः।"

—अभिधानचिन्तामणौ [का० २, श्लो० १९९]

जिनदत्तसूरिः—

" संस्कृते प्राकृते चैव शौरसेने च मागधे। पैशाचिकेऽपभ्रंशे च लक्ष्यं लक्षणमादरात् ॥"

—विवेकविलासे [उ. ८, श्लो० १३१]

अमरचन्द्र :—

"संस्कृतं प्राकृतं चैव शौरसेनी च मागधी। पैशाचिकी चापभ्रंशं षड् भाषाः परिकीर्तिताः ॥"

—काव्यकल्पलतावृत्तौ [प. ८]

प्रसिद्धाप्रसिद्धम् अपभ्रंशवाङ्मयम्

अपभ्रंशभाषानिबद्ध वाङ्मयं प्रभूतमुपलभ्यते, तच्च स्वल्पमेवाद्याऽवधि प्रसिद्धिमधिगतम्। श्रीमन्महोपाध्यायहरप्रसादशास्त्रिणा सम्पादिते बङ्गीयसाहित्यपरिषदा प्रकाशिते 'बौद्ध गान ओ दोहा'संज्ञके पुस्तके विविधकर्तृणि विक्रमीयसप्तमाष्टमशताब्दीसम्भूतानि काव्यानि बङ्गीयलिप्यां प्रसिद्धिमधिगतानि। मुम्बापुरीराजकीयसंस्कृतग्रन्थमालया प्रकाशिते सुप्रसिद्धहेमचन्द्राचार्यस्य प्राकृतशब्दानुशासनसंवलिते प्राकृतद्व्याश्रयमहाकाव्येऽन्यत्र प्रसिद्धे च्छन्दोऽनुशासनादौ च प्रतिष्ठा खल्वपभ्रंशपद्यानाम्। तथा योगीन्द्रदेवविरचितपरमात्मप्रकाश—योगचन्द्रमुनिप्रणीतयोगसारप्रभृतयो ग्रन्था अभयदेवसूरिप्रभृतिभिः प्रणीताः 'जय तिहुयण' इत्यादिसंज्ञया प्रथिताः स्तोत्रप्रबन्धाश्च प्रसिद्धा येऽपभ्रंशभाषाप्रतिष्ठां सूचयन्ति। धर्कटवणिग्धनपालविरचिता भविष्यदत्तकथा या दशमशताब्दीभवा वितर्क्यते, साऽस्यां ग्रन्थमालायां (गा. ऑ. सिरीझ् क्र. २०) पूर्वं प्रसिद्धा, या डॉ. हर्मण् याकॉबीमहाशयेन जर्मनभाषायां रोमनलिप्यां च प्राक् सम्पादिता। सोमप्रभाचार्येण वि. सं. १२४१ वर्षे सन्दर्भितः कुमारपालप्रतिबोधग्रन्थोऽस्यां ग्रन्थमालायां (गा. ऑ. सिरीझ् क्र. १४) प्रसिद्धस्तत्रापि कियानंशोऽपभ्रंशभाषायामिति सुविदितं विदुषाम्। इत एव प्रकाशिते प्राचीनगूर्जरकाव्यसङ्ग्रहे प्रसिद्धानि द्वादश—त्रयोदश—चतुर्दश—पञ्चदशशताब्दीजातानि गद्य—पद्यरूपाणि काव्यानि तत्सदृशान्यपराण्यपि चापभ्रंशसंज्ञयाऽपि वक्तुं शक्यते रुद्रट—वाग्भट—रामचन्द्रादिमतेन।

वि. सं. ११७४ वर्षे यशोदेवोपाध्यायेन नवतत्त्वभाष्यविवरणे [९१] मुकुटसप्तमीसन्धिबन्धमाणिक्यप्रस्तारिकाप्रतिबद्धरासयोर्नामनी सूचिते। एवं सम्प्रत्यदृष्टचरमपि श्रीहेमचन्द्राचार्येण काव्यानुशासने [अ. ८, पृ. ३३७] समसूचि—' अपभ्रंशभाषानिबद्ध**मद्धिमथन—भीम**काव्यादि। वि. सं. ११२३ वर्षे सिद्धसेनसूरिणा साधारणाङ्केन सन्दर्भिता विलासवतीकथा, वि. सं. १२१६ वर्षे कुमारपालराज्ये हरिभद्रसूरिणा रचितं नेमिनाथचरितम्, महेश्वरसूरिणा निर्मिता संयममञ्जरी चापभ्रंशभाषायां जेसलमेरुदुर्गीयभाण्डागारे विद्यते इति परिदर्शितमस्माभिस्तत्सूच्याम् (गा. ऑ. सिरीझ्

क्र. २१)। तत्रापि संयममञ्जरी तु डॉ. पी. डी. गुणेमहाशयेन भविष्यदत्तकथोपोद्घाते समुद्धृता। नेमिनाथचरितं च डॉ. हर्मण् याकोबीमहाशयेन निजभाषालिप्यां समपादि। वि. सं. १२७४ वर्षेऽमरकीर्तिविरचितः षट्कर्मोपदेशोऽन्येऽप्येतादृशा अवाप्यन्तेऽप्रसिद्धा ग्रन्थाः। अन्यदपि प्राप्यते यत्र तत्रोपदेश–कथा–चरित–प्रबन्धाद्यन्तर्गतं नाटकालङ्कार–च्छन्दः–स्तोत्रादिगतं कुलकादिरूपं च प्रसिद्धाप्रसिद्धमपभ्रंशवाङ्मयम्। महाकविपुष्पदन्तस्य त्रिषष्टिमहापुरुषगुणालङ्कारमहापुराण–नागकुमारचरित–यशोधरचरितानि, श्रीचन्द्रस्य कथाकोषः, कनकामरस्य करकण्डूचरितम्, पद्मकीर्तेः पार्श्वनाथपुराणम्, देवसेनस्य श्रावकधर्माचारः, नयनन्देः सुदर्शनचरितम्, धवलस्य हरिवंशपुराणमित्यादीन्यपभ्रंशकाव्यानि प्रारम्भप्रान्तांशप्रदर्शनपूर्वं सूचितानि खलु मध्यप्रदेश–बिरार-सत्कपुस्तकसूच्यां रा. ब. श्रीयुतहीरालालमहाशयेन। इतराणि तु प्रेक्षिष्यन्त इत एव प्रकाश्यमानायां पत्तनीयजैनभाण्डागारसूच्यामिति नात्र तदंशा अवतार्यन्ते। गद्य-पद्यमयं प्राचीनमुदाहृतिरूपं कियच्चात्र परिदर्श्यते।

अपभ्रंश–वाङ्मयोदाहरणानि

अपभ्रंशभाषाप्रसिद्धं ध्रुवकमुत्तराध्ययनादौ जैनसिद्धान्तसूत्रेऽप्युपलभ्यते[1], यस्य स्मरणं दाक्षिण्यचिह्नोद्योतनाचार्यादिना कुवलयमालाकथाऽऽदौ[2] हेमचन्द्राचार्यप्रभृतिभिः छन्दोऽनुशासनादौ च व्यधायि[3]। संस्कृतादन्यदपभ्रंश इति पतञ्जलि-दण्डिदर्शितपूर्वोक्तलक्षणानुसारेणापभ्रंशसंज्ञिते प्राकृतलाक्षणिकैश्चार्षप्राकृतार्धमागधीति संज्ञया प्रख्यापिते प्राचीने जैनसिद्धान्ते तन्निर्युक्ति-भाष्य–चूर्णि–वृत्तिप्रभृतिषु तथाऽपभ्रंशलक्षणसिद्धे कथा-काव्यादौ चोपलभ्यन्तेऽपरिमिताः शब्दा येऽद्यावधि प्रयुज्यन्तेऽपभ्रंशापरनामधेयासु देशभाषासु। भूमिकागौरवभयात् कियदेवात्रोदाह्रियते—

---

१ "अधुवे असासयंमि संसारंमि दुक्खपउराए।
किं नाम होज्ज तं कम्मयं जेणाहं दुग्गइं न गच्छेज्जा॥" —उत्तराध्ययने [८,१].
विक्रमीयैकादशशताब्यां विद्यमानो वादिवेतालशान्तिसूरिरस्य व्याख्यायामित्थमसूचयत्—
"स हि भगवान् कपिलनामा स्वयम्बुद्धश्चौरसङ्घातसम्बोधनायेमं(दं) ध्रुवकं संगीतवान्। ध्रुवकलक्षणं चेदम्—
'जं गिज्जइ पुव्वं(धुवं) चिय पुण पुणो सव्वकव्वबंधेसु।
ध्रुवयं ति तमिह तिविहं छप्पयं चउपयं दुपयं॥'
एवं च भगवतोद्गीते तेऽप्येनमेव ध्रुवकं प्रत्युद्गायन्ति, तालं च कुट्टयन्ति।"
—उत्तराध्ययनबृहद्वृत्तौ [२८९–२९०].

२ एतदग्रे चर्चरीविमर्शे [भू. पृ. ११४] विलोकनीयम्।

३ 'सन्ध्यादौ कडवकान्ते च ध्रुवं स्यादिति ध्रुवा ध्रुवकं घत्ता वेति संज्ञान्तरम्।'
—छन्दोऽनुशासने [६,१].

जवा[1] लोहमया चेव **चावेयव्वा** सुदुक्करं । जेहा दुक्खं भरेउं जे **होइ** वायस्स **कोत्थलो**।
भायरा[3] मे महाराय ! **सगा** जिट्ठ-कणिट्ठगा । **पुल्लेव मुट्ठी**[4] जह से असारे ।
—उत्तराध्ययने [अ. १९;३८,४०.२०;२६,४२].

शय्यम्भवसूरिः—

" तेहेव **होले**[5] ! **गोलि** त्ति **साणे** ! वा **वसुलि** त्ति अ ।
दमए ! **दुहए** ! वा वि नेवं भासिज्ज पन्नवं ॥
हले[6] ! **हलि** त्ति **अन्नि** त्ति **भट्टे** ! **सामिणि** ! **गोमिणि** ! ।
होले ! **गोले** ! **वसुलि** त्ति इत्थिअं नेवमालवे ॥ " +
—दशवैकालिकसूत्रे [आ. समितिप्र. २१९]

भद्रबाहुसूरिः—

" **लद्धिलिअं**[7] च बोहिं **अकरिंतो** णागयं च **पत्थंतो** ।
दच्छिसि जह तं विब्भल ! इमं च अन्नं च **चुक्किहिसि** । "

गीतिका—सुट्ठु[8] वाइयं सुट्ठु **गाइयं** सुट्ठु **नच्चियं** साममुंदरि ! ।
अणुपालिय दीहराइयओ **सुमिणंते** मा पमायए ॥ "
—आवश्यकनिर्युक्तौ [गा. १०९९, १२९०]

योगीन्द्रदेवः—

* " कालु लहेविणु जोइया ! **जिमु जिमु** मोहु **गलेइ** ।
तिमु तिमु दंसणु **लहइ** जिउ णियमें अप्पु मुणेइ ॥"

---

१ यत्ना लोहमयाश्चैव चर्वयितव्याः सुदुष्कराः । २ यथा दुःशको भर्तुं भवति वातस्य कोष्ठः ।
३ भ्रातरो मे महाराज ! स्वका ज्येष्ठ-कनिष्ठकाः । ४ रिक्तेव मुष्टिर्यथा सोऽसारः ।
५ तथैव **होले** ! **गोले** इति **साणे** ! वा **वसुले** इति च ।
दमए ! **दुहए** ! वाऽपि नैवं भाषेत प्रज्ञावान् ॥
६ **हले** ! **हले** इति **अन्ने** इति **भट्टे**-**सामिणि** ! **गोमिणि** ! ।
होले ! **गोले** ! **वसुले** इति स्त्रियं नैवमालपेत् ॥

+ हरिभद्रसूरिः—' इह **होला**दिशब्दास्तत्तद्देशप्रसिद्धितो नैष्ठुर्यादिवाचकाः । तथा **होले गोले वसुले** इत्येतान्यपि नानादेशापेक्षया आमन्त्रणवचनानि(न्य)गौरवकुत्सादिगर्भाणि वर्तन्ते ।'
—दश० व्याख्यायाम् ।

७ लब्धं च बोधिमकुर्वन्नागतं च प्रार्थयमानः ।
द्रक्ष्यसि यथा तद् विह्वल ! अस्माच्चान्यस्माच्च भ्रंशिष्यसि ॥
८ सुष्ठु वादितं सुष्ठु गीतं सुष्ठु नर्तितं श्यामसुन्दरि ! ।
अनुपाल्य दीर्घरात्रीः स्वप्रान्ते मा प्रमादीः ॥

* उदाहरति स्मेदं पद्यं चण्डः प्राकृतलक्षणे [प. ४७] इति योगीन्द्रदेवस्य चण्डात् प्राचीनता प्रतिभाति ।
९ कालं लब्ध्वा योगिन् ! यथा यथा मोहो गलति ।
तथा तथा दर्शनं लभते जीवो नियमेनात्मानं जानाति ॥

† " [1]संता विसय जु **परिहरइ,** बलि किज्जउं **हउं तासु** ।
सो दइवेण जि **मुंडियउ,** सीसु खडिल्लउ **जासु** ॥"

‡ " [2]पंचहं णायकु वसि **करहु,** जेण होंति वसि अण्ण ।
मूल विणट्ठइ तरुवरहं, अवसइं **सुक्कहिं पण्ण** ॥"

—परमात्मप्रकाशे [गा. ८६,२७०,२७१]

* " [3]**भल्लाहं** वि णासंति गुण जहं संसग्गु खलेहिं ।
वइसाणरु लोहहं **मिलिउ** तें **पिट्टियइ** घणेहिं ॥

*[4]जोइय ! मो(लो, णे, दे)हु परिचयहि, मो(लो, णे, दे)हु ण **भल्लउ** होइ ।
मो(लो, णे, दे)हासत्तउ सयलु जगु, दुक्खु **सहंतउ जोइ** ॥"

—परमात्मप्रकाशे [२३७,२३८,२४३,२४९,२८३]

विरहाङ्कहरिभद्रसूरिरुदाहरद्— " [5]केणावि उग्गीयं—

जइ **फुल्ला कणियारया** चूयय ! अहिमासमयंमि घुट्ठंमि ।
तुह न खमं **फुल्लेउं** जइ पच्चंता करिंति **डमराइं** ॥ "

---

† उदाहरदिदं पद्यं पाठान्तरेण हेमचन्द्राचार्यः—

"संता भोग जु परिहरइ, तसु कन्तहो बलि कीसु ।
तसु दइवेण वि मुण्डियउं, जसु खल्लिहडउं सीसु ॥ "—सिद्धहेम० [८।४।३८९]

१ सतो विषयान् यः परिहरति बलिं कुर्वेऽहं तस्य ।
स दैवेनापि मुण्डितः शीर्षे खल्वाटं यस्य ॥

‡ किञ्चित् पाठान्तरेण प्रादर्शयदिदं पद्यं हेमचन्द्राचार्यः—

" जिब्भिन्दिउ नायगु वसि करहु, जसु अधिन्नइं अन्नइं ।
मूलि विणट्ठइ तुंविणिहे अवसें सुक्कइं पण्णइं ॥"—सिद्धहेम० [८।४।४२७]

२ पञ्चानां नायकं वशे कुरु येन भवन्ति वशेऽन्यानि ।
मूले विनष्टे तरुवरस्यावश्यं शुष्यन्ति पर्णानि ॥

* कुवलयमालोक्तसूचनानुसारेण [भूमिका पृ.९३] 'भल्लाहं' 'भल्लउ' शब्दप्रयोगाद् गूर्जरदेश्यम् ।

३ भद्राणामपि नश्यन्ति गुणा येषां संसर्गः खलैः ।
वैश्वानरो लोहेन मिलितस्तेन पिट्टय(हन्य)ते घनैः ॥

४ योगिन् ! मोहं (लोभं, स्नेहं, देहं) परित्यज मोहः (लोभः, स्नेहः, देहो) न भद्रो भवति ।
मोहा(लोभा- स्नेहा- देहा-)सक्तं सकलं जगत्, दुःखं सहमानं पश्य ॥

५ केनाप्युद्गीतम्—यदि पुष्पिताः कर्णिकारकाश्चूतक ! अधिकमासे घुष्टे ।
तव न क्षमं पुष्पितुं यदि प्रत्यन्ताः कुर्वन्ति डमराणि ॥

"वररुई डिंभरूवाणि मोयगे दाऊण इमं पाढेइ—

* **राय नंदु** नवि **जाणइ** जं **स**गडालो काहिइ ।
राय नंदं मारेत्ता तो **सि**रियं रज्जे ठवेहिइ ॥"[1]

"[2]सा भणइ—

न दुक्करं **तोडिय अंबलुंबिया** न दुक्करं **नच्चिउं सिक्खियाए** ।
तं दुक्करं तं च महाणुभावं जं सो मुणी पमयवणंमि वुच्छो ॥"

—आवश्यकसूत्रवृत्तौ [पृ. ५९७,६९४,६९७]

"[3]ईरि(र)मंदिरपण्णहारओ मह कंतु गतो वणिजारओ ।
वरिसाण सयं च जीवउ मा **जीवंतु घरं** कयाइ एउ ॥"

—दशवैकालिकटीकायाम् [पृ. ५८]

वि. सं. ८३९ वर्षे दाक्षिण्यचिह्नोद्योतनाचार्यः—

"[4]**रे रे आरोट्ट ! भण रे जाव ण पम्हुसइ । जनार्दन पुच्छह कत्थ तुज्झे कल्ल जिमिअल्लया ?** । तेण भणिउ--**साहिउं जे तेतउत्तस्स वलक्खइएल्लयह तणए जिमिअल्लया** । तेण भणियं–**किं सा विसेमहिला वलक्खइएल्लिअ ?** । तेण भणिउ–**अहहा ! सा य भडारिअ संपूर्ण्ण स्वलक्खण गायत्रि यदसिअ** ।

---

* वि. सं. १०५५ वर्षे वर्धमानसूरिरिदमित्थमुदाहरति स्म—

'राय **णं**दो णवि जाणति जं **स**गडालु करेसइ । राय **णं**दु मारेत्ता **सि**रियउ रज्जे ठवेसइ ॥'

—उपदेशपदव्याख्यायाम् [हं. प. ५४]

वि. सं. ११७४ वर्षे मुनिचन्द्रसूरिः—

"एउ लोउ नवि याणइ जं **स**गडालु करेसइ । **नं**दु राउ मारेविणु **सि**रियउ रज्जि ठवेसइ ।"

—उपदेशपदवृत्तौ [८७]

भद्रेश्वरसूरिः—

"एउ **स**गडालो भणइ जं **स**गडालु करिस्सइ । **नं**दराओ मारेविणु **सि**रियउ रज्जे ठविस्सइ ॥"

—कथावल्याम् [पत्तनीयता. २६०]

१ वररुचिः डिम्भरूपेभ्यो मोदकान् दत्त्वेदं पाठयति—
राजा **नन्दो** नैव जानाति यत् **शकटालः** करिष्यति ।
राजानं **नन्दं** मारयित्वा **श्रीयकं** राज्ये स्थापयिष्यति ॥

२ सा भणति—न दुष्करं त्रोटिताऽऽम्रलुम्बिका न दुष्करं नर्तितं शिक्षितया ।
तद् दुष्करं तच्च महानुभावं यत् स मुनिः प्रमदावने उषितः ॥

३ करभपण्यधारको मम कान्तो गतो वणिजारतः ।
वर्षाणां शतं च जीवतु मा जीवन् गृहं कदापि एतु ॥

४ "रे रे आरोट्ट ! भण रे ! यावद् न विस्मरति । जनार्दन ! पृच्छामि कुत्र यूयं कल्ये जिमितवन्तः । तेन भणितम्–कथयामि, यः स...तस्य(?) बलक्षयिकस्य सत्के(?) जिमितवन्तः । तेन भणितम्-किं.....सा वैश्यमहिला बलक्षयिका (?) । तेन भणितम्–अहह ! सा च भट्टारिका सम्पूर्ण-सुलक्षणा गायत्री यादृशी ।

[1]अण्णेण भणियं—वर्णि ! कीदृशं तत्र भोजनं ?

,, ,, चाई भट्टो ! मम भोजन स्पृष्टं तक्षको हं न वासुकि ।

,, ,, कत्तु घडाति तउ हृद्धय उल्लाव भोजन स्पृष्ट स्वनाम सिंघसि ?

,, ,, —अरे रे वड्डो(चट्टो)महामूर्ख ! ये पाटलिपुत्र-महानगरावास्तव्ये ते कुत्था समासोक्ति बुज्झंति ?

,, ,, —अस्मादपि इअं मूक्खतरी ।

,, ,, काइं कज्ज ?

तेण भणिअं—अनिपुणनिपुणाथोक्तिप्रचुर ।

,, ,, नर काइं, मां मुक्त(शुक्ल)अश्वोपि विदग्धः संति ।

अण्णेअ भणिअं—भट्टो ! सत्यं त्वं विदग्धः, किं पुणु भोजने स्पृष्ट माम कथित ।

तेण भणिअं—अरे महामूर्खः वासुकेर्वदनसहस्रं कथयति ।

कुमारेण य चिन्तिअं-'अहो ! असंबद्धक्खरालापत्तणं बालदेसिआणं । अहवा को अण्णो वापारो इमाणं परपिण्डपुट्ठदेहाणं विज्जा–विण्णाण–णाण–विणयविरहिआण च–ट्टरसायणं मोत्तूण ' चिंतयंतस्स भणियमण्णेण चट्टेण––

---

१ अन्येन भणितम्–वर्णिन् ! कीदृशं तत्र भोजनम् ?

,, ,, —त्यागिन् भट्ट ! मम भोजनं स्पृष्टम्, तक्षकोऽहं न वासुकिः ।

,, ,, —कुतो घटते तव हा धिक् उल्लापो भोजने पृष्टे स्वनाम कथयसि ?

,, ,, —अरे रे चट्ट महामूर्ख ! ये पाटलिपुत्रमहानगरवास्तव्यास्ते कुत्र समा-सोक्तिं बुध्यन्ते ।

,, ,, —अस्मादपीयं मूर्खतरी ।

,, ,, —कुतः कार्यात् ?

तेन भणितम् —अनिपुण–निपुणार्थोक्तिप्रचुरा ।

,, ,, ——नरः कथम्, मम शुक्लोऽश्वोऽपि विदग्धोऽस्ति ।

अन्येन भणितम्–भट्ट ! सत्यं त्वं विदग्धः, किं पुनर्भोजने स्पृष्टं मम कथय ।

तेन भणितम्–अरे ! महामूर्खो वासुकेर्वदनसहस्रं कथयति ।

कुमारेण च चिन्तितम्–अहो ! असम्बद्धाक्षरालापित्वं बालदेश्यानाम् । अथवा कोऽन्यो व्यापार एषां परपिण्डपुष्टदेहानां विद्या–विज्ञान–ज्ञान–विनयविरहितानां चट्ट(वार्ता)रसायनं मुक्त्वेति चिन्तयति भणितमन्येन चट्टेन—

[1]भो भो भट्टउत्ता ! तुम्हे ण याणह यो राजकुले वृत्तान्त :

तेहिं भणियं--भण हे व्याघ्रस्वामि ! क वार्ता राजकुले ?

तेण भणियं--कुवलयमालाए पुरिसद्वेषिणीए पातओ लंबितः ।

इमं च सोऊण अप्फोडिऊण एक्को उट्ठिउ चट्टो । भणिअं च यदि पांडित्येन ततो मइं परिणेतव्य कुवलयमाल ।

अण्णेण भणियं—अरे ! कवणु तउ पाण्डित्यु ? ।

तेण भणिअं—षडंगु पढमि, त्रिगुण मन्त्र पढमि, किं न पाण्डित्यु :

अण्णेण भणिअं--अरे ! ण मंत्रेहिं तृगुणेहिं परिणिज्जइ, जो सहितौ पातौ भिं(विं)दइ सो तं परिणेति ।

अण्णेण भणियं—अहं सहितउ ज्जो ग्वार्थी पढमि ।

तेहिं भणिअं—कइसी रे व्याघ्रसामि ! गाथः ?

तेण भणिअं—इम ग्वाथ—

सा ते भवतु सुप्रीता अबुधस्य कुतो बलं ?
यस्य यस्य यदा भूमि सर्वत्र मधुसूदनः ॥

तं च सोऊण अण्णेण सकोपं भणिअं—

अरे अरे मूर्ख ! स्कंधकोपि गाथ भणसि ! अम्ह गाथ ण पुच्छह ।

---

१ भो भो भट्टपुत्रा यूयं न जानीथ यो राजकुले वृत्तान्तः ?

तैर्भणितम्–भण हे व्याघ्रस्वामिन् ! का वार्ता राजकुले ?

तेन भणितम्–कुवलयमालया पुरुषद्वेषिण्या पादो लम्बितः ।

इदं च श्रुत्वाऽऽस्फोट्यैक उत्थितश्चट्टः । भणितं चानेन–

यदि पाण्डित्येन ततो मया परिणेतव्या कुवलयमाला ।

अन्येन भणितम्–अरे ! कीदृक् तव पाण्डित्यम् ?

तेन भणितम्–षडङ्गं पठामि, त्रिगुणं मन्त्रं पठामि, किं न पाण्डित्यम् ?

अन्येन भणितम्–अरे ! न मन्त्रैस्त्रिगुणैः परिणीयते, यः सहृदयः पादान भिनत्ति(वेत्ति) स तां परिणयति ।

अन्येन भणितम्–अहं सहृदयो यो गाथां पठामि ।

तैर्भणितम्–कीदृशी रे व्याघ्रस्वामिन् ! गाथा ?

तेन भणितम्–इयं गाथा—

तच्च श्रुत्वाऽन्येन सकोपं भणितम्–अरे अरे मूर्ख ! स्कन्धकमपि गाथां भणसि ! अस्मान् गाथां न पृच्छथ ।

[1]तेहिं भणिअं—**त्वं पठ भट्टो यजुस्वामि ! गाथः ।**

तेण भणियं—**सुट्ठु पढमि—**

आए कप्पे मत्त गय गोदावरि ण मुयंति ।

को तहु देसहु आव(प)ति को व पराणति वात्त ॥

अण्णेण भणिअं—**अरे ! सिलोगो अम्हे ण पुच्छह ग्वाथी । पठहो ।**

तेण भणिअं—**सुट्ठु पढमि—**

तंबोलरइयराउ अहरो कामिनिं दट्ठा ।

अम्हं चिअ क्खुभइ मणो दारिद्रगुरू णिवारेइ ॥

तउ सव्वेहि वि भणिअं—**अहो ! भट्ट यजुस्वामि विदग्ध पंडितु विद्यावंतो ग्वाथी पढति, एतेन सा परिणेतव्या ।**

अण्णेण भणियं—**अरे ! केरिसो सो पातउ जो तीय लंवितु ।**

तेण भणिउ—**राजांगणे मइं पठितु आसि, सो से विस्मृतु, सव्वु लोकु पढति** त्ति ॥

इमं च सोऊण चट्टरसायणं चिन्तियं रायउत्तेण–अहो ! अणाहवट्टिआणं असंबद्धपलावत्तणं चट्टाणं ति ॥"

—कुवलयमालाकथायाम् [जे. भां. ता. १३०,१३१]

---

१ तैर्भणितम्–त्वं पठ भट्ट यजुस्वामिन् ! गाथाम् ।

तेन भणितम्–सुष्ठु पठामि—

आदौ कल्पे मृतिं गता गोदावरीं न मुञ्चन्ति (?)।

कस्तस्माद् देशादापतति को वा पर्याणयति वार्ताम् ? ॥

अन्येन भणितम्–अरे ! श्लोकः, अस्मान् न पृच्छथ गाथां पठामि ।

तेन भणितम्–सुष्ठु पठामि—

ताम्बूलरचितरागमधरं कामिन्या दृष्ट्वा ।

अस्माकमपि क्षुभ्यति मनो दारिद्र्यगुरुर्निवारयति ॥

ततः सर्वैरपि भणितम्–अहो ! भट्टयजुस्वामी विदग्धपण्डितो विद्यावान् गाथां पठति । एतेन सा परिणेतव्या ।

अन्येन भणितम्–अरे ! कीदृशः स पादो यस्तया लम्बितः ।

तेन भणितम्–राजाङ्गणे मया पठित आसीत्, स तु विस्मृतः, सर्वो लोकः पठतीति ।

इदं च श्रुत्वा चट्ट(वार्ता)रसायनं चिन्तितं राजपुत्रेण–अहो ! अनाथवृत्तिकानामसम्बद्धप्रलापित्वं चट्टानामिति ॥

[1]"सयलं पुहईमंडलं परिभमिऊण संपत्तो **महुराउरीए** । एत्थ एक्कम्मि अणाहमण्डवे पविट्ठो । अवि य तत्थ ताव मिलियालए **कोड्डीए । वलक्ख खइयए । दीण दुग्गय । अंधलय । पंगुलय । मंदुलय । मडहय । वामणय । छिण्णणासय । तोडियकण्णय । छिण्णोट्ठय । तडिय । कप्पडिय । देविय । तित्थयत्तिय । लेहाराय । धम्मिय । गुग्गुलिय । भो(लो)या** । किं च बहुणा जो **माउ-पिउ-रुट्ठेल्लउ** सो सो सव्वो वि तत्थ **मिलिएल्लउ** त्ति । ताहं च **तेत्थु मिलिएलय** सह समाणह एक्केक्क महाआलावा पयत्ता । भो भो ! कयरहिं तित्थे दे[वे] वा गयाहं कयरा वाहि पावं वा **पिट्टइ** त्ति । एक्केण भणिअं–अमुक्का वाणारसी **कोढिएहिं** । तेण **वाणारसीगयाणं कोढु प्फिट्टइ** त्ति ।

अण्णेण भणिअं–**हुं हुं कहिउ वुत्तंतउ तेण जंपिएल्लउ । कहिं कोढं । कहिं वाणारसि । मूलत्थाणु भडारउ भो(?को)ढइं जे देइ । उद्दालि लोअहुं ।**

अण्णेण भणिअं–**रे रे जइ शू(मू)लत्थाणु देइ उद्दालइज्जं कोढइं । ता पुणु काइं कज्जु अप्पाणु कोढिअल्लउ अच्छइ ?**

अण्णेण भणिअं–**जा ण कोढिएल्लउ अच्छइ ता ण काइं कज्जु । महाकालु भडारउ छम्मास सेवण्ण कुणइ । जेण शू(मू)लहेज्जे फिट्टइ ।**

अण्णेण भणिअं–**काइं इमेण जत्थ चिरपरूढ पाउ फिट्टइ, तुम्भे उद्दिसह तित्थ ।**

---

१ सकलं पृथ्वीमण्डलं परिभ्रम्य सम्प्राप्तो **मथुरा**पुर्याम् । अत्रैकस्मिन्ननाथमण्डपे प्रविष्टः । अपि च तत्र तावन्मिलिताः कुष्ठिनो बलाक्षक्षयिनः (?) दीन दुर्गताः । अन्धाः । पङ्गुलाः । मन्दाः । लघुकाः । वामनाः । छिन्ननासिकाः । त्रोटितकर्णाः । छिन्नोष्ठाः । तटिकाः (?) । कार्पटिकाः । देविकाः । तीर्थयात्रिकाः । लेखकाः । धार्मिकाः । गुग्गुलिकाः । लोकाः । किञ्च बहुना यो मातृ-पितृरुष्टः स स सर्वोऽपि तत्र मिलित इति । तेषां च तत्र मिलितैः सह प्रत्येकं महालापाः प्रवृत्ताः । 'भो भोः! कतरे तीर्थे दे[वे] वा गतानां कतरो व्याधिः पापं वा भ्रश्यति' इति । एकेन भणितम्–'अमुका **वा**राणसी कुष्ठिभिः । तेन **वा**राणसीगतानां कुष्ठो भ्रश्यति इति । अन्येन भणितम्–हुं हुं कुत्रत्यो वृत्तान्तस्तेन जल्पितः । क्व कोढः ! क्व वाराणसी ! मूलस्थाणुभट्टारकः कुष्ठान् यो देव उद्दालयति(?) लोकानाम् ।

अन्येन भणितम्–रे रे ! यदि मूलस्थाणुर्देव उद्दालयति (?) कुष्ठान्, तदा पुनः किं कार्यं वयं कुष्ठिन आस्महे ?

अन्येन भणितम्–यो न कुष्ठी आस्ते, तस्य न किंचित् कार्यम् । महाकालभट्टारकस्य षण्मासान् सेवां करोति येन मूलादेव भ्रश्यति ।

अन्येन भणितम्–किमनेन ? यत्र चिरप्ररूढं पापं भ्रश्यति, यूयमुद्दिशत तीर्थम् ।

[1]अण्णेण भणिअं–**पयागवडपडिअहं चिरपरूढ पाय वि हत्थ वि फिट्टंति ।**

,, ,, –**अरे ! पाव पुच्छिय पाय साहहि ?**

,, ,, –**खेदु मेल्लहं । जइ परमाइं पिइवहकयइं पि महापावइं गंगासंगमे ण्हायहं भइरवभडारयपडिअहं णासइं त्ति ।**

—कुवलयमालाकथायाम् [जे. भां. ता. ४३–४४]

"तउ भणियं एक्केण गाममहत्तरेणं—

एहु एहउं दुम्मणस्साहु । सव्वं जे घुं(थु) जा अरिदु । तुज्झा णउं* वंक वलितउं । पारद्धउं एउ(तु) मइं । सुगइ भ्रातु व(च)र भ्राति संप्रतु ।

तउ अण्णेण भणियं—

थु जे विरइदु धणलवासा त सुहलंप्पडे एतु मइं दुत्थट्ठमणमोहलुद्धउं तुं संप्राति ब्रोलितउं । एतु(उ) एतु(उ) प्रारद्धु भल्लउं * ।

तउ अण्णेण भणिअं चिरजराजुण्णदेहेण—

एत्थ सुज्झति किर सुवण्णं रे* वइसाणरमुहगतउं कउं पाउ मित्तस्स वंचण । कामालिअव्रतधरणे एतु(उ) पाउ दुज्झे प्पणाहिय ।

तउ सयलद्रंगसामिणा भाणिअं जेट्ठमहामयहरेण—

---

१ अन्येन भणितम्–' प्रयागवटपतितानां चिरप्ररूढौ पादावपि हस्तावपि भ्रश्यतः । '

अन्येन भणितम्–' अरे पापं धृष्टं पादौ कथयसि ? '

अन्येन भणितम्–खेदो मुच्यताम् । यदि परमाणि पितृवधकृतान्यपि महापापानि गङ्गासङ्गमे स्नातानां भैरवभट्टारकपतितानां नश्यन्ति । ' इति ।

२ ततो भणितमेकेन ग्राममहत्तरेण–एतदेतादृग् दौर्मनस्यं खलु सर्वं यत् त्वयाऽऽचरितम् । तव वक्रं व(च)लितम् । प्रारब्धमेतत् प्रति सुगतिं भ्राता चर भ्रातः सम्प्रति(?) ।

ततोऽन्येन भणितम्—

त्वया यद् विरचितं धनलवाशया तथा सुखलम्पटेनैतं प्रति । दुष्टार्थ-मनोमोहलुब्धस्त्वं सम्प्रत्यब्रवीः एतत् एतत् प्रारब्धं भद्रम् ।

ततोऽन्येन भणितं चिरजराजीर्णदेहेन—

अत्र शुध्यति किल सुवर्णं रे वैश्वानरमुखगतं कुतः पापं मित्रवञ्चनस्य ? कापालिकव्रतधरणे एतत् पापं तव प्रणङ्क्ष्यति ।

ततः सकलद्रङ्गस्वामिना भणितं ज्येष्ठमहामहत्तरेण—

* कुवलयमालाकथोल्लेखानुसारेण [भूमिका पृ. ९३] गूर्जरदेश्यमेतत् ।

[1]**धवलवाहण धवलदेहस्स सिरि भ्रमिति जा विमलजल । धवलुज्जल सा भडारी यति गंग प्रावेसि तुहुं मित्रद्रोज्झु तो णाम सुज्झति ।"**

" *[2]ताव इमं गीययं गीयं गामणडीए—

जो जसु माणुसु वल्लहउं तं जइ अण्णु रमेइ ।
जइ सो जाणइ जीवइ पत्तो तहु प्राण लएइ ॥ "

×" [3]रोईए पच्छिमजामे केण वि **गुज्जर**पहिएण इमं धवलदुवहयं गीयं । अवि य—

जो णवि विहुरे विभज्जण्णउ धवलउ कड्ढइ भारु ।
सो गोट्ठंगणमण्डणउ सेसउ व जं सारु ॥ "

—कुवलयमालाकथायाम् [जे. भां. ता. ९१,३७,४७]

वि. सं. ९२९ वर्षे[4] शीलाङ्काचार्यविमलमतिः—

"[5]सयणु परियणु बंधुवग्गं पि भिच्चयणु । सुहि सज्जणु वि **घरि** कलत्तु आणावडिच्छउं ॥
अत्थुम्ह किल **घरि धरइ** जाव । ताव पुण्णेहिं समग्गलु ॥"

—चतुष्पञ्चाशन्महापुरुषचरिते [हं. प. ४]

---

१ धवलवाहन—धवलदेहस्य शिरसि भ्राम्यति या विमलजला, धवलोज्ज्वलां तां भट्टारिकां यदि गङ्गां प्रविशसि त्वं मित्रद्रोहस्तदा नाम शुध्यति ॥

* रत्नप्रभसूरिरिदं संस्कृत इत्थमन्वबादीत्—"तावदिदं नट्या गीतम्—
इष्टं यन्मानुषं यस्य तदन्येन रमेत चेत् । स जानन्नेवमीर्ष्यालुरादत्ते तस्य जीवितम् ॥"
—कुवलयमालाकथासंक्षेपे [आ. सभाप्र. ३८]

२ तावदिदं गीतकं गीतं ग्रामनट्या—
यो यस्य मनुष्यो वल्लभस्तं यद्यन्यो रमते । यदि स जानाति जीवति प्राप्तस्तस्य प्राणान् गृह्णाति॥

× रत्नप्रभसूरिरिदमित्थमन्ववदत्—"पाश्चात्ययामे केनापि **गूर्जर**पथिकेन गीतम्—
धवल इव योऽत्र विधुरे स्वजनो नो भारकर्षणे प्रवणः ।
स च गोष्ठाङ्गणभूतलविभूषणं केवलं भवति ॥"
—कुवलयमालाकथासंक्षेपे [आ. सभाप्र. ५३]

३ रात्र्याः पश्चिमयामे केनापि गूर्जरपथिकेनेदं धवलदुर्वहत्वं गीतम् । अपि च—
यो नैव विधुरे विभग्नको धवलः कर्षति भारम् । स गोष्ठाङ्गणमण्डनः शेष इव यत्सारः ॥

४ जे. भां. सूच्यामप्रसिद्धग्रन्थग्रन्थकृत्परिचये [४३-४४]

५ " नांद्यते सूत्रधारः—आदिष्टोऽहमद्य साधुजनपर्षदा यथाऽद्य त्वया कवेः **शीलांक**स्य **विमलमत्य**भिधानस्य कृतिः **विबुधानंदं** नाम नाटकं एकमंकाख्यरूपकं नाटयितव्यमिति ॥"
—चतुष्पञ्चाशन्महापुरुषचरिते [हं. ३१]

६ स्वजनः परिजनो बन्धुवर्गोऽपि भृत्यजनः । सुखी सज्जनोऽपि गृहे कलत्रमाज्ञाप्रतीच्छकम् । अर्थोष्म किल गृहे धरति यावत् । तावत् पुण्यैः समर्गलः ॥

वि. सं. १०९९ वर्षे वर्धमानसूरिः—

"तथा च तन्मतम्—

'[1]ॐकारे बिंदु **उप्पज्जइ** बिंदुहे णाउ णाए से लिज्जइ।
बिंदुणाउ लउ जो परियाणइ अक्खरु अहव अणक्खरु **जाणइ** ॥
सो नवि **छिप्पइ** कलि–मलपावें। समरसिहूयउ ठाइ य भावें ॥"

—उपदेशपदटीकायाम् [हं. प. १९६]

वि. सं. ११२३ वर्षे [2]साधारणाङ्कसिद्धसेनसूरिः—

"[3]जेण एक्कु खणंतरु कंठु **देहु** अक्खंमि धंमक्खरु तं **सुणेहु**।
जा य दूमिज्जइ अन्नु लोउ ता वरि किउ धंमकहाविणोउ ॥
जाव य परतत्तिहिं **जाइ** कालु ता वरि परिभाविउ कंमजालु।
सव्वहो परदोसुग्घडणेण गुणु **कवणु होइ** चिंतहु मणेण ॥
संतोह य अहव असंतएहिं किं परदोसेहिं पयासिएहिं।
लब्भइ जमु(सु) अत्थु न **तेत्थु कोइ** अनु वि सो चेव य वइरि **होइ**॥
उप्पज्जइ परजण-पीड जेण तं कज्जु न **किज्जइ** वुहजणेण।
जं कंमु **हसंतउ** किर **करेइ** तं **रोवंतु** वि न तित्थर(रे)इ ॥"

"वामपासंमि देवी वि **वइसारिया** दिव्ववा(था)लाइं उवणंति **भंडारिया**।
कणय–मणि–रुप्प**कच्चोल**संपुन्नयं कणयत्थालं कुमरस्स विन्थिन्नयं।
दक्ख खज्जूर खुडुहुडिय उत्तत्तिया दिन्नं वरिसोलभव रायसंजुत्तिया।
....भुंजेवि किउ **हत्थपक्खालणं** सिंधुलवणेण सह दिज्जए **सालणं**।
अवं–**टीटी**–करीराइं **करवंदयं विल्लिया कक्कडं गज्जरं अद्दयं**।.....

---

१ विलोक्यताम् जे. भां. सूची [पृ. ६.]

२ ॐकारे बिन्दुरुत्पद्यते बिन्दोर्नादो नादे स लीयते।
बिन्दु–नादं लयं यः परिजानाति अक्षरमथवाऽनक्षरं जानाति।
स नैव स्पृश्यते कलिमलपापेन। समरसीभूतस्तिष्ठति च भावेन ॥

३ अवलोकनीयं जे. भां. सूच्याम् [१४, १८, अप्रसिद्ध० ४५]

४ जना एकं क्षणान्तरं कण्ठं (कर्णं) दत्त आख्यामि धर्माक्षरं तं शृणुत।
यावद् दूयतेऽन्यो लोकस्तावद् वरं कृतो धर्मकथाविनोदः ॥
यावच्च परतप्तिभिर्याति कालस्तावद् वरं परिभावितं कर्मजालम्।
सर्वथा परदोषोद्घटनेन गुणः को भवति चिन्तयत मनसा ॥
सद्भिश्चाथवाऽसद्भिः किं परदोषैः प्रकाशितैः ?।
लभ्यते यमो(शो)ऽत्र न तत्र कोऽपि अन्योऽपि स एव च वैरी भवति ॥
उत्पद्यते परजनपीडा येन तत् कार्यं न क्रियते बुधजनेन।
यत् कर्म हसन् किल करोति तद रुदन्नपि न निस्तरति ॥

पुणु गोहुमसालेहिं **मुग्गहं दालिहिं** पिट्ठेहिं सज्जिय रसघडिय ।
कालायरवद्धा हिंगु मुयंक **तलिय** तिविह **पप्पड पडिय** ॥ ३४ ॥
खंड आमुरिय आमुरिय **गुलामिट्ठयं** वहुपलेहेहिं तह भुंजियं **पेट्ठयं** ।
तलिय सयलेह चणऊरवाइंगणं कासमद्देण संसिद्धयं **रिंगणं** ।
तिंडिसं **कच्चरं** अंव अंवोइया दिन्न तुंडीरिया खंड संजोइया ।
चमलया चुंचु चणसाइ चमलाइया **वत्थुलो लोणओ सरिसवी राइया** ।
गोहुमा **चणय वल्ला** य तह **संगरो** वहुपयारेहिं निम्मविउ पाचुंगरो ।
वडिय पट्टविडिया वेरवडि निंविया **हरडइ दाडिमी अंवरसरद्धिया** ।
कंचणारं करीराइं टक्कारिया **फोग्ग** सोहंजणो दिन्न **वग्घारिया** ।
तलिय पडउल कंक्कोड कारेल्लया चंग **कालिंग कक्कडिय दिन्नेल्लिया** ।
"... **खीरवड घोलवड दुद्धवड** दिन्नया ..... पुणु पडंति धवलत्थ मंडया ।
घेउरा वि व(च)हुत्तरियखंडया चाउजाय सुहपायमंडिया सोयवट्टि **फिणी**ओ मंडिया ॥
सरस सेव सहिया **सुहालिया** सन्न चुइय कासार मीलिया ।
वर मुरुक्क **वडिया मुरुक्किया** कोक्करीस **लप्पासिय दुक्किया** ।
दुद्धवडय तह **लड्डु** लावणा सिंहकेसरा मोइया **घणा** ॥"
खंडखज्जु अट्ठारसं इमं तं कमेण परिविट्ठु उत्तमं ।
छासि हरणिरव **घोलइं** पाणइं वहुलइं भुत्तुत्तरे अइ**मिट्ठउं** ।
सहुं **सुंट्ठिहिं मिरिए**हिं खंडेहिं **तरिए**हिं **कढिउ दुद्धु** परिविट्ठउं ॥
" सो तारिस **होसइ कवण** देवि वाहाडइ किं न पाएहिं पडेवि ।
रुसंतइं सरिसं कवणु माणु माणहवि **वहिणि ! भल्लउ*** पमाणु ॥"
" [1]को संसारि सया सुहिउ ? कस्स व सयल मणोरह **पूरिय** ? ।
कस्स न **उपज्जइ** खलिउ ? कस्स न आसा–महादुम **चूरिय** ? ॥
तेणं[3] तित्थु **सेत्रुज्जु** पसिद्धउ अंतकालि कयउण्णेहिं **लद्धउ** ।
विमलगिरिहि जो अणसणु **पावइ** सो संसारि न पुणु पुणु **आवइ** ॥"
—विलासवतीकथायाम् [जे. भां. ता. २,१४७,८,२०२,२०९]

---

१ स तादृशो भविष्यति कथं देवी विबोधयति किं न पादयोः पतित्वा ।
रुष्यता सदृशं कीदृग् मानं मानयति भगिनि ! भद्रं प्रमाणम् ॥

२ कः संसारे सदा सुखितः ? कस्य वा सकला मनोरथाः पूर्णाः ?
कस्य नोत्पद्यते स्खलितं ? कस्य न आशा–महाद्रुमश्चूर्णः ? ॥

३ तेन तीर्थं शत्रुञ्जयः प्रसिद्धम् अन्तकाले कृतपुण्यैर्लब्धम् ।
विमलगिरौ योऽनशनं प्राप्नोति स संसारे न पुनः पुनरापतति ॥

काव्यत्रयी-परामर्शः ।

प्रस्तुतायाः काव्यत्रय्याः कर्तृविषये कविगुरुविषये व्याख्यातृविषयेऽपभ्रंशभाषाविषये च वक्तव्यमुपरि प्रादर्शि । अथ तस्या रचनाऽऽदिविषयेऽपि किञ्चिद् वक्तव्यमुचितम् ।

सुप्रतिष्ठिते खलु जैनशासने दुश्चरेषु साधूनामाचारेषु करालकालवैषम्याविलसितेन शैथिल्यं प्रोज्जृम्भे, यतोऽत्रैव खलु गूर्जरत्राया राजधान्यामणहिलपाटके चैत्यवासियतिनां प्राबल्यं प्रास्फुरत् । अस्मिंश्च समये चान्द्रकुलीनवर्धमानसूरिशिष्यो जिनेश्वरसूरिरविरुदगात् । येनाणहिलपाटकपत्तने चौलुक्यदुर्लभराजराजपर्षदि वादे चैत्यवासिनो विजित्य यतिनां चैत्यवासो न्यषेधि, वसतिवासश्च प्रचकाशे (विलोकनीयं परि० २, पृ. ९५–९६; परि० ३, पृ. १०८; भूमिका पृ. १०; जे. भा. सूची पृ. २) गणधरसार्धशतकवृत्त्यादेश्च यच्चरितमुपलभ्यते ।

वि.सं.१०९५वर्षे उपदेशपदटीकाकर्तुर्वर्धमानसूरेः शिष्योऽयं स एव जिनेश्वरसूरिरभिज्ञेयो येन वि. सं.१०८० वर्षे जावालिपुरे हारिभद्रीयाष्टकानां सुप्रसिद्धा वृत्तिः, प्रसिद्धं प्रमालक्ष्म-पञ्चलिङ्गी-षट्स्थानकप्रकरणादि च प्राणायि । यत्कृतेर्लीलावतीकथायाः कथाकोपस्य च सूचनमस्माभिरकार्यन्यत्र (जे. भां. सूची, अप्रसिद्ध० ९०,९६) यद्बन्धुर्बुद्धिसागरसूरिः वि. सं.१०८०वर्षे जावालिपुरे पञ्चग्रन्थीशब्दलक्ष्मप्रभृति प्रणिनाय । यच्छिष्यो धनेश्वरसाधुर्जिनभद्रसूरिः वि. सं. १०९५ वर्षे चड्डावलि(चन्द्रावती)पुर्यां सुरसुन्दरीकथां जुगुम्फ, जिनचन्द्रसूरिः वि. सं. ११२५ वर्षे संवेगरङ्गशालां व्यरचयत्, सुप्रसिद्धोऽभयदेवसूरिश्च वि. सं. ११२०–८ वर्षेषु पत्तनादौ नवाङ्ग–पञ्चाशकादिवृत्तीर्व्यधत्त स्तम्भने पार्श्वप्रतिमां च प्रत्यष्ठापयत् [अत्र भूमिका परिशिष्टं जे. भां. सूची च वीक्षणीया]

विक्रमीयैकादशशताब्द्यां जिनेश्वरसूरिणैवं प्रस्फुटं चैत्यवासादिशैथिल्ये प्रतिहते प्रभूतैर्वसतिवासे स्वीकृतेऽपि कैश्चिन्निजकदाग्रहो नैवात्यजि, तन्मूलोऽविधिश्च जिनगृहादौ नैव विरामेति विक्रमीयद्वादशशताब्द्यां चैत्यवासिनामेकतमोऽपि चैत्यवासिदीक्षितोऽपि वसतिवासिनवाङ्गीवृत्तिकाराभयदेवसूरिशिक्षितो जिनवल्लभसूरिस्तन्निवारणाय प्रायतत ।

अत्र भूमिकायां चर्चर्यादौ गणधरसार्धशतके [परि० २] सुगुरुपारतन्त्र्ये [परि० ३] च यो विस्तरेण परिचयं प्रापितस्तेन जिनवल्लभसूरिणा प्राक् चित्रकूटे विधिपथः प्रचकाशे, यदीयं सामान्यस्वरूपमेतदीयकृतेः सङ्घपट्टकात् [परि० १] समवबुध्यते । तस्यैव विधिपथस्य विशेषस्वरूपविज्ञानाय तत्कालप्रसृतप्रतिक्षिप्तविधिविज्ञानायापि च प्रभवति खलु प्रस्तुता काव्यत्रयी, या तदीयपट्टधरेण जिनदत्तसूरिणा प्रणीता, तत्प्रशिष्याभ्यां जिनपाल–सूरप्रभोपाध्यायाभ्यां च व्याख्याता ।

चर्चरी ।

प्राकृतापभ्रंशादिभाषायां 'चच्चरी' 'चाचरि' इति नाम्ना संस्कृतभाषायां च 'चर्चरी' इति संज्ञया प्रसिद्धाया गीतेर्नृत्यपूर्वं गान–क्रीडन–गुम्फनादिपद्धतिः प्राचीना परिज्ञायते यतः कविकालिदासो विक्रमोर्वश्याश्चतुर्थेऽङ्के प्रभूतानि चर्चरी-पद्यान्यपभ्रंशभाषायां व्यरचयत् । हरिभद्रसूरिः समरादित्यकथाऽऽदौ, दाक्षिण्यचिह्नोद्यतनाचार्यः कुवलयमालाकथाऽऽदौ, शीलाङ्काचार्यश्चतुष्पञ्चाशन्महापुरुषचरिते, कविः श्रीहर्षो रत्नावलीनाटिकायाः प्रारम्भेऽन्ये चान्यत्र स्मरन्ति स्म चर्चरीम् । पिङ्गलनाग–हेमचन्द्रादयः प्रतिपादयन्ति स्म चर्चरीलक्षणानि निजे छन्दःशास्त्र–च्छन्दोऽनुशासनादौ ।

प्रासिद्धयत खलु कविसोलणकृता चर्चरी इत एव प्रकाशिते प्राचीनगूर्जरकाव्यसङ्ग्रहे । उपलभ्यते चान्या पत्तनीयजैनभाण्डागारादौ वेलाउलीरागेण गीयमाना शत्रुञ्जयमण्डनादिजिनस्तुतिरूपा पञ्चत्रिंशद्गाथाप्रमाणा प्रायो विक्रमीयचतुर्दशशताब्दीसम्भवा, इतरा च गूर्जरीरागेण गीयमाना गुरुस्तुतिरूपा संक्षिप्ता पञ्चदशगाथापरिमिता ।

यमकालङ्काराद्यलङ्कृता प्रस्तुता चर्चरी तु सप्तचत्वारिंशत्पद्यप्रमिता जिनवल्लभसूरिस्तुतिरूपा चैत्यविधिप्रधाना संस्कृतवृत्तिसमन्विता वृत्तिकृत्सूचनानुसारेण पढ(ट)मञ्जरीभाषया नृत्यद्भिर्गीयमाना च ज्ञायते । पटमञ्जरीरागोऽसूचि खलु नारदकृते इत एव प्रकाशिते सङ्गीतमकरन्दादौ । दृश्यन्ते प्रभूतानि पटमञ्जरीपद्यानि विक्रमीयसप्तमशताब्दीसम्भूतैर्ढेढ्ढेइपादप्रभृतिभिर्विरचितेषु चर्याचर्यविनिश्चयादिषु श्रीयुतमहामहोपाध्याय**हरप्रसादशास्त्रि**महाशयैः सम्पादिते बङ्गीयसाहित्यपरिषदा प्रकाशिते 'बौद्ध गान ओ दोहा' संज्ञके पुस्तके । वि. सं. १३५८ वर्षे पढमञ्जरीभाषया रचितं गौतमचरितकुलकमुपलभ्यते पत्तनीयजैनभाण्डागारे । अनेन पट(ढ)मञ्जरीरागस्य चिरात् प्रतिष्ठाऽवसीयते ।

---

१ "जहा तेण केवलिणा अरण्णं पएसिऊण पंच **चोरसयाइं रास**णच्चणच्छलेण महामोहगहगहिआइं अक्खिविऊण इमाए **चच्चरीए** संबोहियाइं । अवि य—

संबुज्झह किण्ण **बुज्झह एत्तिलए** वि मा किंचि **मुज्झह** ।
कीरउ जं **करियव्वयं** पुण **दुक्कइ** तं **मरिअव्वयं** ॥ ति धुवयं ।
कसिणकमलदललोयणचलक्खेहिं तउ पीणपिहुलथणकडिअलभारकिलंतउ ।
तालयलिरयलयावलिकलयलसद्दउ **रास**यम्मि जइ लब्भइ जुअतीसत्थउ ॥
संबुज्झह किण्ण बुज्झह० पुणो धुवयं ।"

—कुवलयमालाकथायाम् [जे. भां. ता. ३]

प्रस्तुतायाश्चर्चर्या रचनास्थलं वाग्जड(वागड)देशे व्याघ्रपुरमिति वृत्तिकारेण वृत्तिप्रारम्भे, सुमतिगणिना च गणधरसार्धशतकवृत्तौ (भूमिका पृ. ९०)समसूचि। रचनासमयश्च विक्रमीयद्वादशशताब्द्या उत्तरार्धरूपः। वृत्तिकारसतीर्थ्येन सुमतिगणिना वि. सं. १२९५ वर्षे विनिर्मितायां गणधरसार्धशतकवृत्तौ (लि. प. ३९६, ३८१) अस्याश्चर्चर्याः १६, १८, २१–२५ तमानि पद्यानि समुद्धृतानि। अस्याः प्रारम्भपद्यव्याख्यायां व्याख्याकारेण कुन्दनामकं च्छन्दः पर्यवबोधि।

उपदेशरसायनम्।

सुगुरु–कुगुरु–सुपथ–कुपथविवेचकं लोकप्रवाह–चैत्याविधिनिरोधकं विधिचैत्य–विधिधर्मस्वरूपावबोधकं श्रावक–श्राविकाऽऽदिशिक्षाप्रदं धर्मोपदेशपरं चैतदपि द्वादशशाताब्द्या उत्तरार्धे प्रणीतं सम्भाव्यते। प्राकृतापभ्रंशप्रायेष्वेतादृग्ग्रन्थेषु वृत्तिविरचनपद्धतिर्नास्तीति सूचयन्नस्य संस्कृतवृत्तिकारः—

" चर्चरी–रासकप्रख्ये प्रबन्धे **प्राकृते** किल।
वृत्तिप्रवृत्तिं नाधत्ते प्रायः कोऽपि विचक्षणः॥
प्राकृतभाषया धर्मरसायनाख्यो रासकश्चक्रे।"

इत्यादिनोल्लेखेनात्र दर्शितस्यापभ्रंशलक्षणसिद्धस्यापि ग्रन्थत्रयस्य प्राकृतभाषामयत्वमसूचयत्, अपभ्रंशभाषायाः प्राकृतात्मकत्वात् सामान्यापेक्षया तथोक्तावपि न काऽपि क्षतिः। अपभ्रंशभाषालक्षणलक्षितानां ग्रन्थानां प्राकृतत्वेन प्रसिद्धिः प्राचीना।

अशीतिवृत्तात्मकं पादान्तयमकं मनोहरमेतद् रासंसंज्ञितं काव्यं षोडशमात्राऽऽत्मकपादपरिकलितं पद्धटिकाबन्धबद्धं गीतिकोविदैः सर्वेषु रागेषु गीयत इति वृत्तिप्रारम्भेऽत्र प्रत्यपादि। प्राकृतपिङ्गल–गाथालक्षण–स्वयम्भूच्छन्दः—च्छन्दोऽनुशासनप्रभृतिषु च्छन्दोलक्षणग्रन्थेषूपलभ्यते पद्धटिका(पज्झडिया)च्छन्दोलक्षणस्मरणम्। आपलीसङ्घीयस्वयम्भूकविना पद्धटिका(पद्धडी)बन्धं रामायणमपभ्रंशभाषायां विरचितमासीदिति श्रूयते अमरकीर्तिमहाकविः वि. सं. १२७४ वर्षे विनिर्मिते षट्कर्मोपदेश(छकम्मुवएस)संज्ञकेऽपभ्रंशग्रन्थे सूचयामास निजां कृतिं यशोधरचरितसंज्ञां पद्धटिकाबन्धपरिकलितामित्यादिना परिज्ञायते पद्धटिकापद्ये पुरातनानां समादरः।

प्रस्तुतस्य रसायनस्य ४, ६, २७, २९, ३३, ३४, ६९, ७१ प्रभृतीनि पद्यानि वि. सं. १२९५ वर्षे विनिर्मितायां गणधरसार्धशतकबृहद्वृत्तौ (प. ३–६७––३७०) वृत्तिकारसतीर्थ्येन सुमतिगणिनोपात्तानि प्रेक्ष्यन्ते।

कालस्वरूपकुलकम्।

यमकालङ्कारान्यलङ्कृतं द्वात्रिंशद्भिः पूर्वोक्तपद्धटिकापद्यैरेव गुम्फितमुपदेशपरमप्येतत् संस्कृतवृत्तिकाराभिप्रायेण 'कालस्वरूपकुलक' संज्ञयाऽत्र प्राख्यापि। अस्य प्रारम्भे

ग्रन्थकर्त्रा निजसत्ताकालस्य विक्रमीयद्वादशशतसंवत्सरस्य विषमं स्वरूपमपि किञ्चित पर्यदार्शि। ग्रन्थकर्तुः स्वर्गवासः सं. १२११ वर्षेऽजयमेरुदुर्गे समजनि [भूमिका पृ. ९२] अत्र च व्यतीतस्य विक्रमीयद्वादशशतसंवत्सरस्य स्वरूपसूचनमकारीति ग्रन्थकर्त्रा निजायुषः प्रान्ते सप्ततितमवर्षप्राये वृद्धवयस्येतद् व्यधायीति विज्ञायते।

अस्य पञ्चविंशतितमे पद्ये ग्रन्थकर्त्रा 'चाहिल'नाम निरदेशि, वृत्तिकारेण तद्व्याख्यायां समसूचि यथाऽणहिलपाटकपत्तनवास्तव्यस्य प्रस्तुतग्रन्थकृज्जिनदत्तसूरिसमुपासकस्य चाहिलस्य विज्ञप्त्या यशोदेवाभू—आसिग—सम्भवानां पृथग्धर्माश्रितानां तत्पुत्राणां प्रतिबोधार्थमेतत् कुलकं प्रणीय प्रतिलेखरूपेण प्रेषितमासीत्। अनन्तरं च तेऽपि विधिधर्माराधका अभूवन्। कुमारपालभूपालराज्यप्रारम्भे तस्य जैनधर्मस्वीकारात् प्रागेषा घटना विभाव्यते। उपर्युक्तायामेव गाथायां 'बहुत्तु खरउ' पदं प्रयुज्य ग्रन्थकर्त्रा निजाभिमतस्य विधिपथस्य 'खरतर' इति गच्छसंज्ञा ध्वनिता वितर्क्यते। विधिपथस्यैव तस्य कालक्रमेण प्रचलिता 'खरतरगच्छ' इत्यभिधाऽद्यावधि विद्यते।

अस्य कुलकस्य प्रारम्भे 'सुगुरूवएसु' प्रान्ते च 'जिणदत्तुवएसु' इति पदप्रयोगद्वारा ग्रन्थकर्त्राऽत्रोपदेशरूपाभिधेयं संसूच्यास्य 'उपदेशकुलक' संज्ञाऽप्युपालक्षि।

उपसंहारः।

ग्रन्थत्रयीविलोकनेन तत्कर्तुर्जैनसिद्धान्त—व्याकरण—काव्य—च्छन्दोऽलङ्कार—ज्योतिःशास्त्रप्रभृतिषु प्रावीण्यं परिज्ञायते। मूलग्रन्थकारस्य व्याख्यात्रोश्च गुरुशिष्यपारम्पर्यसम्बन्धेन समयसामीप्येन च व्याख्यासु क्वचित् क्वचिन्निबद्धा विशेषता विश्वासार्हा व्यज्यते। अस्याः काव्यत्रय्या विषयसूची तु पृथगुपनिबद्धेति नात्र तद्विषये प्रयत्यते।

अस्याः सम्पादनेऽत्रत्यसङ्ग्रहस्था पुस्तकत्रयी तथा चैका छाणीजैनज्ञानमन्दिरीया प्रतिरुपयुक्ताऽभवत्। क. संज्ञिकायामष्टादशपत्रात्मिकायां नात्यर्वाचीनायां प्रतौ १—७+७+१९+१९—१८ तमेषु पत्रेषु क्रमेण सवृत्तेरपि काव्यत्रय्याः समावेशः। अन्या च नवपत्रात्मिका चर्चर्यायाः प्रतिः 'ख' संज्ञिका। इतरा च दशपत्रात्मिका प्रतिरुपदेशरसायनस्य 'ख' संज्ञिता, 'ग' संज्ञिता चैकादशपत्रात्मिका छाणीजैनज्ञानमन्दिरीया नूतना प्रतिः। कालस्वरूपकुलकस्यात्रत्यायाः पत्रत्रयात्मिकायाः पश्चादुपलब्धायाः 'ख' संज्ञितायाः प्रतेः पाठभेदस्तु प्रान्ते पृथग् दर्शितः।

छाणीजैनज्ञानमन्दिरीया प्रतिः प्रवर्तकश्री**कान्तिविजय**मुनिराजस्य कृपया प्राप्ता। तथा भूमिकाऽऽलेखने गणधरसार्धशतकबृहद्वृत्तेरुपदेशपदव्याख्यायाश्चतुष्पञ्चाशन्महापुरुषचरितप्रभृतेश्चादर्शपुस्तकानि मुनीश**हंसविजय**शास्त्रसङ्ग्रहादत्रत्यजैनज्ञानमन्दिरतः पंन्यास-

सम्पद्विजयमुनिराजस्य कृपया सम्प्राप्तानि। *कुवलयमालाकथाया जिनदत्तसूरिस्तुतेश्च [परि० ४] जेसलमेरुदुर्गभाण्डागारीय-ताडपत्रीयादर्शपुस्तकं पञ्चशतवर्षप्राच्यताडपत्रीयपुस्तककाष्ठपट्टिकागतं २६½" × ३¾" प्रमाणपरिमितं परिचरपरिवृतस्य जिनवल्लभ-जिनदत्तसूरिद्वयस्य चित्रफलकं च **जिनकृपाचन्द्रसूरेः** प्रसादेनात्रोपायोजीति ते धन्यवादार्हाः। किञ्च भूमिकायां [पृ. ९६] सूचिताया वि. सं. १३३४ वर्षे प्रतिष्ठितायाः प्रस्तुतग्रन्थकारजिनदत्तसूरिमूर्तेः प्रतिकृतिरपि विरचय्यात्र प्रागेवास्थापि।

अत्राभिलषितः कृतप्रायोऽपि चापभ्रंशशब्दानां कोषः प्रसिद्धप्राकृतशब्दकोषेण प्रायो गतार्थत्वाद् भूमिकाऽऽदिदर्शनविलम्बमसहिष्णूनां शीघ्रमेतद्दिदृक्षूणां विदुषां प्रेरणया चोपेक्षितः। अत्र च कार्येऽत्रत्याध्यक्षैः **डॉ. विनयतोष भट्टाचार्य** एम्. ए. पी. एच्.डी. महाशयैस्तथा श्रीयुत जी. के. **श्रीगोन्देकर** एम्. ए. इत्यनेन, के. **रङ्गस्वामि**शास्त्रिणा च प्रासङ्गिकं साहाय्यं प्रदाय प्रोत्साहितोऽस्मीति ते प्रशंसामर्हन्ति।

सपादशतग्रन्थानामाधारभूतया भूमिकया संस्कृतच्छायया विषयसूच्या विशिष्टनामसूच्या च वि भूषिते परिशिष्टैः पाठान्तरैर्मूर्ति-चित्रप्रतिकृतिप्रभृतिभिश्च पर्यलङ्कृते संस्कृतवृत्तिसमन्विते ग्रन्थत्रयीगौरविते ऽस्मिन् ग्रन्थे मम मतिदौर्बल्येन प्रमादाद् दृष्टिदोषाद् वा काश्चित् स्खलना जाताः सम्भवेयुस्ताः परिशोधनीयाः सूचनीयाश्च कृतकृपैर्विद्वद्भिरिति प्रार्थयते—

ता. २४-१२-२६

गान्धीत्युपाख्यो भगवान्दासतनयः
लालचन्द्रः।

---

* कुवलयमालाकथायाः संक्षिप्तपरिचयोऽस्माभिः सं. १९७८ वर्षे जेसलमेरुदुर्गभाण्डागारीयग्रन्थसूच्यामप्रसिद्धग्रन्थ-ग्रन्थकृत्परिचये[पृ. ४२-४३]ऽकारि, तदैव च तदन्तर्गतापभ्रंशाष्टादशदेशीभाषाऽऽयुल्लेखोऽत्रत्यजैनज्ञानमन्दिरीयाचिरलिखितपुस्तिकातः समग्राहि, वि. सं. १९८० वर्षे भावनगरे सप्तमगूर्जरसाहित्यपरिषदि च तदुपयुक्तलेखोऽपाठि। अस्मादवतारितः कियानंशः मो. द. देशाई इत्यनेन 'जैन गूर्जर कविओ' संज्ञकपुस्तके। सं. १९८१ वर्षे पण्डितवेचरदासेन प्राकृतव्याकरणप्रवेशकार्थं पूर्वोक्तोऽस्मत्सङ्ग्रहोऽयाचि। सं.१९८२ वर्षे मया जेसलमेरुदुर्गस्थं **जिनकृपाचन्द्रसूरिं** विज्ञप्य तत्रत्यभाण्डागारीयादर्शपुस्तकस्याभीष्टाः पाठाः समुदतारिषन्त। अस्मिंश्च सं.१९८३वर्षे मार्गशीर्षमासे प्रवर्तकश्री**कान्तिविजय**विनेयस्य कुवलयमालाकथासंक्षेपादिसंशोधकस्य **मुनिराजचतुरविजय**स्य प्रेरणया जेसलमेरुदुर्गभाण्डागारं साक्षाद् द्रष्टुं प्राभवम्। ततः स्वयं दृष्ट्वा तदादर्शपुस्तकम्, विलक्षणलिपेस्ततो भूरिपरिश्रमेणोद्धृतानुपयुक्तानंशानत्र प्रसङ्गतो विदुषां भाषाविज्ञानवृद्धि-परितुष्टये प्रादर्शयम्। कुवलयमालाकथा-विलासवतीकथाप्रभृतेस्ताडपत्रीयपुस्तिकानां प्रतिकृतीश्चापि (Photo-copies) साम्प्रतं समग्राहयम्।

काव्यत्रयी–विषयप्रदर्शनम् ।

चर्चर्याम् ।

१ धर्मजिनस्तुतिर्मङ्गलम्, जिनवल्लभसूरिस्तुतिरूपाभिधेयसूचनम् ।
जिनवल्लभसूरेर्विद्यावैशारद्यम् २–८

२ जिनवल्लभसूरेः षड्दर्शन–प्रमाणज्ञानम् ।

३ ,, व्याकरण–च्छन्दःशास्त्रज्ञानम् ।

४ ,, काव्यरचनाचातुरी, माघकवितोऽप्याधिक्यम् ।

५ ,, कविकालिदासाद् विशेषता ।

६ ,, वाक्पतिराजाद् वैशिष्ट्यम् ।

७ ,, चित्रकाव्यानि स्तुति–स्तोत्राणि ।

८ ,, जिनसिद्धान्तविज्ञानम्, विधि–विषय–पारतन्त्र्यप्रकटनम् ।
जिनवल्लभसूरिप्रवृत्तिः । विधिपथप्रकटनम् ९–१४

९ ,, जिनभाषितसूत्रानुसारिकथन–क्रिये । तद्दर्शनं विना गुणिनां खेदः ।

१० जिनवल्लभसूरिणा लोकप्रवाहं परिहृत्य, कुमार्गशतं निराकृत्य पारतन्त्र्येण सह कारितं विधिविषयप्रवर्तनम्, दुःसङ्ग–सुसङ्गयोरन्तरदर्शनम्, वर्धमानजिन-तीर्थस्य नैरन्तर्यम् ।

११ ,, उत्सूत्रभाषिणां दूरतः परिहरणम्, सुज्ञान–दर्शन–क्रियाणामा-चरणम् । गड्डरिकाप्रवाहप्रवृत्तिं संवृत्य गीतार्थाचार्यस्मारणम् ।

१२–१३ ,, लोकप्रवाहप्रवृत्तैः कुतूहलप्रियैः क्रियमाणानां चैत्यगृहेऽनुचितानां विरहाङ्कनिवारितानामाशातनारूपाणां गीत–वादित्र–प्रेक्षण–स्तुति–स्तोत्राणां क्रीडा–कौतुकानां च निषेधनम् ।

१४ ,, युगप्रवरागमहरिभद्रसूरिसम्मतविधिपथस्य प्रकटनम् ।

१५ ,, विधिचैत्यगृहस्य आयतनमनिश्राचैत्यामिति संज्ञासूचनम् ।
जिनवल्लभसूरिप्रदर्शितविधिचैत्यगृहस्य विधिः १६–२७

१६ विधिचैत्यगृहे उत्सूत्रजनक्रमरोधः, निशि स्नान-प्रतिष्ठानिषेधः, निशि साधु-साध्वी-युवतीनां प्रवेशनिषेधः, विलासिनीनृत्यनिषेधः ।

१७ ,, जाति-ज्ञाति-कदाग्रहनिषेधः, निन्दितकर्मनिषेधः, धर्मिजनपीडानिषेधः ।
शुद्धधर्मवासितहृदयस्याधिकारित्वम् ।

१८ विधिचैत्यगृहे त्रिचतुरसुश्रावकदृष्टो द्रव्यव्ययः। निशि नन्दिपूर्वकव्रतनिषेधः। सूर्यास्तमने बलिनिषेधः। सुप्ते जने तूर्यरवनिषेधः।

१९ ,, रजन्यां रथभ्रमण-लकुटरासनिवारणम्। देवतानां जलक्रीडाऽऽन्दोलननिषेधः। कृताष्टाह्निकानां माघमालाया अनिषेधः।

२० ,, जिनप्रतिमानां प्रतिष्ठाकरणे श्रावकाणामनधिकारः। यथाच्छन्दःप्रवृत्तिनिषेधः। उत्सूत्रप्रवृत्तानां वचनमश्राव्यम्। जिन–गुर्वोरयुक्तगेयगाननिषेधः।

२१ ,, श्रावकाणां ताम्बूल-भक्षण-ग्रहणयोर्निषेधः, उपानद्धारणनिषेधः, भोजन-शयनानुचितोपवेशननिषेधः, प्रहरण-दुष्टजल्पनवारणम्।

२२ ,, हास्य–होडा–क्रीडा–रोषण–कीर्तिदाननिषेधः, आशातनाकारिमेलननिषेधः।

२३ ,, सङ्क्रान्ति-ग्रहण-माघमण्डलनिषेधः, शिरोवेष्टनकानिषेधः, स्नपनकारेतरविभूषानिषेधः। गृहचिन्तानिषेधः।

२४ ,, मलिनवस्त्र-देहाभ्यां जिनवरपूजानिषेधः। शुचिभूताया अपि श्राविकाया मूलप्रतिमास्पर्शनिषेधः। उत्तारितस्यारात्रिकस्य पुनरुत्तारणे निषेधः।

२५ ,, निर्माल्यम्। यतिममत्व-वासनिषेधः। नीतिप्रचारः।

२६ ,, सत्यजल्पनम्। समय-युक्त्या घटमानमेकोक्तमपि कर्तव्यम्।

२७ ,, आत्मप्रशंसा–परदूषणयोः परिहारः।

२८ ,, उत्सूत्राणि निषिध्य प्रशास्तिषु लेखयितुर्युगप्रधानजिनवल्लभस्य महनीयता।

२९ उत्सूत्रभाषणस्य विपाकः।

३० लोकप्रवाहप्रवृत्तानां नामसुविहितानां चेष्टा।

३१ अनुस्रोतः–प्रतिस्रोतःप्रवृत्तानां परिणामः।

३२ आगमाचरणसंवादिनां पूज्यता।

३३ निश्राचैत्यवन्दने विचारः

३४ लिङ्गिभिरधिष्ठिताशातितजिनमान्दिरस्य जिनद्रव्यकृतमठस्य च साधर्मिकस्थलीति संज्ञा। तद्वन्दनाच्च वैफल्यम्।

३५–३६ अनायतनगमनस्यानायतनवासिनां नमनस्य चायुक्तता।

३७ जनरञ्जनार्थं दुष्करक्रियाकारिणां वसतिवासिनामप्युत्सूत्रजल्पाकानां दर्शननिषेधः।

३८ विधिचैत्य–निश्राकृतचैत्यानायतनेषु गमनविचारः।

३९ त्रिविधचैत्यप्रतिपादकस्य साधोः सम्माननम्।

जिनवल्लभसूरेर्महिमा ४०–४६

४० त्रिविधचैत्यनिवेदकेनोत्सूत्रवारकेन सूत्रप्रतिपादकेन जिनवल्लभेन दर्शितं नवमिव जिनशासनम्।

४१ जिनवल्लभसूरेर्माहात्म्यम्, तत्पदभक्तानां तद्वचनोद्यतानां च भवभयनाशः।

४२ ,, अशेषविद्यत्वम्, मिथ्यादृष्टिभिरपि वन्द्यत्वम्, स्थाने स्थाने चाप्रतिस्खलितं विधिपक्षस्य प्रकाशकत्वम्।

४३ ,, पदप्रभावोऽनुपमेयता च।

४४–४५ ,, गुरुक्रमः, गुणानामानन्त्यम्। शुद्धधर्मस्थापकत्वेन तद्गुणसंक्रमेणैतत्परिज्ञातरि स्तुतिकर्तरि उपकारः।

४६ ,, अप्राप्या स्तुतिकर्त्रा स्वस्य परिभवप्राप्तिप्रतिपादनम्।

४७ ,, स्तुतिफल–कर्तृनामनिर्देशपूर्वकमुपसंहारः।

उपदेशरसायने।

१ पार्श्व–वीरप्रणाममङ्गलम्। पापमोचने गृहव्यवहारासक्तित्यागे आयुषः क्षणिकत्वदर्शने चोपदेशः।

२ मानुष्यसाफल्य आत्मतारणे राग-द्वेषादिदोषोत्सर्गे चोपदेशः।

३ शुभगुरुदर्शनात् मनुजजन्मनः शीघ्रं साफल्यम्।

४–९ सुगुरुस्वरूपम्।

६–९ गुरुप्रवहणं विना लोकप्रवाहसरिति कष्टप्राप्तिः।

१०–११ गुरुप्रवहणे निःसत्त्वस्यानादरः।

१२ कातरस्य धर्मधारणे राधावेधेऽयोग्यता।

१३ ,, अस्थिरस्य च निर्वृतिसङ्गमाभावः, कुपथपातित्वम्।

कुपथपतितस्य दुर्दशादर्शनम् १४–१९

१४ कुपथपतितस्य कदर्थनाप्राप्तिः।

१५ ,, सुजातेः कुलजस्यापि जन्मनो निरर्थकता।

१६ ,, शतवर्षायुषोऽपि जिनदीक्षाप्रपन्नस्यापि पापसंचयकारित्वम्।

१७ ,, मुग्धलोकानामग्रे गर्जनम्, लक्षण-तर्कविचारणप्रवृत्तिः, जिनागमव्याख्यातृत्व-लौकिकविचारदक्षत्वप्रतिपादनम्।

१८ ,, अर्धमास-चतुर्मासपारणम्, बहिराभ्यन्तरमलधारणम्, प्रतिक्रमण-वन्दनकगतोत्सूत्रोन्मार्गपदप्रतिपादकत्वम्।

१९ कुपथपतितेन लोकप्रवाहपतितत्वात् सूत्रार्थाज्ञत्वात् तन्निवारक गीतार्थानां च मारणम्।

२० ,, शास्त्रेण विचारयतो धार्मिकजनस्य शस्त्रेण विदारणम् । तद्विधलोकपरिकरितत्वात् गीतार्थैस्तत्परिहरणम् ।

२१–२२ कुपथपतितस्य गीतार्थानां च विरुद्धा चेष्टा ।

२३ कुपथपतितैर्विधिचैत्यग्रहणे तत्राविधिकरणे च प्रवर्तनम् ।

२४ नरपतिपक्षपातेनाविधिकारिभ्यो विधिचैत्येष्वर्पितेष्वपि प्रहरणधारिष्वपि तैः सह धार्मिकानां विधिं विना कलहाभावः ।

विधिपथप्रपन्नानां प्रवृत्तिः २५–३९

२५ सुगुरु–देवपदभक्तानां पञ्चपरमेष्ठिस्मारकानां धार्मिकानां प्रसन्नेभ्यः शासनसुरेभ्यो भव्यकार्यसिद्धिः ।

२६ धर्मकार्यं साधयतो युध्यमानस्य कथञ्चित् परं मारयतो न धर्मनाशः, किञ्च परमपदे वासः ।

२७ विधिधर्माधिकारिणां श्रावकाणामदीर्घसंसारिता, शुभगुरुवारणादविधिकरणत्यागः । जिनसम्बन्धिन्या दारिकाया(वेश्याया) धारणनिषेधः ।

२८ पुष्पेषु मूल्यलभ्येषु कूप–वाटिकादिकरणे स्थावरगृह–हट्टानां कारणे जिनधनं संगृह्य तद्वृद्धौ चाप्रवृत्तिः ।

२९ म्रियमाणस्य देयस्थाने भक्त्या ददतश्च गृह–हट्टानां ग्रहणं तद्भाटकधनेन च जिनपूजनम् ।

३०–३१ धर्मकार्ये ददतां श्रावकाणां न निवारणम्, किन्तूत्साहनं सर्वगृहव्यापारत्यागेन कषायैर्मोचनम् । चैत्राश्विनयोरष्टाह्निकाकारकाः सुरराजा भवेयुस्तथा शिष्टधर्मोपदेशः ।

३२–३४ अष्टाह्निकाविधाने नर्तकीनृत्ये विवेकः ।

३५ जिनचैत्ये गेय-वाद्ये विवेकः ।

३६ ,, स्तुति-स्तोत्रपाठे तालरासे लगुडरासे च विचारः ।

३७ ,, नाटकनर्तने निष्क्रमणकथने च विधिः ।

३८ ,, हास्य-क्रीडा-होडनिषेधः । रात्रौ युवतिप्रवेशस्य स्नपन-नन्दी-प्रतिष्ठानां च निषेधः ।

३९ ,, माघमाला–जलक्रीडाऽऽन्दोलननिषेधः, सूर्येऽस्तं गते बलिधारण-गृहकार्यनिषेधः ।

४० ,, नन्दि–प्रतिष्ठाऽधिकारिसूरिलक्षणम् ।

४१–५० युगप्रधानगुरुलक्षणम् ।
५१–५३ पारतन्त्र्य–विधि–विषयविमुक्तमार्गभ्रष्टजनस्य वचनं वर्तनं च ।
५४–५७ विधेरव्यवच्छेदः । सङ्घलक्षणम् ।
५८ साधुसङ्घ--वन्दनादौ विचारः ।
५९–६० विपरीतदृष्टीनां स्वप्नेऽपि शिवसौख्यस्याप्राप्तिः ।
६१–६२ द्रव्यात् साधर्मिककलहे देवद्रव्यभङ्गः, जिनप्रवचनस्य चाप्रभावना ।
६३ विवाहे विवेकः ।
६४ धनव्यये विवेकः ।
६५–६६ विधिपथानुसारिणां साधु--साध्वीनां सत्कारः ।
६७ धर्मावसरे कृपणत्वदर्शकस्य सम्यक्त्वहीनता ।
६८ धर्मबन्धुता ।
६९–७१ तीर्थकृद्वचनाश्रद्धालूनां सम्यक्त्वाभावः । श्राविकाणां छुप्तिविधिः ।
७२–७४ छिद्रान्वेषण--मद--कलहासत्यवादादिदोषवतां परानर्थकारिणां परदार-परद्रव्याधिकपरिग्रह–पापप्रसक्तानां च सम्यक्त्वाभावः ।
७५–७९ गृह–कुटुम्बनिर्वाहप्रकारः ।
८० रसायनपानफल–कर्तृनामनिर्देशपूर्वकमुपसंहारः ।

कालस्वरूपकुलके ।

१ वर्धमान–जिनवल्लभयोर्नमस्कारमङ्गलम्, सुगुरूपदेशरूपाभिधेयनिर्देशः ।
२ मीनराशौ शनैश्चरे सङ्क्रान्ते मेषवक्रतायां परचक्रप्रवेशः, देशभङ्ग-बृहत्पत्तनप्रणाशश्च ।
३ द्वादशशते विक्रमसंवत्सरेभूते सुखनाशः ।
४ सुखनाशेऽपि धर्मेऽनादरः, द्रव्यकार्ये देव–गुर्वोश्च परिहारः ।
५ मोहनिद्रा–प्राबल्यम्, गुरुवचनेऽरुचिः ।
६ सुगुरुवचनलग्नानां सुप्तानामपि जागरूकत्वम् ।
७ लुञ्चितशिरस्कानामपि राग–द्वेषविडम्बना ।
८ वेषधारिणां चौरत्वम् ।
९ चौर–गुरूपासकानां कदर्थना ।
१०–११ गोदुग्धार्कदुग्धदृष्टान्तेन सुगुरु–कुगुर्वोरन्तरम् ।
१२ धत्तूरपुष्पदृष्टान्तेन कुगुरुसाम्यम् ।

१३ सुदुर्लभस्य कुल-बल-जाति-गुणसमृद्धस्य मनुजत्वस्य साफल्य उपदेशः ।

१४ सुगुरूपदेशं विनाऽऽर्यानार्यदेशयोर्नरत्वनैरर्थक्यम् ।

१५ दीर्घायुष्मतां गुरुवचनश्रवणयोगः ।

१६ गुरुवचनश्रवणेऽपि जिनवचनश्रद्धानस्य दुर्लभता ।

श्रद्धानहीनानां विपरीताश्चेष्टाः १७-२० ।

१७ अविधिप्रवर्तन–विधिपरदूषण–प्रवाहपतितप्रशंसा, अनुस्रोतः–प्रतिस्रोतसोर्नैरन्तर्यम् ।

१८ जिनवचनभ्रान्त्याऽन्यत्र धर्मे विलगनम्, सुगुरुश्रुतेर्दूरगमनम्, विधिपथ-पृथक्स्थितानां जिन–मुनीनां वन्दनम्, तन्मार्गस्थितजनाभिनन्दनम् ।

१९ अनायतनवन्दनम् ।

२० पारतन्त्र्य–विधि–विषयाज्ञानम्, तज्ज्ञानिभिः सह कलहः, भस्मग्रहस्य दशमाश्चर्यस्य च प्रभावः ।

२१ दुःषमा–हुण्डावसर्पिण्योर्दुष्टतावशादसंयतपूजा ।

२२–२३ जघन्यविंशतिप्रान्तसंवत्सरेषु प्रजाक्षयः, तत्र धर्मप्रमत्तानां धर्मप्रवृत्तानां च परिणामसूचनम् ।

२४ प्रमादत्यागिनां विधिधर्मलग्नानां परमार्थवृत्त्या जीवज्जागरूकत्वम् ।

२५ चाहिलदर्शितेऽस्मिन् मार्गे प्रभूतं विमर्श्य सदाऽऽदरकरणे सद्बोधः ।

२६ बन्धूनामैक्ये युतयुतबन्ध–दृढबन्धगृहयोः पतनापतनदृष्टान्तेन बोधः ।

२७ ऐक्ये प्रमार्जनीदृष्टान्तः ।

२८ श्लेषालङ्कारेण ग्रह–नक्षत्राणां दृष्टान्तेनौचित्योपेतस्य वसुप्राप्तिसूचनं मातापित्रोश्चित्तावर्जकस्यैव च सर्वत्रादरसूचनम् ।

२९–३० लोहचुम्बकोपेत–तद्रहितपोतयोर्दृष्टान्तेन लोभत्यागात् लाभदर्शनम् ।

३१ शुभगुरुदृष्टस्य रुष्टयमादपि निर्भयत्वम्, परमेष्ठिमन्त्राधिवासितमनसो दुःखनाशः ।

३२ कर्तृनामनिर्देशपूर्वकमुपसंहारः । श्रोतृ-पाठकादीनां सिद्धिपदे वासः ।

जे. भां. ता. पुस्तिकायां काष्ठफलके चित्रिता जिनवल्लभसूरिमूर्तिः।



जे. भां. ता. पुस्तिकायां काष्ठपट्टिकायां चित्रिता जिनदत्तसूरिमूर्तिः।

अपभ्रंशकाव्यत्रयी ।

(१)

जिनदत्तसूरिविरचिता

जिनपालोपाध्यायविहितवृत्तियुता

चर्चरी ।

जिनपतिपदपद्मं रम्यमानम्य शोण-
च्छविखचितदिगन्तं कोमलं श्रीनिधानम् ।
जडमतिरपि किञ्चिच्चर्चरीं चर्चयामि
प्रचुरगुरुगुणोद्यद्रत्नविद्योतमानाम् ॥१॥
स्तुतिस्वरूपां जिनवल्लभस्य प्रसङ्गतश्चैत्यविधिप्रधानाम् ।
गीतिप्रवृत्तोल्लसनैर्विदग्धामवेक्ष्य नैनां भुवि मोदते कः ? ॥ २ ॥

इह हि समस्तविद्यानिधान-चारित्रपवित्र-निर्भीकशिरोमणि-श्रीमज्जिनवल्लभसूरिगुणात्यन्तावर्जितमानसाः श्रीमज्जिनदत्तसूरयः स्वयं तदेकताना अपि शेषलोकस्य तदर्थतानिमित्तं तद्गुणस्तुतिरूपां समस्तश्रोतृश्रोत्रपीयूषकल्पामिमां चर्चरीं चक्रुः । इयं च प्रथममञ्जरीभाषया नृत्यद्भिर्गीयते । विरचिता च श्रीवाग्जङ्गदेशतिलकायमानश्रीमद्धर्मनाथजिनायतनविभूषिते श्रीव्याघ्रपुरे । ततस्तदासन्नतरतया आदौ तावत् श्रीधर्मनाथनमस्कारपूर्वकं तामारिप्समाण इदमाह-

नमिवि जिणेसरधम्महं तिहुयणसामियहं
पायकमलु ससिनिम्मलु सिवगयगामियहं ।
करिमि जहट्ठियगुणथुइ सिरिजिणवल्लहहं
जुगपवरागमसूरिहि गुणिगणदुल्लहहं ॥ १ ॥

[नत्वा जिनेश्वरधर्मस्य त्रिभुवनस्वामिनः
पादकमलं शशिनिर्मलं शिवगतिगामिनः ।
करोमि यथास्थितगुणस्तुतिं श्रीजिनवल्लभस्य
युगप्रवरागमसूरेर्गुणिगणदुर्लभस्य ॥ १ ॥]

---

१ क. °तप्र° । २ ख. ग. °च्च° । ३ क. प्रथमं मं° । ४ ख. ग. श्रीमद्° । ५ क. °णि° ।

नत्वा जिनेश्वरस्य धर्मनाथस्य त्रिभुवनस्वामिनः पादकमलं शशिनिर्मलं शिवगतिगामिनः । करोमि यथास्थितां सत्यां गुणस्तुतिं श्रीजिनवल्लभस्य युगप्रवरागमसूरेर्गुणिगणदुर्लभस्य । इदं चैकविंशतिमात्राकलितं वास्तुभेदेषु द्वितीयं कुन्दनामकं छन्द इत्यर्थः ॥ १ ॥

अथ सर्वविद्याप्राधान्येन तर्कविद्यायास्तद्विषयां तावद् विरोधालङ्कारेण स्तुतिमाह--

जो अपमाणु पमाणइ छद्दरिसण तणइ
जाणइ जिव नियनामु न तिण जिव कुवि घणइ ।
परपरिवाइंगइंदवियारणपंचमुहु
तसु गुणवन्नणु करणं कु सक्कइ इक्कमुहु ? ॥ २ ॥

[योऽप्रमाणः प्रमाणानि षड्दर्शनानां
जानाति यथा निजनाम न तेन यथा कोऽपि घनानि ।
परपरिवादिगजेन्द्रविदारणपञ्चमुखः
तस्य गुणवर्णनकरणे कः शक्नोत्येकमुखः ? ॥ २ ॥]

प्रमाणं प्रत्यक्षादि, ततश्च योऽप्रमाणोऽपि सर्वथा प्रमाणरहितोऽपि। प्रमाणानि षड्दर्शनसत्कानि । षट् दर्शनानि चैवम्--

"बौद्धं नैयायिकं साङ्ख्यं जैनं वैशेषिकं तथा ।
जैमिनीयं च नामानि दर्शनानाममून्यहो ! ॥
नैयायिकमतस्यान्ये भेदं वैशेषिकैः सह ।
न मन्यन्ते ततस्तेषां पञ्चैवास्तिकवादिनः ॥
षष्ठदर्शनसङ्ख्या तु पूर्यते तन्मते किल ।
लोकायतमतक्षेपे कथ्यते तेन तन्मतम् ॥"

तेषां च प्रमाणान्येवम्—

"बौद्धोऽध्यक्षानुमाने वदति नयविदध्यक्ष-शाब्दानुमानौ-
पम्यं मीमांसकश्चानुमितिमुपमिताभाव-शाब्दं समक्षम् ।
अर्थापत्तिं च चष्टे जिनयुगिति परोक्षापरोक्षे समक्षं
चार्वाकोऽध्यक्ष-शाब्दानुमिति निगदतः साङ्ख्य-वैशेषिकौ च ॥"

"वैशेषिका हि पूर्वं केचिन् त्रीणि प्रमाणान्याहुराधुनिकाश्च द्वे एवेति जानातीति विरोधस्तत्परिहारश्चैवम्-अपमानोऽपगतगर्वः, अथवाऽप्रमाणोऽपरिमाणोऽ

६ ख. ग. श्रीनज्ञ । ७ क. °पा° । ८ क. °स्तुपु भे° । ९ क. °णइं । १० ख. ग. °णई । ११ क. °वाय° । १२ ख. ग. °गयंद° । १३ ख. ग. करणु । १४ ख. ग. °विशे° ।

परिच्छेद्यो गुणैरिति गम्यते। एतानि हि सदभ्यस्ततया निजनामवज्जानाति। न च तद्वदन्यो घनानि प्रभूतानि। परेऽन्ये प्रकृष्टा वा परिवादिनो[15] जैनमतापभाषणशीलास्त एव गजेन्द्रास्तेषां विदारणं सर्वथा निराकरणं तत्र पञ्चमुखः सिंहः। तस्य भगवतो[16] गुणवर्णनं कर्तुं कः शक्नोत्येकमुख इत्यर्थः॥ २॥

जो वायरणु वियाणइ सुहलक्खणनिलउ
सद्दु असद्दु वियारइ सुवियक्खणतिलउ।
सुच्छंदिण वक्खाणइ छंदु जु सुजइमउ[17]
गुरु लहु लहि पइठावइ नरहिउ विजयमउ[18]॥ ३॥

[यो व्याकरणं विजानाति शुभलक्षणानिलयः
शब्दमशब्दं विचारयति सुविचक्षणतिलकः।
सुच्छन्दसा व्याख्यानयति छन्दो यः सुयतिमतः
गुरुं लघुं लब्ध्वा प्रतिष्ठापयति नरहितो विजयताम्॥ ३॥]

यो व्याकरणं शब्दलक्षणशास्त्रं शास्त्रान्तरमहाकाव्यादिविधाननिबन्धन विजानाति। एतदन्तरेण हि शास्त्रान्तरानिष्पत्तेः। तथा चोच्यते—

"अनधीत्य शब्दशास्त्रं योऽन्यच्छास्त्रं समीहते कर्तुम्।
सोऽहेः पदानि गणयति निशि तमसि जले चिरंगतस्य॥"

शुभलक्षणानां सामुद्रिकोक्तानां निलयस्तच्छरीरस्य तन्निवासत्वात्। वैयाकरणत्वाच्च शब्दं व्युत्पत्तिवैकल्यदोषरहितम्, अपशब्दं चापभ्रष्टं तद्दोषसहितं विचारयति सुविचक्षणानां तिलकः। तथा शोभनाभिप्रायेण च्छन्दः पद्यलक्षणशास्त्रं यो व्याख्यानयति। सुयतीनां सुमुनीनां मतोऽभीष्टः। गुरुं गुणाढ्यं लघुमल्पगुणं लब्ध्वा विज्ञाय पदे आचार्यादौ वैयावृत्यकरत्वे चास्थापयति नरहितः समस्तमनुजजात्यनुकूलः। विवादादौ परवादिनिराकरणेन विशिष्टो जय उत्साहविशेषस्तन्निर्वृत्तेः। अथवा च्छन्दस एव एतानि विशेषणानि। छन्दसि च विरतिर्यतिरष्टौ च मकारादयो मात्रासमूहरूपा गणा भवन्ति।

"मस्त्रिगुरुस्त्रिलघुश्च नकारो भादिगुरुश्च तथाऽऽदिलघुर्यः।
जो गुरुमध्यगतो रलमध्यः सोऽन्त्यगुरुः कथितोऽन्त्यलघुस्तः॥"

ततश्च सुयतयः शोभना विरामा गुरु-लघू एकमात्र-द्विमात्रकौ वर्णौ पदं च स्थानं गुरूः आर्यायामर्धद्वयेऽपि पर्यन्तवर्तिनौ। द्वितीयार्धे तु षष्ठं स्थानमित्यादिकम्। नरौ नगण-रगणौ विशिष्टौ जगण-यगणौ तदभिमतमित्यर्थः॥ ३॥

---

१५ ग.परवा°। १६ ख.ग.भव°। १७ ख.ग.°तिलओ। १८ ग.क.°मओ। १९ क. विजयओ। २०ख.ग.°गस्य। २१ख.ग.° वैयकल्प°। २२ क.मनो°। २३ख.ग.वा। २४ क.°वृत्तः। २५ख.ग.सांत्य°।

कव्वु अउव्वु जु विरयइ नवरसभरसहिउ
लद्धपसिद्धिहिं सुकइहिं सायरु जो महिउ[२६] ।
सुकइ माहु ति पसंसहिं जे तसु सुहगुरुहु
साहु न मुणंहि[२७] अयाणुय मइजियसुरगुरुहु ॥ ४ ॥

[काव्यमपूर्वं यो विरचयति नवरसभरसहितं
लब्धप्रसिद्धिभिः सुकविभिः सादरं यो महितः ।
सुकविं माघं ते प्रशंसन्ति ये तस्य शुभगुरोः
साधु न जानतेऽज्ञा मतिजितसुरगुरोः ॥ ४ ॥]

काव्यमपूर्वं रमणीयत्वादत्यद्भुतं पूर्वकविभिरपि वा न कृतमिति महाप्रबन्धरूपप्रश्नोत्तरशतक-शृङ्गारशतक-प्रचुरप्रशस्तिप्रभृतिकं यो विरचयति नवरसभरसहितम् । रसाश्च-" शृङ्गार-हास्य-करुणा-रौद्र-वीर-भयानकाः ।
बीभत्साद्भुत-शान्ताश्च नव नाट्ये रसाः स्मृताः ॥
लब्धप्रसिद्धिभिरत्यन्तप्रसिद्धैः सुकविभिर्नरवर्ममहाराजसम्बन्धिभिः सादर यो महितः । सुकविं माघं ते प्रशंसन्ति—

" माघेन विघ्नितोत्साहा नोत्सहन्ते पदक्रमे ।
स्मरन्ति भारवेरेव कवयः कपयो यथा ॥"

इत्यादिना श्लाघन्ते; ये तस्य शुभगुरोर्मध्यं यथावस्थितं स्वरूपं न जानंते[२९] अज्ञप्राया मतिजितसुरगुरोरित्यर्थः ॥ ४ ॥

कालियासु कइ आसि[३०] जु लोइहिं[३१] वन्नियइ
ताव जाव जिणवल्लहु कइ नाअन्नियइ ।
अप्पु चित्तु परियाणंहि[३२] तं पि विसुद्ध न य
ते वि चित्तकइंगाय भणिज्जंहि[३३] मुद्धनय ॥ ५ ॥

[कालिदासः कविरासीद् यो लोकैर्वर्ण्यते
तावद् यावज्जिनवल्लभः कविर्नाकर्ण्यते ।
अल्पं चित्तं परिजानन्ति तदपि विशुद्धं न च
तेऽपि चित्रकविराजा भण्यन्ते मुग्धनताः ॥ ५ ॥]

कालिदासः कविरासीत्, यो लोकैर्भारविमहाकविप्रभृतिभिरपि वर्ण्यते स्वकृतमहाकाव्यसंशोधनप्रस्तावे । तथा च तदुक्तिः—

---

२६ क. °ओ । २७ ख. ग. °हिं। २८ ख. ग. °तकं। २९ ख ग जानंति। ३० ख. यासि। ३१ ख. ग. लोयहिं । ३२ ख. °कवि° ।

" कवयः कालिदासाद्याः कवयो वयमप्यमी ।
पर्वते परमाणौ च वस्तुत्वमुभयोरपि[३३] ॥ "

तावद् यावज्जिनवल्लभो महाकविर्नाकर्ण्यते । तदुक्तम्—

" चित्रं चित्रं वितन्वन् नवरसरुचिरं काव्यमन्यच्च भूयः
सर्वं निर्दोषमद्धो मुखमिव सगुणत्वेन पट्टांशुकश्रि ।
कान्तावत् कान्तवर्णं भरतनृपतिवच्चार्वलङ्कारसारं
चक्रे माघादिसूक्तेष्वनभिमुखमहो ! मानसं धीमतां यः ॥ "

अल्पं चित्रं चक्र—मुसलादिरूपं ये परिजानन्ति, तदपि विशुद्धं यथावस्थितं नैव । तेऽपि चित्रकविराजाः सर्वचित्रकविपूत्कृष्टा भण्यन्ते लोकैर्मुग्धजनता इत्यर्थः ॥५॥

सुकइविसेसिसियवयणु[३४] जु वप्पइराउकइ[३५]
सु वि जिणवल्लहपुरउ न पावइ[३७] कित्ति[३८] कइ ।
अवरि अणेयविणेयहिं[३९] सुकइ[४०] पसंसियहिं
तक्कवामयलुद्धिहिं निच्चु नमंसियहिं[४१] ॥ ६ ॥

[सुकविविशेषितवचनो यो वाक्पतिराजकविः
सोऽपि जिनवल्लभपुरतो न प्राप्नोति कीर्तिं काञ्चित् ।
अपरेऽनेकविनेयैः सुकवयः प्रशस्यन्ते
तत्काव्यामृतलुब्धैर्नित्यं नमस्यन्ते ॥ ६ ॥]

सुकविभिर्विशेषितमतिशयपदवीं प्रापितं सुकविभ्यो वा संस्कृतकाव्यकर्तृभ्यो विशेषितं केवलप्राकृतप्रबन्धरूपं वचनं गौडवधादिप्रबन्धरूपं यस्य स तथा । यो वाक्पतिराजकविर्यत्कीर्तिश्रुतिकुतूहलितदूरदेशान्तरगायतेषु विद्वत्सु स्वरूपानुयोगे सति यद्गार्या तान् प्रति प्रत्युत्तरमेवमूचे—

" [१]होहिंति केचिं[४२] जे ते न याणिमो जे[४३] गया नमो ताण ।
संपइ इह [४४]जे कइणो ते मह पईणो[४५] न सारिच्छा ॥ "

सोऽपि[४६] इह जिनवल्लभस्य पुरतो न पाण्डित्यकीर्तिं काञ्चन प्राप्नोति । अपरेऽपि बाण—मयूरप्रभृतयोऽनेके विनेयैस्तच्छिष्यैरेव सुकवयः प्रशस्यन्ते । तत्काव्यामृतलुब्धैश्च नित्यं नमस्यन्ते । इति तेऽपि तत्साम्यं न प्राप्नुवन्तीति[४७] भावार्थः ॥६॥

(१) भविष्यन्ति केचिद् ये तान् न जानीमो ये गता नमस्तेभ्यः ।
सम्प्रतीह ये कवयस्ते मम पत्युर्न सदृशाः ॥

---

३३ ख. ग. °रिति । ३४ ख. °श । ३५ ख. ग. °राजः । ३६ क. °विसिव° । ३७ क. कित्त । ३८ क. °विणेइहि । ३९ क. सुकय । ४० ख. ग. °वचनरूपं गौडबंधादि । ४१ क. °रातेषु । ४२ ख.ग. केवि । ४३ ख. ग. ये । ४४ क. पयणो । ४५ क. °पि जिन° । ४६ क. स्यंते ते° । ४७ क °ति भाव इत्यर्थः ।

जिण कय्यँ नाणा चित्तइं चित्तु हरंति लहु
तसु दंसणु विणु पुन्निहिं कउ लब्भइ दुलहु ।
सारइं बहु थुइ-थुत्तँइ चित्तइं जेण कँय
तसु पयकमलु जि पणमँहि ते जण कयसुकय ॥ ७ ॥

[येन कृतानि नाना चित्राणि चित्तं हरन्ति लघु
तस्य दर्शनं विना पुण्यैः कुतो लभ्यते दुर्लभम् ।
साराणि बहूनि स्तुति-स्तोत्राणि चित्राणि येन कृतानि
तस्य पदकमलं ये प्रणमन्ति ते जनाः कृतसुकृताः ॥ ७ ॥]

येन कृतान्यनेकानि चित्राणि नानारूपाणि चक्र-खड्गाद्याकारवर्णविन्यासरूपाणि षट्चक्रिका-सप्तचक्रिका-गजबन्धरूपाणि वा चित्तं हरन्ति लघु । तस्य दर्शनं विना पुण्यैः कथं लभ्यते दुर्लभम् । तथा साराणि गम्भीरमहार्थानि बहूनि स्तुति-स्तोत्राणि चित्राणि गुप्रक्रिय-समसंस्कृतार्धप्राकृतार्धसंस्कृत-गोमूत्रिकाऽऽदिरूपाणि वा येन कृतानि । तस्य पदकमलं ये प्रणमन्ति, ते जनाः कृतसुकृताः । यद्यपि शेषकवयोऽपि चित्रकाव्यादिनिष्णातास्तथापि यादृशं श्रीजिनवल्लभसूरेरुपलभ्यते; न तादृशं प्रायोऽन्यस्य श्रूयते । तर्कादिविद्या इव ज्योतिर्गणितादिविद्या अपि सर्वाः पद्मावतीमन्त्रविद्याप्रभृतयश्च तस्य सातिशया आसन्निति सर्वेभ्य उत्कर्षः । तथा चोक्तम्—

" योग्यस्थानानवाप्तेः पृथुदवथुमिथोविप्रयोगाग्नितप्तेः
शश्वद् विश्वभ्रमार्तेरपि च तनुतरामात्ममूर्तिं दधत्यः ।
सत्यं यद्वक्त्रपङ्केरुहसदसि सहावासमासाद्य सद्यो
विद्याः प्रीत्येव सर्वा युगपदुपचयं लेभिरे भूरिकालात् ॥ " इत्यर्थः ॥ ७ ॥

एवं तर्कादिविद्यानिधानत्वमभिधायाथ सिद्धान्तविषयं तदाह—

जो सिद्धंतु वियाणइ जिणवयणुब्भविउ
तसु नामुँ वि सुणि तूसइ होइ जु इहु भविउ ।
पारतंतु जिणि पयडिउ विहिविसइहिं कलिउ
सहि ! जसु जसु पसरंतु न केणइ पडिखलिउ ॥ ८ ॥

[यः सिद्धान्तं विजानाति जिनवद(च)नोद्भूतं
तस्य नामापि श्रुत्वा तुष्यति भवति य इह भव्यः ।
पारतन्त्र्यं येन प्रकटितं विधि-विषयाभ्यां कलितं
सखे ! यस्य यशः प्रसरन्न केनापि प्रतिस्खलितम् ॥ ८ ॥]

---

४८ ख. ग. कइ । ४९ ख. ग. थुत्तइं । ५० ख. कयं । ५१ क. °काव्यनि° । ५२ क. °श जिन° । ५३ क. नाम।

यः सिद्धान्तं विजानाति जिनवदनोद्भूतम्, अर्थतो वा जिनवचनोद्भूतं तस्य नामापि श्रुत्वाऽऽस्तां दर्शनादि, तुष्यति भवति य इह भव्यः । गुरुपरतन्त्रैः सर्वं कृत्यं क्रियते इति पारतन्त्र्यं येन प्रकटितम् । सर्वत्रापि चैत्य-साध्वादौ शुद्ध-जिनाज्ञाप्रवृत्तिरूपो विधिः । सम्यक्त्वादेर्मिथ्यात्वादिपरिहार इव देवपूजाऽऽदेः सर्वथा आशातनादिपरिहारेण जिनप्रतिमादेश्चारित्रादेर्वाऽतीचारपरिहारेण साध्वादिर्विषयः । ताभ्यां कलितं ज्ञानादित्रयवदेतत्त्रयस्यापि मोक्षाङ्गत्वात् । सखीति चर्चरीरूपत्वात् सम्बोधनम् । यस्य यशः प्रसरत् न केनापि प्रतिस्खलितम्, तत उत्कृष्टस्यान्यस्याभावादित्यर्थः ॥ ८ ॥

जो किर सुत्तु वियाणइ कहइ जु कारवइ
करइ जिणेहि जु भासिउ भिवपहु दक्खवइ ।
खवइ पावु पुव्वज्जिउ पर-अप्पह तणउं
तासु अदंसणि सगुणहिं ज्झीरिज्जइ घणउं ॥ ९ ॥

[यः किल सूत्रं विजानाति कथयति यः कारयति
करोति जिनैर्यद् भाषितं शिवपथं दर्शयति ।
क्षपयति पापं पूर्वार्जितं परात्मनोः सम्बन्धि
तस्यादर्शनेन सगुणैः खिद्यते प्रभूतम् ॥ ९ ॥]

यः किल सूत्रं विजानाति, कथयति भव्येभ्यः । कारयति च तैरेव देशनाद्वारेण । करोति जिनैर्यद् भाषितं मोक्षमार्गं दर्शयति । एवंविधश्च सन् क्षपयति पापं पूर्वार्जितं परात्मनोः सम्बन्धि । तस्यादर्शनेन सगुणैः खिद्यते प्रभूतमित्यर्थः ॥ ९ ॥

परिहरि लोयपवाहु पयट्टिउ विहिविसउ
पारतंति सहु जेण निहोडि कुमग्गसउ ।
दंसिउ जेण दुसंघ-सुसंघहं अंतरउ
वद्धमाणजिणतित्थह कियउ निरंतरउ ॥ १० ॥

[परिहृत्य लोकप्रवाहं प्रवर्तितो विधिविषयः
पारतन्त्र्येण सह येन निराकृत्य कुमार्गशतम् ।
दर्शितं येन दुःसङ्घ-सुसङ्घयोरन्तरं
वर्धमानजिनतीर्थस्य कृतं निरन्तरम् ॥ १० ॥]

परिहृत्य लोकप्रवाहमविधिप्रवृत्तचैत्यसाधुभक्त्यादिकं प्रवर्तितो विधिर्विषयश्च पारतन्त्र्येण सह । एतत्स्वरूपं च पूर्वमेवोक्तम् । येन निराकृत्य कुमार्गशतं दर्शितं

---

५४ क. °तो जिन° । ५५ क. °तं वा । ५६ क. °रूपा । ५७ ख. ग. °मादि° । ५८ ख. ग. °परी° । ५९ क. कलितज्ञा° । ६० क. चच्चरी° । ६१ क. पाव । ६२ क. तणउ । ६३ क. सूरि° । ६४ क. °संघहं ।

येन दुःसङ्ग-सुसङ्गयोरन्तरम् । एवं च कुर्वता वर्धमानजिनतीर्थस्य कृतं निरन्तर मविच्छेद इत्यर्थः ॥ १० ॥

जे उस्सुत्तुं पयंपहि दूरि ति परिहरइ
जो उ सुनाणं-सुदंसण-किरिय वि आयरइ ।
गड्डरिगामपवाहपवित्तिं वि संवरिय
जिण गीयत्थायरियँइ सव्वँइं संभरिय ॥ ११ ॥

[ये उत्सूत्रं प्रजल्पन्ति दूरेण तान् परिहरति
यस्तु सुज्ञान-सुदर्शन-क्रिया अप्याचरति ।
गड्डरिकाप्रवाहगामिप्रवृत्तिं संवृत्य
येन गीतार्थाचार्याः सर्वेऽपि संस्मृताः ॥ ११ ॥]

ये उत्सूत्रं प्रजल्पन्ति, दूरेण तान् परिहरति । यश्च सुज्ञान-सद्दर्शनसाधुक्रियाश्चाचरति । गड्डरिकाप्रवाहगामिनां प्रवृत्तिमपि संवृत्य । ' प्रवाहशब्दस्य पूर्वनिपातश्छन्दोवशात् ' । येन गीतार्थाचार्याः सर्वेऽपि संस्मृतास्तदुक्तशुद्धमार्गप्रकाशनादित्यर्थः ॥ ११ ॥

चेईहरि अणुचियइं जि गीयइं वाइयँइं
तह पिच्छण-थुइ-थुत्तइं खिड्डइ कोउयँइं ।
विरहंकिणँ किर तित्थु ति सँव्वि निवारियँइं
तेहिं कइहिं आसायण तेण न कारियइ ॥ १२ ॥

[चैत्यगृहेऽनुचितानि यानि गीतानि वादितानि
तथा प्रेक्षण-स्तुति-स्तोत्राणि क्रीडाः कौतुकानि ।
विरहाङ्केन किल तत्र तानि सर्वाणि निवारितानि
तैः कृतैराशातनास्तेन न कार्यन्ते ॥ १२ ॥]

चैत्यगृहे यान्यनुचितानि गीत-वादित्राणि रसायनविवरणदर्शितानि । तथा प्रेक्षणक-स्तुति-स्तोत्राणि क्रीडा जलकेलिप्रभृतयः कौतुकानीन्द्रजालादीनि विरहाङ्केन श्रीहरिभद्रसूरिणा—

" (१)उचियमिह गीय-वाइयमुचियाण वयाइएहिं जं रम्मं ।
जिणगुणविसयं सद्धम्मबुद्धिजणगं अणुवहासं ॥"

(१) उचितमिह गीत-वादितमुचितानां व्रतादिकैर्यद् रम्यम् ।
जिनगुणविषयं सद्धर्मबुद्धिजनकमनुपहासम् ॥

६५ ख. ग.जिनवर्धमानतीं। ६६ क. उस्सुत्त । ६७ ख ग.जे। ६८ ख. ग.ंणं। ६९ क.ंत्ति सं। ७० ख ग. ंइं। ७१ ख.ग.सज्ञान°। ७२ ख.ग. प्रवाहेण । ७३ ख. °हंकिरण ति°। ७४ क. सवि । ७५ ख. °पुट्ठि°

इति वदता किल तत्र चैत्ये तानि सर्वाणि निवारितानि । कुतो यतस्तैः कृतैराशातना भगवदाज्ञोल्लङ्घनेनावज्ञा कृता भवति । तेनँ न कार्यन्त इत्यर्थः ॥१२॥

यद्येवं विरहाङ्केन निषिद्धान्येतानि तर्हि किमर्थं क्रियन्तँ इत्यत आह—

लोयपवाहपयँट्टिहि कोऊहलपिँईहि
कीरन्तँइं फुडदोसँइं संसयविरहियँहि ।
ताइं वि समँईनिसिद्धइ समइकयत्थियँहि
धम्मत्थीहि वि कीरहिं बहुजणपत्थियँहि ॥ १३ ॥

[लोकप्रवाहप्रवृत्तैः कुतूहलप्रियैः
क्रियमाणानि स्फुटदोषाणि संशयविरहैतैः ।
तान्यपि समयनिषिद्धानि स्वमतिकदर्थितै-
र्धर्मार्थिभिरपि क्रियन्ते बहुजनप्रार्थितैः ॥ १३ ॥]

लोकप्रवाहप्रवृत्तैः कुतूहलप्रियैश्च क्रियमाणानि स्फुटदोषाण्यपि संशयविरहितैस्तत्र करणेऽपि निश्चितदोषाभावैः । तान्यपि जलक्रीडाऽऽदीनि सिद्धान्तनिषिद्धानि कुमार्गानुगामिस्वमतिकदर्थितैः स्वबुद्धया धर्मार्थिभिरपि क्रियन्ते बहुजनप्रार्थितानि । कुतूहलप्रियत्वात् प्रायो जनानामित्यर्थः ॥ १३ ॥

जुगपवरागमु मन्निउ सिरिहरिभद्दपहु
पडिहयकुमयसमूहु पयासियमुत्तिपहु ।
जुगपहाणसिद्धंतिण सिरिजिणवल्लहिण
पयडिउ पयडपयाविण विहिपहु दुल्लहिण ॥ १४ ॥

[युगप्रवरागमो मानितः श्रीहरिभद्रप्रभुः
प्रतिहतकुमतसमूहः प्रकाशितमुक्तिपथः ।
युगप्रधानसिद्धान्तेन श्रीजिनवल्लभेन
प्रकटितः प्रकटप्रतापेन विधिपथो दुर्लभेन ॥ १४ ॥]

युगप्रवरागमो मानितः श्रीहरिभद्रप्रभुस्तद्वचनमननेन तन्मननानुमानात् । प्रतिहतकुमतसमूहोऽनेकान्तजयपताकाऽऽदितर्कप्रणयनेन प्रकाशितमुक्तिमार्गश्चतुर्दशशतप्रकरणविधानेन । ततश्च युगप्रधानसिद्धान्तेन श्रीजिनवल्लभेन तदनुसारिणा प्रकटितः प्रकटप्रतापेन भुवनविख्यातसत्त्वेन विधिमार्गो दुर्लभेन 'निःपुण्यानामिति गम्यते' इति शेषः ॥ १४ ॥

---

७६ क. तेन का° । ७७ ख. ग. क्रियत । ७८ ख. ग. मनितः । ७९ क. दुर्लभो

विधिप्रकटनमेव प्रसङ्गतः प्राह—

विहिचेईहरु कारिउ कहिउ तमाययणु
तमिह अणिस्साचेइउ कँयनिव्वुइनयणु ।
विहि पुण तत्थ निवेइय सिवपावणपउण
जं निसुणेविणु रंजियं जिणपवयणनिउण ॥ १५ ॥

[विधिचैत्यगृहं कारितं कथितं तदायतनं
तदिहानिश्राचैत्यं कृतनिर्वृतिनयनम् ।
विधिः पुनस्तत्र निवेदितः शिवप्रापणप्रगुणः
यं निश्रुत्य रञ्जिता जिनप्रवचननिपुणाः ॥ १५ ॥]

विधिप्रधानं चैत्यं तत् कारितं देशनाद्वारेण श्राद्धैः । कथितं च तदायतनमिति । आयं ज्ञानादिलाभं तनोतीति कृत्वा तदिहानिश्राचैत्यमपि न निश्रया साध्वाद्यायत्ततया वर्तते किन्त्वागमोक्तनीत्यैव वर्तते इति कृत्वा कृतनिर्वृतिनयनम् । एवं विधिचैत्यस्यैतन्नामत्रयं कथितं भवति । विधिराज्ञा पुनस्तत्र निवेदितः शिवप्रापणप्रवणः । यं विधिमाकर्ण्य रञ्जिता जिनप्रवचननिपुणा इत्यर्थः ॥ १५ ॥

विधिमेवाह—

जहि उस्सुत्तुजणक्कमु कु वि किर लोयँणिहि
कीरंतउ नवि दीसइ सुविहिपलोयणिहिं ।
निसि न ण्हाणु न पइट्ठ न साहुँहि साहुणिहि
निसि जुवइहिं न पवेसु न नट्टु विलासिणिहि[२७] ॥ १६ ॥

[यत्रोत्सूत्रजनक्रमः कोऽपि किल लोचनैः
क्रियमाणो नैव दृश्यते सुविधिप्रलोकनैः(कैः) ।
निशि न स्नानं न प्रतिष्ठा न साधूनां साध्वीनां
निशि युवतीनां न प्रवेशो न नृत्यं विलासिनीनाम् ॥ १६ ॥]

यत्रोत्सूत्रभाषकजनस्य क्रम आचारो नन्दिव्याख्यानादिकः कोऽपि किल लोचनैः क्रियमाणो नैव दृश्यते सुविधिप्रलोककैः कर्तृभिः । निशि न स्नानं न प्रतिष्ठा न साधूनां साध्वीनां च शेषयुवतीनां च निशि न प्रवेशः । ' वाक्यान्तरत्वान्निशीति न पौनरुक्त्यम् ' नापि नृत्यं विलासिनीनामित्यर्थः ॥ १६ ॥

---

८० ख. ग. रंजियप[२] । ८१ ख. ग. °नमेवेति । ८२ क. °यत्तया । ८३ क. साहुहु ।

जाइ नाइ न कयग्गहु मन्नइ जिणवयणु
कुणइ न निंदियकंमु न पीडइ धम्मियणु ।
विहिजिणहरि अहिगारिउ सो किर सलहियइ
सुद्धउ धम्मु सुनिम्मलि जसु निवसइ हियइ ॥ १७ ॥

[जाति–ज्ञातेर्न कदाग्रहो मन्यते जिनवचनं
करोति न निन्दितं कर्म न पीडयति धर्मिजनम् ।
विधिजिनगृहेऽधिकारी स किल श्लाघ्यते
शुद्धो धर्मः सुनिर्मले यस्य निवसति हृदये ॥ १७ ॥]

यत्र च जाति–ज्ञातिकदाग्रहः स्नात्रादौ नास्ति । जातिर्धर्कटश्रीमालीयादिः, ज्ञातिर्गोष्टिकपुत्र–पौत्रादिः । कदाग्रहो देवस्य दक्षिणादिदिशि अयमेव स्नानं करोति, नान्य इत्यसदभिनिवेशः । तथा विधिजिनगृहे अधिकारी समस्तकृत्यचिन्तकः स एव श्लाघ्यते; यो मन्यते जिनवचनम्, करोति न निन्दितं कर्म द्यूतादिव्यसन–पैशुन्य–जुगुप्सितव्यवहारादिकम् । न पीडयति धार्मिकं जनं देवद्रव्योद्ग्राहणिकादावपि । शुद्धो धर्मो देवद्रव्योपभोग–कटुविपाकाद्यनुचिन्तनरूपः सुनिर्मले यस्य मनसि सदा निवसतीत्यर्थः ॥ १७ ॥

जित्थु ति–चउरसुसावयदिट्ठउ दव्ववउ
निसिहिं न नंदि करांवि कुवि किर लेइ वउ ।
वलि दिणयरि अँत्थमियइ जाँहि न हु जिणपुरउ
दीसइ धरिउ न सुत्तइ जहि जणि तूररउ ॥ १८ ॥

[यत्र त्रिचतुरसुश्रावकदृष्टो द्रव्यव्ययो
निशि न नन्दिं कारयित्वा कोऽपि किल लाति व्रतम् ।
बलिर्दिनकरेऽस्तमिते यत्र न खलु जिनपुरतो
दृश्यते धृतो न सुप्ते यत्र जने तूर्यरवः ॥ १८ ॥]

यत्र च त्रि-चतुरसुश्रावकप्रतीतो द्रव्यव्ययः कर्मकरादिविषयः क्रियते । निशि नन्दिं कारयित्वा कोऽपि किल व्रतं न गृह्णाति । बलिरपि दिनकरेऽस्तं गते यत्र नैव प्रतिमापुरतो दृश्यते धृतः । तथा सुप्ते जने प्रहरमात्रातिक्रमे वादित्रशब्दो न भवत्यसंयतजनजागरणभयादित्यर्थः ॥ १८ ॥

जहिं रयँणिहि रहभमणु कयाइ न कारियइ
लउडारसु जहिं पुरिसु वि दिंतउ वारियइ ।

---

८४ ख. ग. धम्यिमजणु । ८५ क. °यादिता° । ८६ क. करावियि । ८७ ख. ग. अत्थि° ।

जहि जलकीडंदोलण हुंति न देवयह
माहमाल न निसिद्धी कयअट्ठाहियहं ॥ १९ ॥

[यत्र रजन्यां रथभ्रमणं कदाचिन्न कार्यते
लगुडरासं यत्र पुरुषोऽपि ददद् वार्यते ।
यत्र जलक्रीडाऽऽन्दोलनं भवति न देवतानां
माघे माला न निषिद्धा कृताष्टाह्निकानाम् ॥ १९ ॥]

यत्र रजन्यां रथभ्रमणं कदाचिन्न कार्यते । लगुडरासं यत्र पुरुषोऽप्यास्तां योषिद् ददद् वार्यते । यत्र जलक्रीडास्तथा देवतानामम्बिकाऽऽदीनां चान्दोलनं न भवति । एतद्दोषाश्च रसायनविवरणे किञ्चिदुक्ताः । माघे मासि विशेषेण स्नानादिपूर्वकं प्रतिमाया मालारोपणं तदपि न निषिद्धं कृताष्टाह्निकानां श्रावकाणामष्टाह्निकाँ हि शाश्वतपूजास्ता अवश्यं कार्यास्ताश्च कुर्वद्भिर्यद्येषाऽपि क्रियते तदा क्रियताम् । एतच्च दिगम्बरभक्ताभिनवप्रबुद्धपैल्हकश्रावकोपरोधेन प्रभूततरदूषणाभावेन चोक्तम् । तेन 'माहमालजलकीलंदोलण' इत्यादिकवास्तवमार्वदिकमाघमालानिषेधेन रसायनोक्तेन न विरोध इत्यर्थः ॥ १९ ॥

जँहि सावय जिणपडिमह कँरिहि पइट्ठ न य
इच्छाच्छंद न दीसहि जँहि मुद्धंगिनय ।
जँहि उस्सुत्तपयट्टह वयणु न निसुणियइ
जहि अज्जुँत्तु जिण-गुरुहु वि गेउ न गाइयइ ॥ २० ॥

[यत्र श्रावका जिनप्रतिमानां कुर्वन्ति प्रतिष्ठां न च
यथाच्छन्दा न दृश्यन्ते यत्र मुग्धाङ्गिनताः ।
यत्रोत्सूत्रप्रवृत्तानां वचनं न निश्रूयते
यत्रायुक्तं जिन-गुर्वोरपि गेयं न गीयते ॥ २० ॥]

यत्र श्रावका जिनप्रतिमानां प्रतिष्ठां न कुर्वन्ति । उमास्वातिवाचकादिविरचितप्रतिष्ठाकल्पादिष्वप्रतिपादितत्वात् । यथाच्छन्दा उत्सूत्रभाषका मुग्धप्राणिप्रेणता यत्र व्याख्यानादिप्रवृत्ता न दृश्यन्ते । यत्रोत्सूत्रप्रवृत्तानां वचनं न श्रूयते । यत्रायुक्तं विरोध-शृङ्गारातिशयाविर्भावकं जिनाचार्ययोरपि गेयं न गीयत इत्यर्थः ॥ २० ॥

जँहि सावय तंबोलु न भक्खँहि लिंति न य
जँहि पाणहि य धरंति न सावय सुद्धनय ।

---

८८ ख ग. °हिय । ८९ ख. ग. °ह्निकादिशा° । ९० ख. ग. °प्रल्हक° । ९१ ख. ग. इति । ९२ ख. ग. करइ । ९३ क. सुद्धंगि । ९४ ख. ग. अजुत्त । ९५ क. °प्रताता । ९६ ख. ग. भक्खिहिं ।

जँहि भोयणु न य सयणु न अणुचिउ बइसणँउ
सह पहरणि न पवेसु न दुट्ठउ बुल्लणउँ ॥ २१ ॥

[यत्र श्रावकास्ताम्बूलं न भक्षयन्ति लान्ति न च
यत्रोपानहो धारयन्ति न श्रावकाः शुद्धनयाः ।
यत्र भोजनं न च शयनं नानुचितमुपवेशनं
सह प्रहरणैर्न प्रवेशो न दुष्टं जल्पनम् ॥ २१ ॥]

यत्र श्रावकास्ताम्बूलं न भक्षयन्ति, गृह्णन्ति च नैव । यत्रोपानहोऽपि न धारयन्ति मध्ये विशुद्धाचाराः । यत्र न भोजनं शयनं वा नाप्यनुचितं गब्दिकाद्यासनं परिभुञ्जते । सह प्रहरणेन क्षुरिकादिना न प्रवेशस्तन्मध्ये । नापि दुष्टं गाली-प्रदानादिकं भाषणमित्यर्थः ॥ २१ ॥

जहिं न हासु न वि हुड्डु न खिड्डु न रूसणँउ
कित्तिनिमित्तु न दिज्जइँ जहिं धणु अप्पणँउ ।
करँहि जि बहु आसायण जहिं ति न मेलियँहि
मिलिय ति केलि करँति समाणु महेलियहिं ॥ २२ ॥

[यत्र न हासो नापि होडा न क्रीडा न रोषणं
कीर्तिनिमित्तं न दीयते यत्र धनमात्मीयम् ।
कुर्वन्ति ये बह्वाशातनां यत्र ते न मेल्यन्ते
मिलितास्ते केलीः कुर्वन्ति समं महेलाभिः ॥ २२ ॥]

यत्र न हासो नापि हुड्डा प्रसिद्धा नापि क्रीडा द्यूतादिरूपा नापि रोषकरणम्। यत्र गाथक-वैणविकादीनां कलया तुष्टैः श्रावकैर्जिनादिगुणरञ्जितैरेव धनं दीयते, न तु कीर्तिनिमित्तमात्मीयम् । कुर्वन्ति ये नट-विटादयः प्रभूतामाशातनां यत्र ते न संसर्गमानीयन्ते । किमित्यत आह-मिलिता हि सन्तस्ते दुराचाराः केलीः कुर्वन्ति समं महेलाभिरित्यर्थः ॥ २२ ॥

जहिं संकंति न गहणु न माहि न मंडलउ
जहिं सावयँसिरि दीसइ कियउ न विंटलँउँ ।
णहवणयार जण[102]मिल्लिवि जँहि न विभूसणउ
सावयँजणिहि न कीरइ जँहि गिहचिन्तणउ ॥ २३ ॥

[यत्र सङ्क्रान्तिर्न ग्रहणं न माघे न मण्डलकं
यत्र श्रावकशिरसि दृश्यते कृतो न वेष्टनकः ।

---

९७ ख. ग. °उं । ९८ ख. ग. पहिरणि । ९९ ख. ग. करेंति । १०० क. °सिसि । १०१ क. विटलउ । १०२ ख. मेल्हेवि । १०३ ख. ग. °जणहिं ।

स्नपनकारं जनं मुक्त्वा यत्र न विभूषणं
श्रावकजनैर्न क्रियते यत्र गृहचिन्तनम् ॥ २३ ॥]

यत्र सूर्यादेः संक्रान्तिग्रहणं वा न स्नान-दान-पूजाविधानादिना आराध्यते, मिथ्यारूपत्वात् तस्य । माघे मासि हरि-हर-सूर्यादीनामिव जिनस्याप्यग्रे गैरेयकमण्डलेकं[१०५] रक्तवर्णपुष्प-चन्दनाद्यैर्[१०६]भ्यर्चितं न क्रियते । यत्र श्रावकाणां शिरसि दृश्यते कृतो न वस्त्रवेष्टनकः । उपलक्षणं चैष शेषस्याप्येकसाटिकोत्तरीयातिरिक्तस्य वस्त्रान्तरपरिहारस्य । स्नपनकारान् जनान् मुक्त्वा यत्र न विशेषविभूषाकरणं शृङ्गारादिवृद्धिहेतुः श्रावकजनैर्न क्रियते । यत्र गृहचिन्तनं गृहसम्बन्धिवाणिज्यादिकार्यानुध्यानमित्यर्थः ॥ २३ ॥

जहिं न मलिणचेलंगिहिं[१०७] जिणवरु पूइयइ
मूलपडिम सुइभूइ वि छिवइ न सावियइ ।
आरत्तिउ उत्तारिउ जं[१०७] किर जिणवरह
तं पि न उत्तारिज्जइ बीयजिणेसरह ॥ २४ ॥

[यत्र न मलिनचेलाङ्गैर्जिनवरः पूज्यते
मूलप्रतिमां शुचिभूताऽपि स्पृशति न श्राविका ।
आरात्रिकमुत्तार्यते यत् किल जिनवरस्य
तदपि नोत्तार्यते द्वितीयजिनेश्वरस्य ॥ २४ ॥]

यत्र न मलिनवस्त्र-शरीरैर्जिनवरः पूज्यते । मूलप्रतिमां च शुचिभूताऽपि कृतस्नानाद्युपचाराऽपि योषिन्न स्पृशति । आकस्मिकस्य स्त्रीशरीरधर्मस्य कथञ्चित् तदाऽपि सम्भवात् । तस्य च महारक्तरूपत्वेनात्याशातनाहेतुत्वात् । अत्याशातनायाश्च सप्रातिहार्यप्रतिमया सामान्यरूपयाऽपि '(१)आउट्टियावराहं सन्निहिया न खमए जहा पडिमा' इति वचनात् असहनात्, तथा च कथञ्चिदनर्थस्यापि भावात् । मूलप्रतिमायाश्च-'(२)जमहिगयबिंबसामी सव्वेसिं चेव अब्भुदयहेऊ' इति वचनात् । समस्तसंघाभ्युदयहेतुत्वेन स्थापितत्वात् । आशातनायाश्च सामान्यरूपाया अपि तत्र रक्षणात्, किं पुनरेवंविधमहाशातनायाः ? तस्मात् सुष्ठूक्तं शुचिभूताऽपि न स्पृशतीति । आरात्रिकं यत् किलोत्तारितमेकस्य जिनवरस्य तदेव नोत्तार्यते द्वितीयादेर्जिनेश्वरस्य निर्माल्यरूपत्वापत्तेस्तस्येत्यर्थः ॥ २४ ॥

(१) कृतापराधं सन्निहिता न क्षमते यथा प्रतिमा ।
(२) यदधिगतबिम्बस्वामी सर्वेषां चैवाभ्युदयहेतुः ।

१०४ क. यदि । १०५ ख. ग. °मंडलं । १०६ ख. ग. °नादि अभ्य° । १०७ ख. ग. जिं ।

जहिं फुल्लइं निम्मलु न अक्खय-वणहलइ
मणिमंडणभूसणइं न चेलइं निम्मलइं ।
जित्थु न जइहि ममत्तु नं जित्थु वि तव्वसणु
जहि न अत्थि गुरुदंसियनीइहि पम्हसणु ॥ २५ ॥

[यत्र पुष्पाणि निर्माल्यं नाक्षत-वनफलानि
मणिमण्डितभूषणानि न चेलानि निर्मलानि ।
यत्र न यतीनां ममत्वं न यत्रापि तद्व्यसनं
यत्र नास्ति गुरुदर्शितनीतेः प्रस्मरणम् ॥ २५ ॥]

यत्र पुष्पाणि निर्माल्यं भवन्ति, नाक्षतैरक्वथितवनफलानि, मणिमण्डितानि भूषणानि, वस्त्राण्यपि निर्मलान्यनुपहतानि नैव । यत्र यतीनां मदीयमेतद् देवगृहमिति न ममत्वम् । नापि यत्र चैत्यगृह एव तेषां वासः । यत्र नास्ति गुरुदर्शितस्याचारस्य दशविधाशातनापरिहाररूपस्य प्रस्मरणमुत्फंसनं लोप इत्यर्थः ॥ २५ ॥

जहिं पुच्छिय सुसावय सुहगुरुलक्खणइ
भणिहि गुणन्नुय सच्चयं पच्चक्खह तणइं ।
जहिं इक्कुत्तु वि कीरइ निच्छइं सगुणउ
समयजुत्ति विहडंतु न बहुलोयहं [त]णउ ॥ २६ ॥

[यत्र पृष्टाः सुश्रावकाः शुभगुरुलक्षणानि
भणन्ति गुणज्ञाः सत्यानि प्रत्यक्षसत्कानि ।
यत्रैकोक्तमपि क्रियते निश्चयेन सद्गुणं
समययुक्त्या विघटमानं न बहुलोकस्य ॥ २६ ॥]

यत्र च केनापि पृष्टाः सुश्रावकाः शुभगुरुलक्षणानि विशिष्टगीतार्थत्वातिशयविशेषकत्वादीनि भणन्ति गुणज्ञाः सत्यानि प्रत्यक्षसत्कानि साक्षात् प्रतीयमानानि । यत्रैकसुश्रावकोक्तमपि क्रियते निश्चयेन सद्गुणं कार्यं देवगृहकर्मान्तरादिकम् । समययुक्त्या विघटमानं बहुलोकोक्तमपि जलक्रीडादिकं नैवेत्यर्थः ॥ २६ ॥

जहिं न अप्पु वन्निज्जइ परु वि न दूसियइ
जहि सग्गुणु वन्निज्जइ विगुणु उवेहियइ ।
जहि किर वत्थु-वियारणि कसु वि न बीहियइ
जहि जिणवयणुत्तिन्नु न कहे वि पयंपियइ ॥ २७ ॥

---

१०८ ख. ग.°फलइं । १०९ क. म. । ११० ख.ग.°दंसिउ° । १११ ख.ग. नाक्षतवन° । ११२ ख. ग. °मुत्फुसनं । ११३ ख.ग. भणहिं । ११४ ख.ग.°लोयस्सह तणउं । ११५ क.नो चे° । ११६ क. कह प°

[यत्र नात्मा वर्ण्यते परोऽपि न दूष्यते
यत्र सद्गुणो वर्ण्यते विगुण उपेक्ष्यते ।
यत्र किल वस्तुविचारणे कुतोऽपि न भीयते
यत्र जिनवचनोत्तीर्णं न कथमपि प्रजल्प्यते ॥ २७ ॥]

यत्रात्मा न वर्ण्यते, परोऽपि न दूष्यते । यत्र सद्गुणो वर्ण्यते, विगुणश्चोपेक्ष्यते । एवंरूपत्वादेव सदाचारस्य यत्र किल वस्तुविचारणे यथावस्थितचैत्यादिविधिभणने न कुतोऽपि भयं क्रियते । यत्र जिनवचनोत्तीर्णमविध्यादिकं न कथमपि प्रजल्प्यते इत्यर्थः ॥ २७ ॥

इय बहुविह उस्सुत्तइं जेण निसेहियइं
विहिजिणहरि सुपसत्थिहि लिहिवि निदंसियइं ।
जुगपहाणु जिणवल्लहु सो[119] किं न मन्नियइ ?
सुगुरु जासु सन्नाणु सुनिउणिहि वन्नियइ ॥ २८ ॥

[इति बहुविधान्युत्सूत्राणि येन निषेधितानि
विधिजिनगृहे सुप्रशस्तिषु लिखित्वा निदर्शितानि ।
युगप्रधानो जिनवल्लभः स किं न मन्यते ?
सुगुरुर्यस्य संज्ञानं सुनिपुणैर्वर्ण्यते ॥ २८ ॥]

इति[120] निशिस्नानादीनि बहुविधान्युत्सूत्राणि[121] येन निषेधितानि विधिजिनगृहे चित्रकूटनर(ग)वर-नागपुर-मरुपुरादिसम्बन्धिनि सुप्रशस्तिषु लिखित्वा च निदर्शितानि । तथाहि 'इह न खलु निषेधः कस्यचिद् वन्दनादौ' इत्यादि,

" अत्रोत्सूत्रजनक्रमो न च न च स्नात्रं[122] रजन्यां सदा
साधूनां ममताऽऽश्रयो न च न च स्त्रीणां प्रवेशो निशि ।
जाति-ज्ञाति-कदाग्रहो न च न च श्राद्धेषु ताम्बूलमि—
त्याज्ञाऽत्रेयमनिश्रिते विधिकृते श्रीवीरचैत्यालये ॥
इह न लगुडरासः स्त्रीप्रवेशो न रात्रौ
न च निशि बलि-दीक्षा-स्नात्र-नृत्य-प्रतिष्ठाः ।
प्रविशति न च नारी गर्भगेहस्य मध्ये
ऽनुचितमकरणीयं गीत-नृत्तादिकार्यम् ॥ " इत्यादि

युगप्रधानश्रीजिनवल्लभः सोऽप्येवंगुणवानपि सुगुरुः किमिति न मन्यते ? यस्य संज्ञानं[123] सुनिपुणैरपि वर्ण्यत इत्यर्थः ॥ २८ ॥

अथोपदर्शितउ(तो)त्सूत्रपदप्ररूपकाणां भाविभवानन्तदुःखभाजनत्वं पश्यन्निदमाह—

---

११७ ख. ग. प्रजल्पति । ११८ ख. ग. °वल्लह । ११९ क. कि । १२० ख. ग. निशि बहुविधानि स्ना० । १२१ ख. ग. विविधा° । १२२ ख. ग. स्नानं । १२३ ख. ग. सत् ज्ञानं ।

लवमित्तु वि उस्सुत्तु जु इत्थु[124] पयंपियइ
तसु विवाउ अइथोउ वि केवलि दंसियइ ।
ताइं जि जे उस्सुत्तइं कियइं[125] निरंतरइं[126]
ताह दुक्ख जे हुंति ति भूरि भवंतरइ ॥ २९ ॥

[लवमात्रमप्युत्सूत्रं यदत्र प्रजल्प्यते
तस्य विपाकोऽतिस्तोकोऽपि केवलिना दर्श्यते ।
तान्येव ये उत्सूत्राणि कुर्वन्ति निरन्तरं
तेषां दुःखानि यानि भवन्ति तानि भूरिभवान्तराणि ॥ २९ ॥]

लवमात्रमप्युत्सूत्रं यदत्र प्रजल्प्यते, तस्य विपाकोऽतिस्तोक आस्तां समस्तः केवलिनैव दर्श्यते । तान्येव 'जीति पादपूरणे' ये गुरुकर्माण उत्सूत्राणि कुर्वन्ति वचन-कायाभ्यां निरन्तरं तेषां दुःखानि यानि भवन्ति तानि भूरिभवान्तराणि येषु प्रभूतजन्मसहस्रानुभवनीयानीति भाव इत्यर्थः ॥ २९ ॥

अथ तेषामेव किञ्चिच्चेष्टितमाह—

अपरिक्खियसुयनिहसिहिं[127] नियमइगव्वियहिं[128]
लोयपवाहपयट्टिहिं[129] नामिण सुविहियइं[130] ।
अवरुप्परमच्छरिण निदंसियसग्गुणिहिं[131]
पूआविज्जइ अप्पउं[132] जिणु जिव निग्घिणिहिं ॥ ३० ॥

[अपरीक्षितश्रुतनिकषैर्निजमतिगर्वितै-
र्लोकप्रवाहप्रवृत्तैर्नाम्ना सुविहितैः ।
परस्परमत्सरेण निदर्शितसद्गुणैः
पूज्यते आत्मा जिन इव निर्घृणैः ॥ ३० ॥]

अपरीक्षितश्रुतनिकषैर्निजमतिगर्वितैर्लोकप्रवाहप्रवृत्तैरत एव नामतः सुविहितैः। आस्तां शुद्धचारित्रसाधुविषये किन्तु परस्परतोऽपि मत्सरेण निदर्शितसद्गुणैरितर-निन्दया पूज्यते आत्मा जिन इव निःशूकैरित्यर्थः ॥ ३० ॥

एवं च सति—

---

१२४ ख. ग. इत्थ । १२५ ख. ग. निरंतरह । १२६ क. °सुह° । १२७ ख. ग. °पयट्टइं । १२८ ख. ग. सग्गुणिहिं । १२९ ख. ग. पूआविज्जइं ।

इह अणुसोयपयट्टह संख न कु वि करइ
भवसायरि ति[130] पडंति न इक्कु वि उत्तरइ ।
जे पडिसोय पयट्टहि[131] अप्प वि जिय[132] धरह
अवसय सामिय हुंति ति निव्वुइपुरवरह ॥ ३१ ॥

[इहानुस्रोतःप्रवृत्तानां सङ्ख्यां न कोऽपि करोति
भवसागरे ते पतन्ति नैकोऽप्युत्तरति ।
ये प्रतिस्रोतः प्रवर्तन्तेऽल्पा अपि जीवा धरायाम्—
अवश्यं स्वामिनो भवन्ति ते निर्वृतिपुरवरस्य ॥ ३१ ॥]

अनुश्रो(स्रो)तोमार्गप्रवृत्तानां सङ्ख्यां न कोऽपि करोति बहुत्वात्। भवसागरे[133] ते निपतन्ति । नैकोऽप्युत्तरति निबिडकर्मत्वात् । ये पुनरल्पा अपि जीवाः प्रतिश्रो-(स्रो)तोमार्गे प्रवर्तन्ते धरायाम्, अवश्यं स्वामिनस्ते भवन्ति निर्वृतिपुरवरस्येत्यर्थः ॥ ३१ ॥

जं आगम–आयरणिहिं[133] सहुं न विसंवयइ
भणहि[134] त वयणु निरुत्तु[135] न सग्गुणु जं चयइ ।
ते वसंति गिहिगेहि[136] वि होइ तमायणु[137]
गइहि तित्थु[138] लहु लब्भइ मुत्तिउ सुहरयणु ॥ ३२ ॥

[यदागमाचरणाभ्यां सह न विसंवदति
भणन्ति तद् वचनं निश्चितं न सद्गुणो यत् त्यजति ।
ते वसन्ति गृहिगेहेऽपि भवति तदायतनं
गतैस्तत्र लघु लभ्यते मुक्तेः सुखरत्नम् ॥ ३२ ॥]

यदागमाचरणाभ्यां न विसंवदति, भणन्ति तद् वचनम्, निश्चितं न सद्गुणो यत् त्यजति[139] । ते चैवंविधाश्चारित्रपवित्रा वसन्ति यत्र गृहिगेहेऽपि तदायतनं भवति तद्वासपवित्रत्वात् ज्ञानादिलाभभावाच्च । गतैः सद्भिस्तत्र लभ्यते मुक्ति-सम्बन्धिसुखरत्नम् । यथा कचित् सुप्रसन्न ईश्वरे मौक्तिकं प्राप्यते, तथेहापीति भाव इत्यर्थः ॥ ३२ ॥

अथ विधिचैत्यानिश्राकृतप्रसङ्ग[140] एव निश्राचैत्यादिस्वरूपमाह—

---

१३० क. निप°। १३१ ख. जय। १३२ क. सागरे नि°। १३३ ख. ग. सुहु। १३४ ख. ग. भणिहिं। १३५ क. निरत्तु। १३६ ख. ग. °गेहु। १३७ क. तमायणु १३८ ख. ग. तत्थु। १३९ ग. त्यजंति। १४० ख. ग. सद्वास°। १४१ क. °प्रसंग एव।

पासत्थाइविबोहिय केइ जि सावयइं
कारावँहि जिणमंदिरु तंमइभाँवियइं ।
तं किर निस्साचेइउ अववाँयिण भणिउ
तिहिं–पव्विहि तहि कीरइ वंदणु कारणिउ ॥ ३३ ॥

[पार्श्वस्थादिविबोधिताः केचिच्छ्रावकाः
कारयन्ति जिनमन्दिरं तन्मतभाविताः ।
तत् किल निश्राचैत्यमपवादेन भणितं
तिथि–पर्वसु तत्र क्रियते वन्दनं कारणिकम् ॥ ३३ ॥]

देशतः पार्श्वस्थादिभिर्विबोधिताः केचिच्छ्रावकाः कारयन्ति जिनमन्दिरं तन्मतभाविताः । तत् किल निश्राचैत्यमपवादेन भणितमायतनम् । अत एव तिथिषु पर्वसु चाष्टमी-चतुर्दशी-चतुर्मासक-पर्युषणादिषु क्रियते वन्दनकं कारणिकम् अनिश्राचैत्याभावेन कादाचित्कम्। तत्र हि लिङ्गिनो मध्ये न निवसन्ति । यत उक्तं श्रीमज्जिनवल्लभसूरिभिरागमोद्धारे—

" ओसन्ना (१) चिय तत्थेव इंती चेइयवंदगा ।
जेसि निस्साइ तं भवणं सड्ढाईहि वि कारियं ॥" इत्यर्थः ॥ ३३ ॥

अथानायतनं विवक्षुः प्रकल्पोक्तभङ्ग्यन्तरेणाह—

जँहि लिंगिय जिणमंदिरि जिणदव्विण कयइं
मठि वसंति आसायण करँहिं महंतियँइं ।
तं पकाप्पि परिवन्निउ साहम्मियथलिय
जहिं गय वंदणकज्जिण न सुदंसण मिलिय ॥ ३४ ॥

[यत्र लिङ्गिनो जिनमन्दिरे जिनद्रव्येण कृते
मठे वसन्त्याशातनाः कुर्वन्ति महतीः ।
तत् प्रकल्पे परिवर्णितं साधर्मिकस्थली
यत्र गता वन्दनकार्येण न सुदर्शनस्य मिलिताः ॥ ३४ ॥]

यत्र किल लिङ्गिनो लिङ्गमात्रसाधर्मिका जिनमन्दिरे अथवा जिनद्रव्यकृते मठे वा वसन्ति । वसन्तश्च सन्तो महतीराशातना भोजन–शयनादिभिः कुर्वन्ति । तत् प्रकल्पे निशीथाध्ययने परिवर्णितं साधर्मिकस्थलीति देवद्रोणीति नाम्ना । यत्र

(१) अवसन्ना एव तत्रैव यन्ति चैत्यवन्दकाः ।
येषां निश्रया तद् भवनं श्राद्धादिभिरपि कारितम् ॥

१४१ ख. ग. °भावियइं । १४३ क. अववायणा । १४४ ख. ग तिहिं पव्वहिं । १४५ क. पर्वाष्टमी° । १४६ ख. ग. कदा° । १४७ ख. ग. करिहिं ।

गता भक्तिमन्तो वन्दनकार्येण न सुदर्शनस्य शोभनसम्यक्त्वस्य मिलिताः क्षणमात्रमप्यनायतनसेवाया मिथ्यात्वहेतुत्वादित्यर्थः ॥ ३४ ॥

अथौघनिर्युक्त्याद्युक्तरूपेणानायतनमाह—

ओहनिजुत्तावस्सयपयरणदंसियउ
तमणाययणु जु दावइ दुक्खपसंसियउ ।
[148]तहिं कारणि वि न जुत्तउ सावयजणगमणु
[149]तहिं वसंति जे लिंगिय ताहि वि पयनमणु ॥ ३५ ॥

[ओघनिर्युक्त्यावश्यकप्रकरणदर्शितं
तदनायतनं यद् दर्शयति दुःखप्रशंसितः ।
तत्र कारणेऽपि न युक्तं श्रावकजनगमनं
तत्र वसन्ति ये लिङ्गिनस्तेषामपि पदनमनम् ॥ ३५ ॥]

ओघनिर्युक्त्यावश्यकादिसिद्धान्तदर्शितं तच्चैत्यमनायतनं यो दर्शयत्यतिप्रभूतगुणत्वाद् दुःखेन महता कष्टेन प्रशंसितस्तावकैः । अथवा यैस्तु अनायतनचैत्यं कर्तृप्रशंसितं सत् दुःखं नरकादिगतिसम्बन्धि दर्शयति प्रशंसकानां तत्र कारणेनाप्यनिश्राचैत्याभावरूपेण ।

" नाणस्स[1] दंसणस्स य चरणस्स य जत्थ होइ वाघाओ ।
वज्जिज्जवज्जभीरू अणाययणवज्जओ खिप्पं ॥ "

इति वचनात् तत्र च केवलाविधिदर्शनेन लिङ्गिसंसर्गेण च सम्यक्त्वादिव्याघातसम्भवात् न युक्तं श्रावकजनस्य गमनम् । तत्र ये वसन्ति लिङ्गिनस्तत्पदवन्दनमपि न युक्तमित्यर्थः ॥ ३५ ॥

अथ तत्र गमने दोषमाह—

जाइज्जइ तहिं वावि(ठाणि) ति नमिय[150]हिं इत्थु जइ
गय नमंतजण पावहि गुणगणवुड्ढिं जइ ।
[151]गईहि तत्थु[152] ति नमंतिहिं पाउ जु पावियइ
गमणु नमंणु तहिं निच्छईं सगुणिहिं वारियइ ॥ ३६ ॥

---

(१) ज्ञानस्य दर्शनस्य च चरणस्य च यत्र भवति व्याघातः ।
वर्जयेदवद्यभीरुरनायतनवर्जकः क्षिप्रम् ॥

---

१४८ क. तहि । १४९ ख. ग. यदायतन° । १५० क. तित्थु जि। १५१ ख ग, नमणुं जं तहिं।

[गम्यते तत्र स्थाने ते नम्यन्तेऽत्र यदि
गता नमज्जनाः प्राप्नुवन्ति गुणगणवृद्धिं यदि ।
गतैस्तत्र तान् नमद्भिः पापं यदि प्राप्यते
गमनं नमनं तत्र निश्चयेन सगुणैर्वार्यते ॥ ३६ ॥]

गम्यते एव तत्र स्थाने ते च लिङ्गिनः प्रणम्यन्ते, अत्र चैत्ये यदि कथंचिद् गताश्च जना नमन्तः प्राप्नुवन्ति गुणगणवृद्धिं यदि, तदा तत्र युक्तमेव गमनमिति शेषः । परं गतैः सद्भिस्तत्र तान् नमद्भिश्च 'पासत्थाई वंदमाणस्स' इत्यादिवचनात् पापमेव प्राप्यतेऽतो गमनं तन्नमनं च तत्र निश्चयतो निश्चयनयेन सगुणैर्गीतार्थैर्वार्यत इत्यर्थः ॥ ३६ ॥

अथ लिङ्गिनामिव केषाञ्चिद् वसतिनिवासिनामपि भावानायतनत्वेनाद्रष्टव्यत्वमाह—

वसहिहिं वसहिं बहुत्तउसुत्तपयंपिरेहिं
करेहिं किरिय जणरंजण निच्चु वि दुक्करयं ।
परि सम्मत्तविहीण ति हीणिहि सेवियहिं
तिहिं सहुं दंसणु सग्गुण कुणहिं न पावियहिं ॥ ३७ ॥

[वसतौ वसन्ति प्रभूतोत्सूत्रप्रजल्पाकाः
कुर्वन्ति क्रियां जनरञ्जनाय नित्यमपि दुष्कराम् ।
परं सम्यक्त्वविहीनास्ते हीनैः सेव्यन्ते
तैः सह दर्शनं सद्गुणाः कुर्वन्ति न पापिभिः ॥ ३७ ॥]

वसतौ वसन्ति परं प्रभूतोत्सूत्रप्रजल्पाकाः कुर्वन्ति क्रियां पुनर्जनरञ्जनार्थं नित्यमपि दुष्करामपि प्रभूतमलधारणमलिनतरवस्त्रचतुर्थरसिकापानादिकां परं ते सम्यक्त्वविहीना उत्सूत्रभाषकत्वात् हीनैरेव सम्यक्त्वादिविकलैरेव सेव्यन्ते । यतस्तैः सह दर्शनमपि सद्गुणाः सच्चारित्रिणो न कुर्वन्ति पापिभिरित्यर्थः ॥ ३७ ॥

अथ चैत्यत्रयेऽपि गमनादिविषयविभागमाह—

उस्सग्गिण विहिचेइउ पढमु पयासियउ
निस्साकडु अवावाइण दुइउ निदंसियउ ।
जहि किर लिंगिय निवसहि तमिह अणाययणु
तहि निसिद्धु सिद्धंति वि धम्मियजणगमणु ॥ ३८ ॥

---

(१) पार्श्वस्थादीन् वन्दमानस्य ।

---

१५२ क. नाद्रष्टव्यमाह । १५३ क. करहि । १५४ ख. ग. °रसिकपा° । १५५ क. पयासिउ । १५६ ख. ग. यवाव° । १५७ क. किरि । १५८ ख. ग. वसहि ।

[उत्सर्गेण विधिचैत्यं प्रथमं प्रकाशितं
निश्राकृतमपवादेन द्वितीयं निदर्शितम् ।
यत्र किल लिङ्गिनो निवसन्ति तदिहानायतनं
तत्र निषिद्धं सिद्धान्तेऽपि धार्मिकजनगमनम् ॥ ३८ ॥]

उत्सर्गेण विधिचैत्यं गमनयोग्यतया प्रथमं प्रकाशितम् । निश्राकृतं त्वपवादेन द्वितीयं तिथि-पर्वादिषु गमनयोग्यं निदर्शितम् । यत्र लिङ्गिनो निवसन्ति तत् तृतीयमनायतनमिति दर्शितम्, तत्र निषिद्धमपवादतोऽपि धार्मिकजनगमनम्; कदाचिदत्यन्तापवादविषयत्वात् तस्येत्यर्थः ॥ ३८ ॥

अत एवाह—

**विणु कारणि ताँहि[१५७] गमणु न कुणँहि[१५८] जि सुविहियइं
तिविहु जु चेइउ कहइ सु साहु वि मंनियइ ।
तं पुण दुविहु कहेइ जु सो अवगन्नियइ
तेण लोउ इह सयलु वि भोलेउ[१५९] धुंधियइ ॥ ३९ ॥**

[विना कारणं तत्र गमनं न कुर्वन्ति सुविहिताः
त्रिविधं यश्चैत्यं कथयति स साधुरपि मन्यते ।
तत् पुनर्द्विविधं कथयति यः सोऽवगण्यते
तेन लोक इह सकलोऽपि मुग्धो विप्रतार्यते ॥ ३९ ॥]

विना कारणं दुष्टजनविहितधर्मभ्रंशादिभयमन्तरेण तत्रानायतने गमनं न कुर्वन्ति सुविहिताः सदाचाराः श्रावकादयोऽपि । एवं च सति त्रिविधं चैत्यं यः कथयति अस्तित्वेन प्रतिपादयति, स साधुरपि मन्यते । तत् पुनर्द्विविधमनायतनवर्जनेन कथयति यः, स साधुरप्यवगण्यते; शुद्धसिद्धान्तविचारासिद्धत्वादनायतनस्यापि । तेन द्विविधचैत्यकथकेन लोकः सकलोऽपि[१६०] मुग्धप्रायो (1)'निस्सकडमनिस्सकडे वा वि चेइए' इत्यादि वदता विप्रतार्यत इत्यर्थः ॥ ३९ ॥

**इय निप्पुन्नेह[१६१] दुल्लह सिरिजिणवल्लहिण
तिविहु निवेइउ चेइउ सिवसिरिवल्लहिण ।
उस्सुत्तइँ[१६२] वारंतिण सुत्तु[१६३] कहंतइण
इह नवं व जिणसासणु दंसिउ सुम्मइण ॥ ४० ॥**

(१) निश्राकृतमनिश्राकृतं वाऽपि चैत्ये ।

१५९ ख. ग. भोलिवि । १६० ख.ग. सर्वोपि । १६१ क. निप्पुन्नहि । १६२ ख. वारितिण। १६३ क. कहत्तहइण ।

[इति निष्पुण्यानां दुर्लभेन श्रीजिनवल्लभेन
त्रिविधं निवेदितं चैत्यं शिवश्रीवल्लभेन ।
उत्सूत्राणि वारयता सूत्रं कथयता
इह नवमिव जिनशासनं दर्शितं सन्मतिना ॥ ४० ॥]

इति निष्पुण्यानां दुर्लभेन श्रीजिनवल्लभेन त्रिविधं निवेदितं चैत्यं शिवश्रीवल्लभेन । उत्सूत्राणि रात्रिस्नानादीनि वारयता सूत्रं सूत्रार्थं विधिरूपं कथयता, तथा चोत्सूत्रभाषकप्रवर्तितकेवलाविधिप्रवणचैत्यादिदर्शनप्रच्छादितविधिप्रकाशम् । इह लोके नवमिव जिनशासनं दर्शितं सन्मतिना लोकोत्तरबुद्धिभाजेत्यर्थः ॥४०॥

इक्कवयणु जिणवल्लहु[164] पहुं[165] वयणइं[166] घणइं
किं व जंपिवि जणु सक्कइ सक्कु वि जइ मुणेइ[167] ।
तसु पयभत्तह सत्तह सत्तह भवभयह[168]
होइ अंतु सुनिरुत्तउ तव्वयणुज्जयह ॥ ४१ ॥

[एकवचनो जिनवल्लभः प्रभुर्वचनानि घनानि
किमिव जल्पितुं जनः शक्नोति शक्रोऽपि यदि जानाति ।
तस्य पदभक्तानां सत्त्वानां सतानां भवभयानां
भवत्यन्तः सुनिश्चितस्तद्वचनोद्यतानाम् ॥ ४१ ॥]

'जणुशब्दो द्वितीयपादगतो जानीहि त्वमेवैतदित्यर्थे लोकरूढितो बोद्धव्यः' ततश्च भोः सखे ! त्वमेवैतज्जानीहि । एकवचनः श्रीजिनवल्लभः प्रभुः कथं बहूनि वचनानि श्रीवीरषष्ठ[169]कल्याणक-विधिविषयपारतन्त्र्य-चैत्यसाधुगतकृत्याकृत्यषट्कप्रमाणकल्प-साधुप्रावरणकषायादिद्रव्याहतजलग्रहणादीनि कथं जल्पितुं समस्तसङ्घसमक्षं प्रकाशयितुं शक्नोति । एकवचनशक्तेरनेकवचनजल्पनविरोधात् । तत्परिहारश्चैवम्-एकमेकरूपमेव पूर्वापराविरोधेन सिद्धान्ताविरुद्धगीतार्थाचरणानुसारि वचनं यस्य तस्य च श्रीमन्महावीरषष्ठकल्याणकाद्यनेकवचनजल्पनविरोधः सर्वथा नास्ति, सिद्धान्ताद्यनुसारित्वात् सर्वेषां वचनानाम् । तानि हि वचनान्याधुनिकसाधुप्रवर्तनेन आच्छादितान्येवासन् । अत एव शक्रोऽपि विबुधेश्वरतया लोकोत्तरप्रज्ञातिशयशालित्वेन लोकोत्कृष्टोऽपि यदि कथञ्चिन्महाकृच्छ्रेण जानाति विशिष्टयुगप्रधानगम्यत्वात् पूर्वोक्तार्थानाम् । अथवा एवं योजना कार्या-जिनवल्लभप्रभुवचनानि प्रभूतानि पूर्वोक्तान्येकवदनो जनोऽस्मदादिः कथं जल्पितुमपि सभा-

---

१६४ ख. ग. बहु । १६५ क. वयणइं । १६६ ख. ग. सुणेइ । १६७ क. °भवयह । १६८ क. °षट्कल्याणिक । १६९ ख. ग. °गुणप्र° । १७० क. °दादिर्ज° ।

समक्षं प्ररूपयितुमपि शक्नोति ? आस्तां सम्यक् कर्तुं कारयितुं चेत्यात्मायः[१७१]। तस्य प्रभोः पदभक्तानां सत्त्वानाम् '(१)इहपरलोयाणमकम्हा आजीवमरणमसिलोए' इति सप्तानां भवभयानां भवत्यन्तः क्षयः सुनिश्चितस्तद्वचनकरणोद्यतानामित्यर्थः॥ ४१॥

इक्ककालु जसु विज्ज असेस वि वयणि ठिय
मिच्छदिट्ठि वि वंदहिं किंकरभावट्ठिय ।
ठावि(णि) ठावि(णि) विहिपक्खु वि जिण अप्पडिखलिउ
फुडु पयडिउ निक्कवडिण परु अप्पेउँ कलिउ ॥ ४२ ॥

[एककालं यस्य विद्या अशेषा अपि वदने स्थिता
मिथ्यादृष्टयोऽपि वन्दन्ते किङ्करभावस्थिताः ।
स्थाने स्थाने विधिपक्षोऽपि येनाप्रतिस्खलितः
स्फुटं प्रकटितो निष्कपटेन परमात्मानं कलयित्वा ॥ ४२ ॥]

एककालं युगपदेव यस्य विद्यास्तर्कादयोऽशेषा अपि वदने स्थिताः । मिथ्यादृष्टयोऽन्यदर्शनस्थिता अपि श्रीनरवर्ममहाराजपण्डिताः पञ्चविंशतितमोऽयं तीर्थंकर इति प्रतिपादयन्तो वन्दन्ते किङ्करभावस्थिता बहुमानातिशयप्रवर्तित-सादरवचनाः। स्थाने स्थाने सर्वत्र विधिपक्षोऽपि येनाप्रतिस्खलितो निराकर्तुरभावेन स्फुटः[१७२] प्रकटितो निष्कपटेन निश्छद्मना परोऽपि निराकरणीय आत्मा च निराकर्ता द्वयमपि कलयित्वा यथावस्थितत्वेन तच्छक्तिमाकलय्य स्वसामर्थ्येनेत्यर्थः ॥४२॥

तसु पयपंकयउ[१७३] पुन्निहिं[२७] पाविउ जण-भमरु
सुद्धनाण-महुपाणु [१७४]करंतउ हुइ अमरु ।
सत्थु हुंतु सो जाणइ सत्थ पसत्थ सहि
कहि अणुवमु उवमिज्जइ केण समाणु सहि [१७५]!? ॥ ४३ ॥

[तस्य पदपङ्कजं पुण्यैः प्राप्य जनभ्रमरः
शुद्धज्ञान-मधुपानं कुर्वन् भवत्यमरः ।
स्वस्थो भवन् स जानाति शास्त्राणि प्रशस्तानि सर्वाणि
कथयानुपम उपमीयते केन सह सखे ! ? ॥ ४३ ॥]

(१) इह-परलोकानामकस्मादाजीव-मरणमश्लोकः ।

१७१ क. वेत्यात्मा यः । १७२ क. स्फुटं यः । १७३ क. °पंकउ । १७४ ख. ग. कुणंतउ । १७५ ख. ग. यणु° ।

तस्य पदपङ्कजं पुण्यैः प्राप्य जन एव भ्रमरः शुद्धज्ञानमधुपानं कुर्वन् भवत्यमरः । शुद्धज्ञानपाने हि सति स्वस्थो विषयकषायाद्यभावेन सुखितः सन् स जानाति शास्त्राण्यङ्गोपाङ्गप्रकरणादीनि प्रशस्तानि शुभानि सहीति सर्वाण्यपि । एवंविधश्चानुपमः केन सहोपमीयते इति सखे ! कथय त्वमेवोपमाऽतिक्रान्तत्वान्न केनापीत्यर्थः ॥ ४३ ॥

अथ तस्यैव गुरुक्रममाह—

वद्धमाणसूरिसीसु जिणेसरसूरिवरु
तासु सीसु जिणचंदजईसरु जुगपवरु ।
अभयदेउमुणिनाहु नवंगह वित्तिकरु[१७६]
तसु पयपंकय–भसलु सलक्खणुचरणकरु ॥ ४४ ॥

[वर्धमानसूरिशिष्यो जिनेश्वरसूरिवरः
तस्य शिष्यो जिनचन्द्रयतीश्वरो युगप्रवरः ।
अभयदेवमुनिनाथो नवाङ्गानां वृत्तिकरः
तस्य पदपङ्कजभ्रमरः सलक्षणचरणकरः ॥ ४४ ॥]

वर्धमानसूरेः शिष्यो जिनेश्वरसूरिर्वरः । तस्य जिनेश्वरसूरेः शिष्यो जिनचन्द्रसूरिर्यतीश्वरो युगप्रवरः, अभयदेवमुनिनाथोऽपि स्थानादिनवाङ्गवृत्तिकारकः । तस्याभयदेवसूरेः पदपङ्कजभ्रमरः सामुद्रिकोक्तलक्षणयुक्तचरणकर इत्यर्थः ॥ ४४ ॥

सिरिजिणवल्लहु दुल्लहु निप्पुन्नहं जणहं
हउं न अंतु परियाणउं अहु जण ! तग्गुणह ।
सुद्धधम्मि हउं ठाविउ जुगपवरागमिण
एउ वि मइं परियाणिउ[१७७] **तग्गुण–संकमिण ॥ ४५ ॥**

[श्रीजिनवल्लभो दुर्लभो निष्पुण्यानां जनानाम्
अहं नान्तं परिजानाम्यहो ! जनास्तद्गुणानाम् ।
शुद्धधर्मेऽहं स्थापितो युगप्रवरागमेन
एतदपि मया परिज्ञातं तद्गुणसङ्क्रमेण ॥ ४५ ॥]

तच्छिष्यः श्रीजिनवल्लभो दुर्लभो निष्पुण्यानां जनानाम् । तस्यैवंविधस्य गुणरत्नानां महानिधेरहं नैवान्तं पर्यन्तं सर्वसङ्ख्यामित्यर्थः परिजानामि भो जनास्तद्गुणानाम् । किञ्च शुद्धधर्मे विधिधर्मरूपे परमार्थतोऽहं तेन स्थापितः

१७६ ख, ग. अभयदेवउ । १७७ क. °याणउ ।

स्वप्रतिपादितविधौ प्रवर्त्तनात् । एतदपि मया विधिमार्गे प्रवर्तनं परिज्ञातं तद्गुणसङ्गमेण दूरस्थस्यापि तस्यादर्शस्येव कथञ्चित्प्रभावातिशयेन मयि तद्गुणसङ्गमात् । विधिधर्मविषयबहुमानातिशयप्रादुर्भावादित्यर्थः ॥ ४५ ॥

अथ स्तुतिपरिसमाप्तौ स्वचरितेन ताम्यन् सविषादमाह–

भामिउ भूरिभवसा[178]यरि तह वि [179]न पत्तु मइं[180]
सुगुरुरयणु जिणवल्लहु दुल्लहु सुद्धमइ ।
पाविय तेण न निव्वुइ इह पारत्ति[181]यइं[182]
परिभव पत्त बहु[183]त्त न हुय पारत्ति[184]यइं ॥ ४६ ॥

[भ्रान्तो भूरिभवसागरे तथापि न प्राप्तो मया
सुगुरुरत्नं जिनवल्लभो दुर्लभः शुद्धमतिः ।
प्राप्ता तेन न निर्वृतिरिहपारत्रिकी
परिभवाः प्राप्ताः प्रभूता न भूतानि पारत्रिकाणि ॥ ४६ ॥

भ्रान्तो भूरि प्रभूतकालं भवसागरे तथापि न प्राप्तो मया सुगुरुरत्नं श्रीजिनवल्लभो दुर्लभोऽपुण्यानां शुद्धमतिर्विवेकातिशयवत्त्वात् । प्राप्ता तेन कारणेन नैव निर्वृतिः सुखविशेषो मुक्तिर्वा । तदेवाह–इहेति ऐहिकी पारत्रिकी च जन्मान्तरसम्बन्धिनी । परिभवाश्च बहवः प्राप्ताः, न च भूताः कुतोऽपि[183] परित्राः परित्राणानि, अथवा न भूतानि पारत्रिकाणि परत्र हितानि ज्ञानादीनि युगप्रवरागमप्रसादाभावादित्यर्थः ॥ ४६ ॥

अथोपसंहरन्नाह––

इय जुगपवरह [185]सूँरिहि सिरिजिणवल्लहह
नायसमयपरमत्थह बहुजणदुल्लहह ।
तसु गुणथुइ बहुमाणिण सिरिजिणदत्तगुरु
करइ सु निरुवमु पावइ पउ जिणदत्तगुरु ॥ ४७ ॥

[इति युगप्रवरस्य सूरेः श्रीजिनवल्लभस्य
ज्ञातसमयपरमार्थस्य बहुजनदुर्लभस्य ।
तस्य गुणस्तुतिं बहुमानेन श्रीजिनदत्तगुरुः
करोति स निरुपमं प्राप्नोति पदं जिनदत्तगुरु ॥ ४७ ॥]

इति युगप्रवरस्य सूरेः श्रीजिनवल्लभस्य ज्ञातसिद्धान्तपरमार्थस्य बहुजनानां गुरुकर्मणां दुर्लभस्य तस्य गुणस्तुतिं बहु[186]मानेन श्रीजिनदत्तगुरुः करोति । स

१७८ ख. ग. °सायरु । १७९ क. नु । १८० क. मइं । १८१ ख. ग. °यइं । १८२ ख.ग. बहुत्त। १८३ ख. ग. °पि परित्रा णानि । १८४ क. °मानामिमां ।

च कर्ता निरुपमं पदं मोक्षलक्षणं प्राप्नोति प्रभावातिशयख्यापनाय भविष्यत्यप्यर्थे वर्तमानानिर्देशः। जिनैर्दत्तं सिद्धान्ते दर्शितं गुरु महत् पूज्यं मोक्षाख्यमित्यर्थः ॥ ४७ ॥

इति युगप्रवरागमजिनपतिसूरिशिष्यलेशविरचितं चर्चरीसंक्षेपविवरणं समाप्तम् ॥

इति चर्चरीसुचर्चामज्जर्यो सुरभिरूपता लेभे ।
जिनपालमूलनाम्ना श्री**जिनपति**मुनिपशिष्येण ॥ १ ॥
वेद–ग्रह–रविवर्षे मधुपक्षे श्यामले तृतीयायाम् ।
सा सफला संजज्ञे मुनिजनमधुपोपभोगेन ॥ २ ॥
श्री**जिनेश्वर**सूरीणामादेशात् कविकुम्भिनाम् ।
इयं व्याख्या मया चक्रे संक्षिप्ता मन्दमेधसा ॥ ३ ॥

इति चर्चरी समाप्ता ।

---

१८५ ख. ग. °शयस्य ख्या°। १८६ ख. ग. °मानिनि°। १८७ ख. ग. इति श्रीजिनपत्ति°। १८८ क. चचरी° ।

जिनदत्तसूरिविरचितो

जिनपालोपाध्यायविहितवृत्तियुत

उपदेश(धर्म)रसायनरासः ।

वीरं जिनपतिं नौमि यद्वचो मधुरं बुधाः ।
रसायनमिवास्वाद्य बभूवुरजरामराः ॥ १ ॥
चर्च्चरी[1]-रासकप्रख्ये प्रबन्धे प्राकृते किल ।
वृत्तिप्रवृत्तिं नाधत्ते प्रायः कोऽपि विचक्षणः ॥ २ ॥
किन्तु क्वचित् क्वचित् किञ्चिदुपदेशरसायने ।
पदं दुर्बोधमित्येष न्याय्यो व्याख्यापरिश्रमः ॥ ३ ॥
अत्र पद्धटिकाबन्धे मात्राः षोडश पादगाः ।
अयं सर्वेषु रागेषु गीयते गीतिकोविदैः ॥ ४ ॥

इह हि युगप्रधानागमैः श्रीमद्भिर्जिनदत्तसूरिभिर्लोकप्रवाहपतितान् बहून् जन्तूनुपलभ्य तदुपचिकीर्षया लोकप्रवाह-सद्गुरुस्वरूप-चैत्यविधिविशेष-श्रावक-श्राविकादिशिक्षाविशेषप्रतिपादकः प्राकृतभाषया धर्मरसायनाख्यो रासकश्चक्रे । स च मन्दबुद्धिनाऽपि मया किञ्चिद् व्याख्यायते । तस्येदमादिसूत्रम्—

पणमह पास-वीरजिण भाविण
तुम्हि सव्वि जिव मुच्चहु पाविण ।
घरववहारि म लग्गा अच्छह
खणि खणि आउ गलंतउ पिच्छह ॥ १ ॥

[प्रणमत पार्श्व-वीरजिनौ भावेन
यूयं सर्वे जीवा मुच्यध्वं पापेन ।
गृहव्यवहारे मा लग्नास्तिष्ठथ
क्षणे क्षणे आयुर्गलत् प्रेक्षध्वम् ॥ १ ॥]

प्रणमत नमस्कुरुत भो भव्याः ! पार्श्व-वीरावुपान्त्यान्त्यरूपौ जिनौ तीर्थकरौ भावेन शुभाध्यवसायेन 'तुम्हि त्ति' यूयं सर्वे समस्ता अपि । अथ तत्प्रणामफल-माह—यथा यूयं पापेन कल्मषेण मुच्यध्वं त्यक्ता भवथ । इष्टदेवतास्तवमभिधायाथ

---

१ ख. चच्चरी° । २ क. अथ । ३ क. °विशेषश्राविका° । ४ क. अच्छहु । ५ क. पिच्छउ ।

धर्मोपदेशमारभते सूत्रकारः । गृहव्यवहारे गृहव्यापार एव हलकर्षण-सेवा-वाणिज्यादावेव मा लग्ना आसक्तास्तिष्ठथ । अन्तराऽन्तरा धर्मव्यवहारमपि कुरुतेत्यवधारणफलम् । क्षणे क्षणे आयुर्जीवितं गलद् भ्रश्यत् प्रेक्षध्वम् । प्रायः पर्यायाकथनं सर्वत्र सूत्रपदानां प्रसिद्धत्वादित्यर्थः ॥ १ ॥

तथा च किमित्याह—

लद्धउ माणुसजम्मु म हारहु
अप्पा भव-समुद्दि गउ तारहु ।
अप्पु म अप्पेहु[2] रायह रोसह
करहु निहाणु मं[3] सव्वह दोसह ॥ २ ॥

[लब्धं मानुषजन्म मा हारयत
आत्मानं भवसमुद्रगतं तारयत ।
आत्मानं माऽर्पयत राग-रोषयोः
कुरुत निधानं मा सर्वदोषाणाम् ॥ २ ॥]

लब्धं मानुषजन्म मा हारयत मा निरर्थकं नयत । आत्मां[5] भवसमुद्रगत[6]-स्तार्यतां तत्पारं नीयताम् । तदुपायमाह-आत्मानं मा अर्प्पयत तद्वशं मा नयत राग-द्वेषयोः । तद्वशवर्तित्वेन मा कुरुत निधानं सर्वदोषाणामित्यर्थः ॥ २ ॥

दुलहउ मणुयजम्मु जो पत्तउ
सहलउ करहु तुम्हि सुनिरुत्तउ ।
सुहगुरु-दंसण विणु सो सहलउ
होइ न कीवइ वहलउ वहलउ ॥ ३ ॥

[दुर्लभं मनुजजन्म यत् प्राप्तं
सफलं कुरुत यूयं सुनिरुक्तम् ।
शुभगुरुदर्शनं विना तत् सफलं
भवति न कथमपि शीघ्रं शीघ्रम् ॥ ३ ॥]

दुर्लभं मनुजजन्म यत् प्राप्तं सफलं कुरुत तद् यूयं सुनिरुक्तं सुनिश्चितम् । शुभगुरुदर्शनं च विना न तत् सफलं भवति कथमपि । तथा 'वहलउ वहलउ' इति लोके हि यत्र विवाहादौ प्रमुदितजनसमूहः सवेषाभरणः परस्परप्रीत्या क्रीडति तद् वहलवहलम् । जन्मन्यपि यत्र पुत्र-कलत्र-राजसन्मान-लक्ष्मीवत्त्वं लोक-लोकोत्तरविशिष्टचेष्टावत्त्वं च तद् वहलवहलमित्यर्थः ॥ ३ ॥

---

१ क. माणस° । २ ख. ग. अप्पह । ३ क म म । ४ ख. ग. °षं जन्म । ५ क. आत्मानं । ६ क.° गतं तारयत आत्मानं मोक्षं प्रापयतेत्यर्थः । तथा आ० ।

अथ सुगुरोः स्वरूपमाह

सुगुरु सु वुच्चइ सच्चउ भासइ
परपरिवायि-नियरु जसु नासइ ।
सवि जीव जिवं[1] अप्पउं[2] रक्खइ
मुक्ख-मग्गुं[3] पुच्छियउ जुं[4] अक्खइ ॥ ४ ॥

[सुगुरुः स उच्यते सत्यं भाषते
परपरिवादिनिकरो यस्माद् नश्यति ।
सर्वजीवानात्मानमिव रक्षति
मोक्षमार्गं पृष्टो य आख्याति ॥ ४ ॥]

सुगुरुः स उच्यते यः सत्यमनुत्सूत्रं भाषते । परपरिवादिनिकरो यस्माद् भयेन नश्यति । अत्र विभक्तिव्यत्ययः प्राकृतत्वादेवमन्यत्रापि । सर्वजीवानात्मानमिव रक्षति । मोक्षमार्गं ज्ञानादिकं पृष्टः सन् य आचष्ट इत्यर्थः ॥ ४ ॥

जो जिण-वयणु जहट्ठिउ जाणइ
दव्वु खित्तु कालु वि परियाणइ ।
जो उस्सग्गववाय वि कारइ
उम्मग्गिण जणु जंतउ वारइं[5] ॥ ५ ॥

[यो जिनवचनं यथास्थितं जानाति
द्रव्य-क्षेत्र-कालानपि परिजानाति ।
य उत्सर्गापवादावपि कारयति
उन्मार्गेण जनं यान्तं वारयति ॥ ५ ॥]

यो जिनवचनं यथास्थितं जानाति । द्रव्य-क्षेत्र-कालान् संयमनिर्वाहानिर्वाहहेतूनपि परिजानाति । य उत्सर्गापवादावपि तत्तत्कालापेक्षया शिष्यादिभिः कारयति । उन्मार्गेण लोकप्रवाहेण जनं यान्तं वारयतीत्यर्थः ॥ ५ ॥

अथैतत्प्रसङ्गेनैव लोकप्रवाहसरितो द्रव्यसरितश्च स्पिष्टं स्वरूपमाह—

इह विसमी[6] गुरुगिरिहिं समुट्ठिय
लोयपवाह--सरिय कुपइट्ठिय ।
जसु गुरुपोउ नत्थि सो निज्जइ
तसु पवाहि पडियउ परिखिज्जइ ॥ ६ ॥

---

१ क. जिव । २ ख. ग. अप्पउं । ३ क. °मग्ग । ४ ख. ग. जु । ५ क. वारउ । ६ ख. ग. यथावस्थितं । ७ ख. ग. तत्का° । ८ क. अथ तत्प्र° । ९ क. विससी स गु°।

[इह विषमा गुरुगिरः समुत्थिता
लोकप्रवाहसरित् कुप्रतिष्ठिता ।
यस्य गुरुपोतो नास्ति स नीयते
तस्याः प्रवाहे पतितः परिखिद्यते ॥ ६ ॥]

इह प्रवचने विषमा महानर्थहेतुरपि भवाभिनन्दिजनाभिरुचिततया विपर्यस्तरूपा गुरुगिरः कुगुरुवचनात् समुत्थिता, सिद्धान्तानुक्तमपि सामान्यपञ्चजनानुमतं प्रमाणमिति लोकप्रवाहः स एवानुस्रोतोगमनप्रधानत्वात् सरित् कुप्रतिष्ठिता कुत्सिततया ख्यातिं गता । तया च यस्य गुरुपोतः सद्गुरुप्रवहणं नास्ति स नीयते उह्यते । तस्याः प्रवाहे पूरे पतितः परिखिद्यते । द्रव्यसरित् पुनर्गुरुगिरेः महापर्वतात्, कौ पृथिव्यां प्रतिष्ठिता, गुरुपोतो महत्प्रवहणं, प्रवाहः पूर इत्यर्थः ॥६॥

सा घणजडपरिपूरिय दुत्तर
किव तरंति जे हुंति निरुत्तर ?।
विरला [1]किवि तरंति जि सदुत्तर[3]
ते लहंति सुक्खँइ[4] उत्तरुत्तर ॥ ७ ॥

[सा घनजडपरिपूरिता दुस्तरा
कथं तरन्ति ये भवन्ति निरुत्तराः ? ।
विरलाः केचित् तरन्ति ये सदुत्तराः
ते लभन्ते सौख्यान्युत्तरोत्तराणि ॥[5] ७ ॥]

सा लोकप्रवाहसरिद् घनजडपरिपूरिता प्रभूतमूर्खप्रायजनाकीर्णा दुस्तरा कृच्छ्रप्राप्यपर्यन्ता ता कथं तरन्ति तत्पर्यन्तं प्राप्नुवन्ति ? ये भवन्ति निरुत्तरा विचाराचातुर्येण विशिष्टोत्तरविकलाः । विरलाः केचित् तरन्ति ये सदुत्तराः सुगुरुसम्पर्कादिना विशिष्टोत्तरदानसमर्थाः । ते लभन्ते सौख्यानि उत्तरोत्तराणि प्रधानप्रधानतराणि स्वर्गापवर्गादिलाभेन । द्रव्यसरित्पक्षे तु जडानि जलानि । निरुत्तरास्तथाविधोत्तरणशक्तिवैकल्येन सर्वथोत्तरणासमर्थाः । सदुत्तराः शोभनोत्तरणशक्तिमन्तः । उत्तरोत्तराणि बन्धुसङ्गम-लक्ष्मी-सम्भोगजनितानीत्यर्थः ॥ ७ ॥

तदुत्तरणाय च गुरुप्रवहणं दुर्लभमित्याह—

गुरु-पवहणु निप्पुन्नि न लब्भइ
तिणि पवाहि जणु पडियउ वुब्भइ ।
सा संसार-समुद्दि पइट्ठी
जँहि सुक्खह[4] वत्ता वि पणट्ठी ॥ ८ ॥

---

१ ग. तथा । २ क. किंचि । ३ ख, ग. सुदुत्तर । ४ ख, ग. सुक्खइं । ५ क. जहिं ।

[गुरु–प्रवहणं निष्पुण्यैर्न लभ्यते
तस्मिन् प्रवाहे पतितो जन उह्यते ।
सा संसार–समुद्रे प्रविष्टा
यत्र सौख्यानां वार्ताऽपि प्रणष्टा ॥ ८ ॥]

गुरुप्रवहणं सदाचार्यपोतो निष्पुण्यैर्न लभ्यते । तथा च तस्मिन् लोकप्रवाहे पतितो जन उह्यते । सा सरित् संसारसमुद्रे प्रविष्टा तद्गामिनी यातेत्यर्थः । यत्र सौख्यानां वार्ताऽपि प्रणष्टा । द्रव्यसरित्पक्षे तु गुरुप्रवहणं महापोत इत्यर्थः ॥ ८ ॥

तहिं गय जण कुग्गाहिहिं खज्जहिं
मयर–गरुयदाढग्गिहिं भिज्जहिं ।
अप्पु न मुणहि न परु परियाणहिं
सुखलच्छि सुमिणे वि न माणहिं ॥ ९ ॥

[तत्र गता जनाः कुग्राहैः खाद्यन्ते
मद(क)र–गुरुदंष्ट्राग्रैर्भिद्यन्ते ।
आत्मानं न जानन्ति न परं परिजानन्ति
सुखलक्ष्मीं स्वप्नेऽपि न मानयन्ति ॥ ९ ॥]

तत्र लोकप्रवाहसरिति प्राप्ता जनाः कुग्राहैः कदभिनिवेशैः खाद्यन्ते आत्मायत्ताः क्रियन्ते । कुत इदं यतो मदमहङ्कारं रान्ति स्व–परेभ्यो वितरन्ति मदराः कुगुरवस्तेषां गुरुदंष्ट्राग्रैस्तत्तुल्यकठोरोत्सूत्रवचनैर्भिद्यन्ते वासितहृदयाः क्रियन्ते । तथा चात्मानं दुस्सहसंसारदुःखपतितं परं च कुगुरुं केवलं वञ्चनाप्रवृत्तं न परिजानन्ति । सौख्यलक्ष्मीं स्वर्गादिकां स्वप्नेऽप्यास्तां साक्षान्न मानयन्ति नैवोपभुञ्जते । पक्षान्तरे तु कुग्राहाः कुत्सितजलचरविशेषाः, मकरा अपि प्रसिद्धास्तैर्भिद्यन्ते विदार्यन्ते । तथा च तदवस्था नात्मानं परं वा विदन्ति । मूर्छितत्वेनात्यन्तमूढत्वात् सौख्यलक्ष्मीं स्वजनसम्बन्धसम्भोगादिकामित्यर्थः ॥ ९ ॥

अथ तद्विषयं कस्यापि सत्पुरुषस्य चेष्टितमाह–

गुरु–पवहणु जइ किर कु वि याणइ
परउवयाररसिय मङ्गाणइ ।
ता गयचेयण तें जण पिच्छइ
किंचि सजीउ सो वि तं निच्छइ ॥ १० ॥

---

१ ख. ग. यस्यां । २ ग. ° गुरुय° । ३ ख. ग. °हिं । ४ क. भज्जहिं । ५ ख. ग. केवलं° ६ क. जे ।

[गुरु–प्रवहणं यदि किल कोऽप्यानयति
परोपकाररसिकोऽनिच्छया बलात्कारेण ।
तावद् गतचेतनान् तान् जनान् प्रेक्षते
किञ्चित् सजीवः सोऽपि तं नेच्छति ॥ १० ॥]

गुरुप्रवहणं यदि कश्चिद् दयालुस्तदुत्तितारयिषया तत्समीपमानयति किल कोऽपि परोपकाररसिकः सत्पुरुषो 'मड्डाण' इति तदनिच्छया बलात्कारेण । तावदसौ गतचेतनान् नष्टविवेकलोचनान् तान् जनान् प्रेक्षते बहून् कोऽपि । अत्र लिङ्गव्यत्ययः प्राकृतत्वादेवमन्यत्रापि । तेषु सजीवश्चेतनावान् सोऽपि तं गुरुप्रवहणं नेच्छत्यारोढुम् । पक्षान्तरे तु अर्थान्तरं प्रसिद्धमेवेत्यर्थः ॥ १० ॥

कट्ठिण कु वि जइ आरोविज्जइ
तु वि तिण नीसत्तिण रोविज्जइ ।
कच्छ जं दिज्जइ किर रोवंतह
सा असुइहि भरियइ पिच्छंतह ॥ ११ ॥

[कष्टेन कोऽपि यदि आरोप्यते
तथापि तेन निःसत्त्वेन रुद्यते ।
कच्छा या दीयते किल रुदतः
साऽशुच्या म्रियते प्रेक्षमाणस्य ॥ ११ ॥]

परोपकाररसिकेन च कष्टेनारोचमानतया कृच्छ्रेण कोऽपि मूर्छितो यद्यारोप्यते पोते । तथापि तेन आरोप्यमाणेन निःसत्त्वेनाधीरशिरोमणिना कर्त्रा अथवा तेन प्रसिद्धेन निःसत्त्वेन करणेन रुद्यते । युक्तं चैतत् यतः कच्छा या दीयते अरोचमानकच्छाबन्धस्यात एव रुदतः । सा अशुच्या विष्टया म्रियते लिप्यते प्रेक्षमाणस्य कच्छादातुः । अतो युक्तमेव यदारोप्यमाणो रोदितीत्यर्थः ॥ ११ ॥

अथ मूर्छितेष्वेव मध्यादुपकाररसिकेन नरेण दीयमानं वितरणव्यतिक[रं] तस्य च गुरुकर्मत्वेन शक्तिवैकल्यतोऽकरणेन फलाभावप्रतिपादनं च श्लेषेणाह—

धम्मु सु धरणु कु सक्कइ कायरु ?
तहिं गुणु कवणु चडावइ सायरु ? ।
तसु सुहत्थु निव्वाणु किं संधइ ?
मुक्ख किं करइ राहु किं सु विंधइ ? ॥ १२ ॥

---

१ क. अर्थांतरप्र° । २ ख. ग. य । ३ ख. ग. यतो । ४ क. °केन धर्मदानव्यतिकरश्ले° । ५ ख. ग. °मुक्खु । ६ ख. ग. राहु ।

[धर्मं स धर्तुं किं शक्नोति कातरः ?
तत्र गुणं क आरोपयति सादरम् ? ।
तस्य सुखार्थं (सुहस्तो) निर्वाणं किं सन्धत्ते ?
मोक्षं किं करोति राधां किं स विध्यति ? ॥ १२ ॥]

धर्मं शुभानुष्ठानं स कातरपुरुषो धर्तुमात्मनि निवेशयितुं किं शक्नोति ? नैव । तत्र कातरगृहीते धर्म्मे गुणमुत्तरोत्तरवृद्धिलक्षणं क आरोपयति सादरम् ? आरोपयितुः कातरत्वात् । तस्य कातरस्य सुखार्थं निर्वाणमुपचारान्निर्वाणहेत्वनुष्ठानं किं कृपालुरपि सन्धत्ते चेतसि निवेशयति ? नैव । तथा चासौ कृपणः किं मोक्षं कृत्स्नकर्मक्षयलक्षणं करोत्यात्मायत्तं विधत्ते ? नैव । यतोऽसौ राधां सम्यक्चारित्रानुपालनरूपां किं स कातरो विध्यति ? नैव । अयमत्र भावो यो हि कातरो धर्म्मं तत्र गुणं चारोपयितुमसमर्थश्चारित्रानुपालनं च न करोति; स किं मोक्षं कदाचित् साधयति ? नैव । अर्थान्तरपक्षे तु धर्म्मं धनुः, गुणो जीवा, तस्य कातरस्य, सुहस्तः शोभनकरः, निश्चितं बाणं निर्वाणं, मोक्षं प्रक्षेपं, राधां चक्राष्टकोपरि वर्तमानां पाञ्चालिकामित्यर्थः ॥ १२ ॥

कातरवदस्थिरोऽप्ययोग्य इत्याह–

तसु किंव होइ सुनिव्वुइ-संगमु ?
अथिरु जुं जिव किक्काणु तुरंगमु ।
कुप्पहि पडइ न मग्गि विलग्गइ
वायह भरिउ जहिच्छइं वग्गइ ॥ १३ ॥

[तस्य कथं भवति सुनिर्वृति–सङ्गमः
अस्थिरो यो यथा किक्काणतुरङ्गमः ।
कुपथे पतति न मार्गे विलगति
वातेन भृतो यथेच्छं वल्गति ॥ १३ ॥]

तस्य कथं भवति निर्वृतिसङ्गमो योऽस्थिरो मनश्चक्षुरादिचपलः किक्काणतुरङ्गम इव । स हि कायेनैव चपलः, परमास्थिरत्वेन साम्यादुपमानम् । कुपथे लोकप्रवाहलक्षण उन्मार्गे पतति न मार्गे सम्यग्ज्ञानादिरूपे विलगति न सम्बध्यते । वातेन विद्याजनिताहङ्कारोत्कर्षेण भृतो यथेच्छं वल्गति निरर्थकं चेष्टते । किक्काणोऽपि निर्वृतिः सुखमात्रां चणकादिभृतोदरत्वेन प्रबलप्रभञ्जनो वातभृत इत्यर्थः वल्गति उट्टीकेत इत्यर्थः ॥ १३ ॥

---

१ ख. ग. आरोहयति । २ क. °यितुं । ३ ख. ग. वारो° । ४ ग. च करोति । ५ क. किंव । ६ ख. सुमिक्कइ । ७ ख. ग. जु । ८ क जिंव । ९ ख. ग. °च्छइं । १० क. विगलति । ११ क. °मात्रं । १२ क. ° कति ।

खज्जइ सावएहि सुबहुत्तिहिं
भिज्जइ सामएहिं गुरुगत्तिहिं ।
वग्घसंघ[1]–भय पडइ सु खड्डह
पडियउ होइ सु कूडउ हड्डह ॥ १४ ॥

[खाद्यते श्रावकैः सुबहुभि–
र्भिद्यते सामदैः (श्वापदैः) गुरुगात्रैः ।
व्याघ्रसङ्घभयात् पतति स गर्ते
पतितो भवति स कूटोऽस्थ्नाम् ॥ १४ ॥]

कुपथपतितः सन् असावस्थिरः खाद्यते वस्त्रान्नादिग्रहणेनोपभुज्यते श्रावकैः प्रवाहपतितसाध्वनुयायिभिः सुबहुभिः भिद्यते वासितहृदयः क्रियते सामदैः साम ददतीति कोमलपापोपदेशदातृभिर्गुरुगात्रैर्गुरुरिति गात्रं स्वरूपं येषां नामाचार्यस्वरूपैः सांसारिकमहाभयोत्पादकत्वाद् व्याघ्र इव व्याघ्रः सङ्घो निर्गुणदुष्टबहुजनसमूहस्तस्माद् भयं सन्मार्गाप्रवर्तने त्रासस्तेन पतत्यसौ गर्ते नरके उपचारात् । तन्निमित्तनिरन्तरानायतनसेवादौ पतितश्च सन् कूटो राशिर्भवति अस्थ्नां निर्गुणत्वात् कीकसमात्रावशेषो भवति । अर्थान्तरपक्षे तु श्वापदैः श्व–शृगालादिभिः भिद्यते विदार्यते । सामजैर्वनगजैः गुरुगात्रैर्बृहच्छरीरैः व्याघ्रसङ्घाश्चित्रकसमूहः पतितश्च सन् मृतत्वात् कूटो राशिरस्थ्नां भवतीत्यर्थः ॥ १४ ॥

तेण जम्मु इहु नियउ निरत्थउ
नियमत्थइ देविणु पुल्हत्थउ ।
जइ किर तिण कुलि जम्मु वि पाविउ
जाइजुत्तु तु वि गुण न सु दाविउ ॥ १५ ॥

[तेन जन्मेह नीतं निरर्थकं
निजमस्तके दत्त्वा पुल्हत्थकम् ।
यदि किल तेन कुले जन्मापि प्राप्तं
जातियुक्तं तथापि गुणो न स दापितः ॥ १५ ॥]

तेन कातरेणास्थिरेण वा जन्मात्र निरर्थकं नीतं निजमस्तके दत्त्वा पुल्हत्थकं 'अन्तःशुषिरमिलितकरद्वयप्रहारः पुल्हत्थकः' यथा केनापि बलवताऽत्यन्तान्यायपरेण वण्ठेन कस्यचिद् दुर्गतनरादेः पार्श्वान्मस्तके पुल्हत्थकं दत्त्वा तस्मात् लक्ष्म्यादि सर्वथाऽपहृत्य तस्य जन्म निरर्थकं क्रियते । एवमनेनापि कातरादिना

---

१ क. ° सिंघ° । २ क.° गै प्रवर्त्तने त्रासत्येन । ३ ख. मृतसत्कूटो, ग. सन् कूटो । ४ क. पुल्लत्थको ।

सद्धर्म्मप्रवृत्त्यादिविकलेन परमार्थतः स्वमस्तके[1] पुल्हत्थकं दत्त्वा जन्म व्यर्थीक्रियते । यदि किल तेन कातरादिना कुले जन्मापि प्राप्तं जातियुक्तं तथापि गुण उपकारः सद्धर्मलाभादिकः स इति लोकोत्तरो न दापितः दत्तो दर्शितो वेत्यर्थः ॥ १५ ॥

जइ किर वरिससयाउ वि होई[2]
पाउ इक्कु परिसंचइ सोई[2] ।
कह वि सो वि[3] जिणदिक्ख पवज्जइ
तह वि न सावज्जइं[4] परिवज्जइ ॥ १६ ॥

[यदि किल वर्षशतायुरपि भवति
पापमेकं परिसंचिनोति सोऽपि ।
कथमपि सोऽपि जिनदीक्षां प्रपद्यते
तथापि न सावद्यानि परिवर्जयति ॥ १६ ॥]

यदि किल वर्षशतायुर्भवति तथापि पापमेवैकं परिसंचिनोति । सोऽपि कातरादिः कथमपि सद्गुरुसम्पर्कादिना जिनदीक्षां प्रतिपद्यते । तथापि भावविकलत्वान्न सावद्यानि परित्यजतीत्यर्थः ॥ १६ ॥

गज्जइ मुद्धह लोअह अग्गइ
लक्खण तक्क वियारण लग्गइ ।
भणइ जिणागमु सहु वक्खाणउं
तं पि वियारमि[5] जं लुक्काणउं ॥ १७ ॥

[गर्जति मुग्धानां लोकानामग्रे
लक्षण—तर्कविचारणे लगति ।
भणति जिनागमं सर्वं व्याख्यामि
तम(द)पि विचारयामि यल्लौकिकम् ॥ १७ ॥]

गर्जति मुग्धलोकानां पुरतो बृहत्स्वरेण साहङ्कारं स्वगुणोत्कीर्तनं गर्जनं लक्षण—तर्कावश्रुतावपि विचारयितुं प्रवर्तते । अहङ्काराद् भणति च जिनागमं सर्वं व्याख्यामि । अहं तमपि विचारयामि यल्लौकिकं श्रुति--स्मृति—पुराणादिकं शास्त्रमित्यर्थः ॥ १७ ॥

---

१ क. °मस्तकं दत्त्वा । २ ख. ग. °इ । ३ क. सोइ । ४ ख. ग. °ज्जइं । ५ ख. ग. पर सं° । ६ ख. ग. °रिमि ।

अद्धमास चउमासह पारइ
मलु अब्भिंतरु बाहिरि धारइ ।
कहइ उस्सुत्त-उम्मग्गपयाइं
पडिक्कमणय-वंदणयगयाइं ॥ १८ ॥

[अर्धमास-चतुर्मासादिभिः पारयति
मलमाभ्यन्तरं बहिर्धारयति ।
कथयति उत्सूत्रोन्मार्गपदानि
प्रतिक्रमणक-वन्दनकगतानि ॥ १८ ॥]

अर्द्धमास—चतुर्मासादिभिः पारयति । मलमाभ्यन्तरं चित्तकालुष्यलक्षणमिव बहिः शरीरे धारयतीत्युत्प्रेक्षा । कथयति लोकेभ्य उत्सूत्रोन्मार्गपदानि प्रतिक्रमणक—वन्दनकगतानि । तथाहि प्रतिक्रमणं न कर्तव्यमेव श्रावकैः, साध्वादिभिरपि क्षेत्रदेवतादिकायोत्सर्गः प्रतिक्रमणे न कार्यः । पर्यन्ते च स्तुतित्रयानन्तरं शक्रस्तवपाठोऽप्ययुक्त इत्यादीनि । ऊर्ध्वस्थिता एव च साध्व्यो द्वादशावर्तवन्दनं ददतीत्यादीनीत्यर्थः ॥ १८ ॥

परं न मुणइ तयत्थु जो अच्छइ
लोयपवाहि पडिउ सु वि गच्छइ ।
जइ गीयत्थु को वि तं वारइ
ता तं उट्ठिवि लउडइ मारइ ॥ १९ ॥

[परं न जानाति तदर्थो य आस्ते
लोकप्रवाहे पतितः सोऽपि गच्छति ।
यदि गीतार्थः कोऽपि तं वारयति
तदा तमुत्थाय लगुडेन मारयति ॥ १९ ॥]

परं न जानाति तदर्थः प्रतिक्रमणादिविधिसूत्रार्थः " समणेण सावएण य " इत्याद्यनुयोगद्वारोक्तो यस्तिष्ठति । तत्र हि वस्त्रोर्ध्वं कायोर्द्ध्वं च प्रत्युपेक्षा कर्तव्येति पाठे दशिकापर्यन्ते वस्त्रं गृहीत्वा ऊर्ध्वस्थितैश्च प्रत्युपेक्षा क्रियते इत्यज्ञानाद् व्याचक्षते । तत्र चोक्तं गीतार्थैः—

" वत्थे काउड्ढम्मी परवयणठि (वि)उ गहाय दसियंते ।

(१) श्रमणेन श्रावकेन च । (२) वस्त्रे कायोर्ध्वं परवचनस्थितो (विद्) गृहीत्वा दशिकान्ते

१ क. मल । २ क.° तरू । ३ ख. ग. उमग्ग । ४ ख. ग. पडिकम° । ५ क.° देवताका° ६ क.° रं स्त°, ख.° रं शक्रस्तवस्तव° । ७ ग. परं । ८ ख. ग. गीयत्थ । ९ क. उट्ठवि । १० क वस्त्रोर्द्ध च । ११ ख. ग. क्षा या कि° ।

तं न भवइ उक्कुडुओ तिरियं पेहे जह विलत्तो ॥

अत्र हि वंस्रोर्ध्वं तिर्यगिति कायोर्ध्वं चोत्कटिकासनस्थ इत्यर्थो वर्तते। तमबुद्धा साध्वीनामूर्ध्वस्थितानामेव वन्दनं दापयन्ति । एवं च सति परमार्थतः सोऽपि मलादिधारको लोकप्रवाहपतित एव गच्छति। यदि कश्चिद् गीतार्थस्तं वारयति असत्प्रवृत्तेस्तदाऽसौ निर्विवेकत्वादत्यन्तं कोपाविष्टस्तं लगुडेन प्रहरतीत्यर्थः ॥ १९ ॥

अथ तस्य गीतार्थानां च चेष्टितमाह—

धम्मिय जणु सत्थेण वियारइ
सु वि ते धम्मिय सत्थि वियारइ ।
तव्विहलोइहि सो परियैरियउ
तउ गीयत्थिहि सो परिहरियउ ॥ २० ॥

[धार्मिको जनः शास्त्रेण विचारयति
सोऽपि तान् धार्मिकान् शस्त्रेण विदारयति ।
तद्विधलोकैः स परिकरितः
ततो गीतार्थैः स परिहृतः ॥ २० ॥]

धार्मिको जनस्तं मलधारिणमुत्सूत्रादिप्रवृत्तं शास्त्रेण तन्निराकारकग्रन्थेन विचारयति अयुक्तत्वेन ख्यापयति। सोऽपि तान् धार्मिकान् शस्त्रेण कोपवशाद् विदारयति । तद्विधलोकैस्तत्सदृशप्रवाहपतितजनैरसौ परिकरितोऽङ्गीकृतः। ततो गीतार्थैः स दूरेण वर्जित इत्यर्थः ॥ २० ॥

जो गीयत्थु सु करइ न मच्छरु
सु वि जीवंतुं न मिल्लइ मच्छरु ।
सुद्धइ धम्मि जु लग्गइ विरलउ
संघि सु वज्झु कहिज्जइ जवलउ ॥ २१ ॥

[यो गीतार्थः स करोति न मत्सरं
सोऽपि जीवन् न मुञ्चति मत्सरम् ।
शुद्धे धर्मे यो लगति विरलः
सङ्घेन स बाह्यः कथ्यते युतकः ॥ २१ ॥]

तद् न भवत्युत्कटकस्तिर्यक् प्रेक्षेत यथा विरक्तः ॥

---

१ क वस्रोर्ध । २ क.° यरिउ । ३ क. तं निरा° । ४ क. जीविंतु । ५ क. वसु ।

तथा यो गीतार्थः स न करोति मत्सरम्। स च मलिनो जीवन् यावज्जीवं न मुञ्चति गीतार्थेषु मत्सरम् । एवं तावत् कातरास्थिरमलधारकादयः प्रभूताः। शुद्धे च धर्मे प्रतिस्रोतोरूपे यः कश्चिल्लगति विरलः, सङ्घेन प्रवाहपतितजनसमूहेन स शुद्धधर्मलग्नो बाह्यः कथ्यते युतकश्चाण्डालादिवद् भिन्न इत्यर्थः ॥ २१ ॥

पइ पइ पाणिउ तसु वाहिज्जइ
उवसमि थक्कु सो वि वाहिज्जइ ।
तस्सावयं सावय जिव लग्गहिं
धम्मियलोयह च्छिड्डइ मग्गहिं ॥ २२ ॥

[पदे पदे पानीयं (छिद्रं) तस्य गवेष्यते
उपशमे स्थितः सोऽपि बाध्यते ।
तच्छ्रावकाः श्वापदा इव लगन्ति
धार्मिकलोकस्य छिद्राणि मार्गयन्ति ॥ २२ ॥]

पदे पदे पानीयं देशविशेषभाषया छिद्रं तस्य शुद्धमार्गलग्नस्य गवेष्यते उपशमेऽवस्थितोऽसावपि दुःसङ्घेन बाध्यते। तच्छ्रावका दुःसङ्घश्रावकाः श्वापदा इव लगन्ति विनाशाय सम्बध्यन्ते । स्वभावत एव च ते धार्मिकलोकस्य छिद्राणि मार्गयन्ति । अयमपि च धार्मिक इत्यर्थः ॥ २२ ॥

अथ तच्छ्रावकाणामेवाविधिकारिणां चेष्टितमाह--

विहिचेईहरि अविहिकरेवइ
करहि उवाय वहुत्ति ति लेवइ ।
जइ विहिजिणहरि अविहि पयट्टइं
ता घिउं सत्तुयमज्झि पलुट्टइ ॥ २३ ॥

[विधिचैत्यगृहेऽविधिकरणे
कुर्वन्त्युपायान् बहूंस्ते तद्ग्रहणे ।
यदि विधिजिनगृहेऽविधिः प्रवर्तते
तदा घृतं सक्तुमध्ये प्रलुठति ॥ २३ ॥]

विधिचैत्यगृहे मत्सरवशादविधिकरणे कुर्वन्त्युपायान् बहून् ते तच्छ्रावका ग्रहणे विधिचैत्यस्य । किमित्येषामाविधिकरणे आग्रहः ? अत आह यदि विधिजिनगृहे

---

१ क. शुद्धे ध° । २ ख. ग. °वए । ३ क. लग्गहि । ४ ख. °मार्गे ल°, ग. °धर्मे ल° । ५ ख. पयमज्झि पलुट्टइ । ६ क. घियउ । ७ क. °करण ।

अविधिर्निशिस्नानादिकः प्रवर्तते तदा घृतं सक्तुषु प्रलुठति तद्वत् समीहितं समीहितेन संयुज्यते इति तेषां भाव इत्यर्थः ॥ २३ ॥

अथ तत्प्रार्थनया नृपतिचेष्टितमाह—

जइ किर नरवइ कि वि दूसमवस
ताहि[1] वि अप्पहि विहिचेइय दस ।
तह वि न धम्मिय विहि विणु झगडहि
जइ ते सव्वि वि उट्ठहि[2] लगुडिहि ॥ २४ ॥

[यदि किल नरपतयः केऽपि दुःषमावशात्
तेषामप्यर्पयन्ति विधिचैत्यानि दश ।
तथापि न धार्मिका विधिं विना कलहायन्ते
यदि ते सर्वेऽप्युत्तिष्ठन्ते लगुडैः ॥ २४ ॥]

यदि किल केऽपि नृपतयः केचन निर्विवेकिनो लुब्धा दुःख(ष)मावशाद् दुष्टकालमाहात्म्याल्लोभाभिभूतास्तेषामप्यविधिकारिणामर्प्पयन्ति पूजनाय विधिचैत्यानि 'दशेति यमकानुरोधेन तेन त्रीणि चत्वारि वेति द्रष्टव्यम्' । तथापि विधिचैत्यापहारेऽपि धार्मिका विधिं विना युक्तिमन्तरेण न तैः सह कलहायन्ते । यदि ते विपक्षाः सर्वेऽप्युत्तिष्ठन्ते लगुडैः प्रहर्तुमित्यर्थः ॥ २४ ॥

नन्वेवं सति तेषां विधिचैत्यसंघट्टनं[3] कथं भविष्यतीत्याह—

निच्चु वि सुगुरु-देवपयभत्तह
पणपरमिट्ठि सरंतह संतह ।
सासणसुर पसन्न[4] ते भव्वइं[5]
धम्मिय कज्ज पसाहहिं[6] सव्वइं ॥ २५ ॥

[नित्यमपि सुगुरु-देवपदभक्तानां
पञ्चपरमेष्ठिनः स्मरतां सताम् ।
शासनसुराः प्रसन्नास्ते भव्यानि
धार्मिककार्याणि प्रसाधयन्ति सर्वाणि ॥ २५ ॥]

नित्यमपि सुगुरु-देवपदभक्तानां पञ्चपरमेष्ठिमन्त्रं स्मरतां सतां शासनसुराः स्वयमेव प्रसन्ना भवन्ति । ते च भव्यानि मनोऽभीष्टानि धार्मिककार्याणि विधिचैत्यलाभादीनि सर्वाणि साधयन्तीत्यर्थः ॥ २५ ॥

---

१ क. ताहि विहि° । २ क. उट्ठिहि । ३ क. संघटनं । ४ ख. ग. पस्सन्न । ५ क. भव्वइ । ६ ख. ग. पलाहहिं ।

धम्मिउ धम्मुकज्जु साहंतउ
परु मारइ कीवइ जुज्झंतउ ।
तु वि तसु धम्मु अत्थि न हु नासइ
परमपइं निवसइ सो सासइ ॥ २६ ॥

[धार्मिको धर्मकार्यं साधयन्
परं मारयति कथमपि युध्यमानः ।
तथापि तस्य धर्मोऽस्ति न खलु नश्यति
परमपदे निवसति स शाश्वते ॥ २६ ॥]

धार्मिको धर्म्मकार्यं विधिचैत्यग्रहणादिकं साधयन् सन् कदाचित् परं विपक्षं तदुपघाताय प्रवृत्तं कथमपि मर्मप्रहारादिना व्यापादयति युध्यमानस्तेन सह तथापि तस्य निश्चयनयेन धर्मोऽस्त्येव केवलविधिप्रवर्त्तनाय विधिचैत्यग्रहणप्रवृत्तेः । न तु नैव तद्व्यापादनेन धर्मो नश्यति । तथा च क्रमेण परमपदे मोक्षे निवसति स शाश्वते । अयमत्र भावार्थः--धार्मिकः केवलविधिविधानलालसः सन् अविधिं सर्वथाऽसहमानोऽविधिकारकान् "[1]जिणपवयणस्स अहियं सव्वत्थामेण वारेइ' त्ति सिद्धान्तवचनानुस्मरणेन यथा तथा निवारयन् कदाचित् परं हन्यादपि तथाप्यत्यन्तशुद्धमनस्कत्वात् शुद्धचारित्रपरिपालनप्रवृत्तसहसाकारनिपातितद्वीन्द्रियादिमहामुनिवन्निष्पाप एव । तथा चोच्यते-

"[2]उच्चालियंम्मि पाए इरियासमियस्स संकमट्ठाए ।
वावज्जिज्ज कुलिंगी मरिज्ज तं योगमासज्ज ॥
न य तस्स तन्निमित्तो बंधो सुहुमो वि देसिओ समए ।
अणवज्जोहपओगेण सव्वभावेण सो जम्हा ॥" इत्यर्थः ॥२६ ॥

सावय विहिधम्महं अहिगारिय
जिज्ज न हुंति दीहसंसारिय ।
अविहि करिंति न सुहगुरुवारिय
जिणसंबंधिय धरहि न दारिय ॥ २७ ॥

---

(१) जिनप्रवचनस्याहितं सर्वस्थाम्ना वारयेत् इति ।
(२) उच्चालिते पादे ईर्यासमितस्य सङ्क्रमार्थम् ।
व्यापद्येत कुलिङ्गी म्रियेत तं योगमासाद्य ॥
न च तस्य तन्निमित्तो बन्धः सूक्ष्मोऽपि देशितः समये ।
अनवद्योघप्रयोगेण सर्वभावेन स यस्मात् ॥

---

१ ख. ग. धाम्मिय । २ क.° प्पइ । ३ ख. ग.° ग्रहः । ४ क.° ग्रहणाप्रं° । ५ क. उच्चलयमि । ६ ख. ग.°ज्जोय° ।

[श्रावका विधिधर्मस्याधिकारिणो
य एव न भवन्ति दीर्घसंसारिणः ।
अविधिं कुर्वन्ति न शुभगुरुवारिता
जिनसम्बन्धिनीं धारयन्ति न दारिकाम् ॥ २७ ॥]

श्रावका विधिधर्माधिकारिणस्त एव ये न भवन्ति महानर्थहेत्वकार्यनिवृत्तिव्यङ्ग्यशुद्धचित्तत्वेन दीर्घसंसारिणः । अविधिं जिनभवने भोजन-शयनादिरूपं[1] नैव कुर्वन्ति शुभगुरुवारिताः । इदं च पदमुत्तरत्रापि सर्वत्र योज्यम् । तथा जिनसम्बन्धिनीं तत्परिग्रहस्थितां वेश्यां न धारयन्ति, तस्याः सर्वदा पापप्रपारूपत्वादित्यर्थः ॥ २७ ॥

अथ विधिमेवाह—

**जइ किर फुल्लइं[2] लब्भइ मुल्लिण
तो वाडिय न करंहि[3] सहु कूविण ।
थावर घर-हट्टइ न करावहि
जिणधणु संगहुं[4] करि न वड्ढारहि ॥ २८ ॥**

[यदि किल पुष्पाणि लभ्यन्ते मूल्येन
तदा वाटिकां न कुर्वन्ति सह कूपेन ।
स्थावराणि गृह-हट्टादीनि न कारयन्ति
जिनधनं सङ्ग्रहं कृत्वा न वर्धयन्ति ॥ २८ ॥]

यदि किल पुष्पाणि मूल्येन लभ्यन्ते तदा वाटिकां न कुर्वन्ति सह कूपेन स्थावराणि स्थिरतराणि देवसत्कतया देवद्रव्येणैव गृह-हट्टादीनि न कारयन्ति[7] । जिनस्य धनं गणिम-धरिम-मेय-पारिच्छेद्यादिरूपं तद्द्रव्येण संगृह्य न वर्धयन्ति जिनस्य (!) ॥ २८ ॥

**जइ किर कु वि मरंतु घर-हट्टइ
देइ त लिज्जहिं[8] लहणावट्टइं[9] ।
अह कु वि भत्तिहि देइ त लिज्जहि
तब्भाडइं[10] धाणि जिण पूइज्जहि ॥ २९ ॥**

[यदि किल कोऽपि म्रियमाणो गृह-हट्टं
ददाति तदा गृह्यते लभ्यानुसारेण ।

---

१ ख. ग. °व्यंग° । २ क. °शयनरूपं । ३ क. सर्वत्रापि । ४ ख. ग. ° हिं । ५ क. करहिं । ६ क. संगहु उ । ७ क. कारयन्तीत्यर्थः । ८ ख. ग लिज्जहिं । ९ ख. ग. °वट्टइ । १० ख. ग. तब्भाडइ° ।

अथ कोऽपि भक्त्या ददाति तदा गृह्यते
तद्भाटकधनेन जिनाः पूज्यन्ते ॥ २९ ॥]

यदि किल कश्चिद् देवद्रव्याधमर्ण ऋणमोक्षाय म्रियमाणः सन् वस्त्वन्तराभावेन गृहं हट्टं वा जिनाय ददाति, तदा गृह्यते लभ्यद्रव्यानुसारेण । अथ कश्चिद् भक्त्या ददाति, तदापि गृह्यते । तस्य गृहादेर्भाटकधनेन जिनाः पूज्यन्ते इति विधिः । शेषस्तु पूर्वोक्तः स्थावरविधानादिरविधिरेवेत्यर्थः ॥ २९ ॥

दिंतं[1] न सावय ते वारिज्जहिं
धम्मिकाज्जि ते उच्छाहिज्जहिं ।
घरं[2]वावारु सव्वु जिव मिल्लहिं
जिव न कसाइं[3]हिं ते पिल्लिज्जहिं ॥ ३० ॥

[ददतो न श्रावकास्ते वार्यन्ते
धर्मकार्ये ते उत्साह्यन्ते ।
गृहव्यापारं सर्वं यथा मुञ्चन्ति
यथा न कषायैस्ते पीड्यन्ते ॥ ३० ॥

ददतो गृह-हट्टादीन् ते श्रावका न वार्यन्ते, प्रत्युत धर्मकार्ये देवद्रव्यऋणविशोधने उत्साह्यन्ते । तथा तदानप्रवृत्ताः सन्तो गृहव्यापारं सर्वं वृत्तिव्यवच्छेदकारिव्यवहारं मुक्त्वा यथा मुञ्चन्ति । यथा च कषायैः क्रोध-लोभादिभिस्ते न पीड्यन्त इत्यर्थः ॥ ३० ॥

किञ्च--

तिव तिव धम्मु कहिंति[4] सयाणा
जिव ते मरिवि हुंति सुरराणा ।
चित्तासोय करंत[5] ट्ठाहिय
जण तहिं कय हवंति नट्ठाहिय ॥ ३१ ॥

[तथा तथा धर्मं कथयन्ति शिष्टा
यथा ते मृत्वा भवन्ति सुरराजाः ।
चैत्राश्विनयोः कुर्वन्त्यष्टाह्निका
जनास्तत्र कृता[ष्टाह्निका] भवन्ति नष्टाहिताः ॥ ३१ ॥]

तथा तथा धर्मं कथयन्ति शिष्टाः सुश्रावकास्तेषां यथा तत्प्रभावेन मृत्वा ते भवन्ति सुरनायकाः । तथा चैत्राश्विनयोः कुर्वन्त्यष्टाह्निकाः शाश्वतयात्राः । यत्तु चतुर्मासक-पर्युषणादिष्वष्टाह्निकाप्ररूपणं तन्न गीतार्थगुरुसम्मतम् । तत्र हि प्रकृष्ट-

१ क. दिंति । २ क. घरु । ३ ख. ग. कसाइहि । ४ ख. ग. कहंति । ५ ख ग. सयणो । ६ ख. ग.° ट्ठाहिकाः ।

पूजामात्रस्याष्टाह्निकाशब्देन विवक्षितत्वात्। न च तदष्टाह्निकाशब्दाभिधेयं न भवतीति वाच्यम्, तस्य षष्ठाङ्गविवरणे अभयदेवसूरिभिस्तथा वर्णनात् । जनाः श्रावकलोकास्तत्र चैत्रादौ 'कृतेति पदैकदेशे पदसमुदायोपचारात्' कृताष्टाह्निका भवन्ति नष्टाह्निता ध्वस्ताधयो वा इत्यर्थः ॥ ३१ ॥

अथागमिकं प्रकारान्तरमप्याह—

जिव कल्लाणयपुट्ठिहि किज्जहिं
तिव करिंति सावय जहसत्तिहिं ।
जा लहुडी सा नच्चाविज्जइ
वड्डी सुगुरु-वयणि आणिज्जइ ॥ ३२ ॥

[यथा कल्याणकपृष्ठे क्रियन्ते
तथा कुर्वन्ति श्रावका यथाशक्त्या ।
या लघ्वी सा नर्त्यते
बृहती सुगुरुवचनेनानीयते ॥ ३२ ॥]

यथा जन्मकल्याणादिपृष्ठे क्रियन्ते देवेन्द्रादिभिः किल । कृतकल्याणकमहोत्सवा नन्दीश्वरे देवेन्द्रादयोऽष्टाह्निकामहिमाः कुर्वन्ति । तद् यदि तदनुसारेण श्रावका अप्यत्यन्तमृद्धिमन्तः क्वचित् कल्याणकानन्तरमष्टाह्निका आरभन्ते तदा न दोषः । तथा कुर्वन्ति श्रावका यथासामर्थ्यं तथा विधिपरैः श्रावकैर्लघ्वी नर्तकी सा विधिचैत्ये नर्तनं कार्यते निर्विकारत्वात् । याऽपि बृहती सा सुगुरुवचनेनैव नर्त्तनायानीयते । अयमत्राशयः—यद्यपि तरुणविदग्धरूपवतीनर्त्तकीनर्त्तने प्रेक्षणकं सातिशयशोभं भवति; तथापि प्रतिदिनं तदागमने तरुणश्रावकपुत्रादीनां तस्या जिनद्रव्यदानादौ चित्तविश्लेषो भवति । तन्निमित्तं च क्रमेण देवगृहत्यागादिना धर्मादपि प्रतिपातो भवतीति विमृश्य गीतार्थैरागमानिषिद्धमपि सर्वदा तदागमनं न्यषेधि । कदाचित् तु देवगृहादिप्रतिष्ठायां जलानयनादिमहोत्सवे सातिशयप्रेक्षणकादिनिर्वाहाय सा आकारयितुमिष्यते श्रावकैः, परं बहुतरदोषदृष्ट्या गुरुभिरत्यन्तं निषेधे गुर्वाज्ञामन्तरेण न ते तामाह्वातुं प्रभवन्ति, अत्यन्ताज्ञापरत्वात् । ततस्तादृशे प्रस्तावे गुरुमापृच्छ्यानयन्तीत्यभिप्रायेण 'वड्डी सुगुरुवयणेण' इत्यादि अभिधीयते । ततोऽहो! युगप्रधानानां निर्विकारं वचनमित्याद्युपहासः केषाञ्चिद् दुर्विदग्धानां सर्वथा नावकाशं लभत इत्यर्थः ॥ ३२ ॥

---

१ ख. ग.° णपुढिहिं । २ क. तथा । ३ क.° पि तदपि । ४ क.° दानादानादौ । ५ क. वा । ६ ख. ग.° प्रेक्षणादि° । ७ क.° रत्यंतनि° । ८ ख. ग.° नंतरेण । ९ क. इत्यायभि° ।

जोव्वणत्थ जा नच्चइ दारी
सा लग्गइ सावयह वियारी ।
तिहिं[1] निमित्तु सावयसुय फट्टहिं
जंतिहिं दिवसिहिं धम्मह फिट्टहिं ॥ ३३ ॥

[यौवनस्था या नृत्यति दारा
सा लगति श्रावकान् विप्रतारयितुम् ।
तस्या निमित्तं श्रावकसुता विश्लिष्यन्ति
यातेषु दिवसेषु धर्माद् भ्रश्यन्ति ॥ ३३ ॥]

यतो यौवनस्था वेश्या या प्रतिदिनं नृत्यति साऽत्यन्तपरिचयात् प्रवर्त्तते श्रावकान् तरुणान् विप्रतारयितुम् । धर्म्माध्यवसायात् कामाध्यवसायप्रवर्त्तकत्वं विप्रतारणम् । तस्या निमित्तं श्रावकसुताः परस्परतो विश्लिष्टचित्ता भवन्ति । गच्छद्भिश्च दिनैरत्यन्तविरोधेन धर्मादपि भ्रश्यन्तीत्यर्थः ॥ ३३ ॥

बहुय लोय रायंध स पिच्छहिं[2]
जिणमुह-पंकउ विरला वंछहिं[3] ।
जणु जिणभवणि[4] सुहत्थु जु आयउ
मरइ सु तिक्खकडक्खिहिं[5] घायउ ॥ ३४ ॥

[बहवो लोका रागान्धास्तां प्रेक्षन्ते
जिनमुखपङ्कजं विरला वाञ्छन्ति ।
जनो जिनभवने सुखार्थं य आगतो
म्रियते स तीक्ष्णकटाक्षैर्घातितः ॥ ३४ ॥]

बहवो लोका रागान्धास्तामेव प्रेक्षन्ते । जिनमुखपङ्कजं विरला वाञ्छन्ति द्रष्टुम् । तथा च जिनभवने सुखार्थं सर्वथोपशान्तचित्तत्वेनाह्लादमनुभवितुं य आगतः स म्रियते दुःखातिशयमनुभवति तत्तीक्ष्णकटाक्षैः[6] प्रहत इत्यर्थः ॥ ३४ ॥

राग विरुद्धा नवि गाइज्जहिं
हियइ धरंतिहि जिणगुण गिज्जहिं ।

---

१ क. तहि । २ ख. ग. पिच्छहिं । ३ ख. ग. वंछहिं । ४ ख. ग. °भवण । ५ क. कडक्खहिं । ६ ख. ग. °क्षैर्हत ।

पाड वि न हु अजुत्त वाइज्जहिं
लइवुडिडउंडि–पमुह वारिज्जहिं ॥ ३५ ॥

[रागा विरुद्धा नैव गीयन्ते ।
हृदये धारयद्भिर्जिनगुणा गीयन्ते ।
पाटा अपि नैवायुक्ता वाद्यन्ते
लइवुडिडउंडिप्रमुखा वार्यन्ते ॥ ३५ ॥]

रागा भैरव–मेघरागादयोऽत्यन्तशोकाविर्भावकत्वेन विरुद्धा नैव गीयन्ते । हृदये जिनगुणानेव धारयद्भिर्जिनानामेव गुणा गीयन्ते, न त्वन्येषाम् । पाटा अपि पाणविकादिप्रसिद्धा नैवायुक्ता मरणाद्यवस्थासूचका वाद्यन्ते । तानेवाह–लइवुडिडउंडिप्रभृतयः । पाटास्तत्प्रसिद्धा एव वार्यन्तेऽत्यन्तं श्रुतिकटुकत्वादित्यर्थः ॥ ३५ ॥

उचिय थुत्ति–थुयपाढ पढिज्जहिं
जे सिद्धंतिहिं सहु संधिज्जहिं ।
तालारासु वि दिंति न रयणिहिं
दिवसि वि[1] लउडारसु सहुं पुरिसिहिं ॥ ३६ ॥

[उचिताः स्तुति–स्तोत्रपाठाः पठ्यन्ते
ये सिद्धान्तेन सह सन्धीयन्ते ।
तालारासकमपि ददति न रजन्यां
दिवसेऽपि लगुडरासं सह पुरुषैः ॥ ३६ ॥

उचितानि स्तुति–स्तोत्राणि देवाग्रे पठ्यन्ते, यानि सिद्धान्तेन सह सन्धीयन्ते, न पुनरुत्सूत्राणि । तालारासकमपि न ददति श्राद्धा रजन्यां प्रदीपोद्योतेऽपि । तदानीमदृश्यसूक्ष्मपिपीलिकादिध्वंसहेतुत्वात् । दिवसेऽपि लगुडरासं पुरुषैरप्यास्तां योषिद्भिः तस्यात्यन्तविटचेष्टारूपत्वात्, कदाचित् प्रमादवशान्मस्तकाद्याघातहेतुत्वात्, दुष्टपाठादिवत्त्वाच्चेत्यर्थः ॥ ३६ ॥

धम्मिय नाडय पर नच्चिज्जहिं
भरह–सगरनिक्खमण कहिज्जहिं ।
चक्कवट्टि–बल–रायह चरियइं
नच्चिवि अंति हुंति पव्वइयइं ॥ ३७ ॥

---

१ क. च । २ ख. ग. रस । ३ ख. ग. डारसं । ४ ख. ग. नच्चिय अंत ।

[धार्मिकानि नाटकानि परं नृत्यन्ते
भरत–सगरनिष्क्रमणानि कथ्यन्ते ।
चक्रवर्ति–बलराजस्य चरितानि
नर्तित्वाऽन्ते भवन्ति प्रव्रजितानि ॥ ३७ ॥]

धार्मिकान्येव परं नाटकानि नृत्यन्ते, न तु राम–रावणादिसम्बन्धीनि येषु नाटकेषु भरत–सगरनिष्क्रमणानि कथ्यन्ते । अन्यान्यपि चक्रवर्ति–बलदेव–दशार्णभद्रादिचरितानि च । किं बहुना ? यत्र तानि नर्तित्वा पर्यन्ते प्रव्रज्यादिहेतुः संवेगवासना जायते तन्नर्त्तनीयमित्यर्थः ॥ ३७ ॥

हास खिड्ड हुड्ड वि वज्जिज्जहिं
सहु पुरिसेहि वि केलि न किज्जहिं ।
रत्तिहिं जुवइपवेसु निवारहिं
न्हवणु नंदि न पइट्ठ कारवहिं ॥ ३८ ॥

[हास्य–क्रीडा–हुड्डा अपि वर्ज्यन्ते
सह पुरुषैरपि केलिर्न क्रियते ।
रात्रौ युवतिप्रवेशं निवारयन्ति
स्नपनं नन्दिं न प्रतिष्ठां कारयन्ति ॥ ३८ ॥]

हास्य–क्रीडा–हुड्डा अपि वर्ज्यन्ते चैत्ये । सह पुरुषैरपि चसूरिर्न क्रियते । रात्रौ युवतिप्रवेशं निवारयन्ति सुश्राद्धाः, स्नपनं नन्दिं प्रतिष्ठां च न कारयन्ति । आचार्यादिभिस्तदानीं तदागमनस्यागमनिषिद्धत्वात् तेजस्कायिकादिध्वंसहेतुत्वाच्चेत्यर्थः ॥ ३८ ॥

माहमाल–जलकीलंदोलय
ति वि अजुत्त न करंति गुणालय ।
बलि अत्थमियइ दिणयरि न धरहिं
घरकज्जइं पुण जिणहरि न करहिं ॥ ३९ ॥

[माघमाला–जलक्रीडाऽऽन्दोलनं
तदप्ययुक्तं न कुर्वन्ति गुणालयाः ।
बलिमस्तमिते दिनकरे न धारयन्ति
गृहकार्याणि पुनर्जिनगृहे न कुर्वन्ति ॥ ३९ ॥]

---

१ ख. ग. रिहि ।

माघमाला–जलक्रीडा–देवतान्दोलनं च ता अप्यागमानुक्तत्वात् खिड्ग-क्रीडाप्रायत्वेन चायुक्तत्वान्न कुर्वन्ति गुणालयाः । बलिं पक्वान्नादिरूपमस्तमिते दिनकरे न धारयन्ति । रात्रौ चतुर्विधस्याप्याहारस्य तद्वर्ण्ण–तद्रस–जीवसंसक्ति-मत्त्वेनागमाभिहिततयाऽत्यन्तजुगुप्सितत्वात् । गृहकार्याणि लेखक–वाणिज्य–झगटकादीनि जिनगृहे न कुर्वन्तीत्यर्थः ॥ ३९ ॥

चैत्यसम्बन्धी विधिरुक्तोऽथ विशिष्टाचार्यस्वरूपं व्यवहारं चाह—

सूरि ति विहिजिणहरि वक्खाणहि
तहिं जे अविहि उस्सुत्तु न आणहिं ।
नंदि–पइट्ठह ते अहिगारिय
सूरि वि जे तदवरि ते वारिय ॥ ४० ॥

[सूरयस्ते विधिजिनगृहे व्याख्यानयन्ति
तत्र येऽविध्युत्सूत्रं नानयन्ति ।
नन्दि–प्रतिष्ठयोस्तेऽधिकारिणः
सूरयोऽपि ये तदपरे ते वारिताः ॥ ४० ॥]

सूरयस्त एव विधिजिनगृहे व्याख्यानं कुर्व्वन्ति ये तत्राविधिमुत्सूत्रं वा न किञ्चिदानयन्ति उपदर्शयन्ति । नन्दि–प्रतिष्ठयोरपि त एवाधिकारिणः । सूरयोऽपि ये तदपरे ते निवारिता उत्सूत्रादिप्रवर्त्तकत्वादित्यर्थः ॥ ४० ॥

एगु जुगप्पहाणु गुरु मन्नहिं
जो जिण गणिगुरु पवयणि वन्नहिं ।
तासु सीसि गुणसिंगु समुट्ठइ
पवयणु–कज्जु जु साहइ लट्ठइ ॥ ४१ ॥

[एकं युगप्रधानं गुरुं मन्यन्ते
यं जिना गणिगुरुं प्रवचने वर्णयन्ति ।
तस्य शीर्षे गुणशृङ्गं समुत्तिष्ठते
प्रवचनकार्याणि यः साधयति लष्टानि ॥ ४१ ॥]

एकस्मिन् काले एकमेव युगप्रधानं मन्यन्ते सुश्राद्धाः, न बहून् । यं जिना गणिगुरुं समस्ताचार्यश्रेष्ठं प्रवचने सिद्धान्ते वर्णयन्ति । इतरेभ्यस्तस्य को विशेष इत्याह–तस्य युगप्रधानस्य शीर्षे गुणशृङ्गं गुणोच्छ्रयरूपं समुत्तिष्ठते शेषेभ्यः सर्वैरपि गुणैरुत्कृष्यत इत्यर्थः । प्रवचनकार्याणि विशिष्टप्रभावनाऽऽदीनि यः साधयति लष्टानि प्रधानानीत्यर्थः ॥ ४१ ॥

सो छउमत्थु वि जाणइ सव्वइ
जिण-गुरु-समइपसाइण भव्वइ ।
चलइ न पाइण तेण जु दिट्ठउ
जं जि निकाइउ त परि विणट्ठउ ॥ ४२ ॥

[स च्छद्मस्थोऽपि जानाति सर्वं
जिन-गुरु-समयप्रसादेन भव्यम् ।
चलति न प्रायेण तेन यद् दृष्टं
यत् पुनर्निकाचितं तत् पुनर्विनष्टम् ॥ ४२ ॥]

स युगप्रधानश्छद्मस्थोऽपि जानाति सर्वम्, एतत् कालानुसारि ज्ञेयम् । केनेत्याह-जिन-गुरु-सिद्धान्तप्रसादेन भव्यं यथावस्थितं नैसर्गिक-सातिशयप्रज्ञावत्त्वात् सिद्धान्तपारगतत्वाच्च, तथा च न चलति न विघटते प्रायेण यत् तेन दृष्टं सम्यक् श्रुतज्ञानप्रदीपेनावलोकितं भविष्यत्त्वेन क्वचिद् दृष्टमपि यत् पुनर्निकाचितमवश्यमनन्यथा भावि तत् पुनर्विनश्यतीत्यर्थः ॥ ४२ ॥

जिणपवयणभत्तउ जो सक्कु वि तसु
पयचिंत करइ बहु व]क्कं[1] वि जसु ।
न कसाईहिं[2] मणु पीडिज्जइ
तेण सु देविहि वि ईडिज्जइ ॥ ४३ ॥

[जिनप्रवचनभक्तो यः शक्रोऽपि तस्य
पदचिन्तां करोति बहुव्यग्रोऽपि यस्य ।
न कषायैर्मनः पीड्यते
तेनासौ देवैरपीड्यते ॥ ४३ ॥]

जिनप्रवचने भक्तो योऽतः शक्रोऽपि तत्पदचिन्तामापद्यपि तन्निवर्त्तनादिविषयां करोति बहुव्यग्रोऽपि । यस्य कषायैर्दुष्टविषय-क्रोधादिभिर्मनो न पीड्यते, तेनासौ देवैः सुरेन्द्रादिभिरपीड्यते स्तूयत इत्यर्थः ॥ ४३ ॥

इन्द्रचिन्ताविषयत्वे कारणान्तरमाह—

सुगुरु-आण मणि[3] सइ जसु निवसइ
जसु तत्तत्थि चित्त पुणु पविसइ ।

---

१ क °वक्क । २ क °हि । ३ ग. मण ।

जो नाइण कु वि [1]जिणवि न सक्कइ
जो परवाइ–भइणं[2] नोसक्कइ ॥ ४४ ॥

[सुगुर्वाज्ञा मनसि सदा यस्य निवसति
यस्य तत्त्वार्थे चित्तं पुनः प्रविशति ।
यो न्यायेन केनापि जेतुं न शक्यते
यः परवादिभयेन नावष्वष्कते ॥ ४४ ॥]

सुगुरूणामाज्ञा मनसि सर्वदा यस्य निविशते । यस्य तत्त्वार्थे चित्तं पुनः प्रविशति । यं न्यायेन कोऽपि जेतुं न शक्नोति । यः परवादिभयेन नावष्वष्कते नैवापसरतीत्यर्थः ॥ ४४ ॥

जसु चरिइण गुणिचित्तु चमक्कइ
तसु जु न सहइ सु दूरि निलुक्कइ ।
जसु परिचिंत[3] करहिं जे देवय
तसु समचित्त ति थोवा सेवय ॥ ४५ ॥

[यस्य चरितेन गुणिचित्तं चमत्करोति
तं यो न सहते स दूरं निह्नुते ।
यस्य परिचिन्तां कुर्वन्ति ये देवाः
तस्य समचित्तास्ते स्तोकाः सेवकाः ॥ ४५ ॥]

यस्य चरितेनाद्भुतेन गुणिनां चित्तं चमत्करोति । तं यो न सहते मत्सरेण दूरमात्मानं निह्नोति (°ह्नुते) अयुक्तकारित्वात् । यस्य परिचिन्तां कुर्वन्ति देवतास्तस्यात्यन्तगुणिनः समचित्ता ये ते स्तोकाः सेवका इत्यर्थः ॥ ४५ ॥

तसु निसि दिवसि[4] चिंत इह (य) वट्टइ
कहिं[5] वि ठावि जिणपवयणु फिट्टइ ।
भूरि भवंता दीसहि बोडा
जे सु पसंसहि ते परि थोडा ॥ ४६ ॥

[तस्य निशि दिवसे चिन्तेयं वर्तते
क्वापि स्थाने जिनप्रवचनं भ्रश्यति ।
भूरयो भ्रमन्तो दृश्यन्ते मुण्डिता
ये तं प्रशंसन्ति ते परं स्तोकाः ॥ ४६ ॥]

---

१ ख. ग. जिणिवि । २ क. भयण । ३ क. °चित, ख. ग. चिंतं । ४ क. पर, °ख. परं । ५ ख. ग. दिवसु१ ६ ख. ग. कहि ।

तस्य युगप्रवरस्याहर्निशमियमेव चिन्ता वर्तते। क्वापि स्थाने जिनप्रवचनं मालिन्यं मा लभताम्। एवमतिशयेन प्रवचनानुकूल्येऽपि तस्य भूरयो भ्रमन्तोऽपि दृश्यन्ते बोडा मुण्डितशिरसः ये तं प्रशंसन्ति ते स्तोका एवेत्यर्थः ॥ ४६ ॥

प्रत्युत—

पिच्छहि[1] ते तसु पइ पइ पाणिउ
तसु असंतु दुहु ढोयहिं आणिउं।
धम्मपसाइण सो परि छुट्टइ
सव्वत्थ वि सुहकज्जि पयट्टइ ॥ ४७ ॥

[प्रेक्षन्ते ते तस्य पदे पदे पानीयं (च्छिद्रम्)
तस्यासद् दुःखं ढौकयन्त्यानीय।
धर्मप्रसादेन स परं च्छुट्यते
सर्वत्रापि शुभकार्ये प्रवर्तते ॥ ४७ ॥]

प्रेक्षन्ते ते मुण्डितशिरसः पदे पदे पानीयं देशविशेषभाषया छिद्रम्। तस्यासदशोभनं दुःखं परवाद्याद्युत्थापनेन पीडां ढौकयन्ति आनीय। धर्म्मप्रसादेनैव स तावत्सु दुष्टेषु सत्सु मुच्यते। ततः सर्वत्रापि शुभकार्ये प्रवर्तत इत्यर्थः ॥ ४७ ॥

तह वि हु ताहि वि सो नवि रूसइ
खम न सु मिल्लइ नवि ते दूसइ।
जइ ति वि आवहि तो[2] संभासइ
जुत्तु तदुत्तु वि निसुणिवि तूसइ ॥ ४८ ॥

[तथापि खलु तेभ्योऽपि स नैव रुष्यति
क्षमां न स मुञ्चति नापि तान् दूषयति।
यदि तेऽप्यागच्छन्ति ततः सम्भाषते
युक्तं तदुक्तमपि निशम्य तुष्यति ॥ ४८ ॥]

तथाप्येवमपि दुष्टाशयेषु स न रुष्यति। क्षमां तद्विषयानुकूलप्रवृत्तिरूपां न मुञ्चति। न च तान् दूषयति दोषवत्त्वेन ख्यापयति। यदि कदाचित् तेऽप्यागच्छन्ति ततः सम्भाषते। युक्तं तदुक्तमपि श्रुत्वा तुष्यति, न तु दुष्टोक्तत्वेन खण्डयतीत्यर्थः ॥ ४८ ॥

अप्पु अणप्पु वि न सु बहु मन्नइ
थोवगुणु वि परु पिच्छवि वन्नइ।

---

१ ख. ग. पिच्छहिं। २ ख. ग. वि तो।

एइ वि जइ तरंति भवसायरु
ता अणुवत्तउ निच्चु वि सायरु ॥ ४९ ॥

[आत्मानमनल्पमपि न स बहु मन्यते
स्तोकगुणमपि परं प्रेक्ष्य वर्णयति ।
एतेऽपि यदि तरन्ति भवसागरं
ततोऽनुवर्तयामि नित्यमपि सादरम् ॥ ४९ ॥]

आत्मानमनल्पमपि बहुगुणत्वेन महान्तमपि नासौ बहु मन्यते । स्तोकगुणमपि परं प्रेक्ष्य वर्णयति उपबृंहयति । चिन्तयति चैतेऽपि यदि तरन्ति भवसागरं ततोऽनुवर्त्तयामि सादरं पश्यामि नित्यमित्यर्थः ॥ ४९ ॥

जुगुपहाणु गुरु इउ परि चिंतइ
तं-मूलि वि तं-मण सु निकिंतइ ।
लोउ लोयवत्ताणइ भग्गउ
तासु न दंसणु पिच्छइ नग्गउ ॥ ५० ॥

[युगप्रधानो गुरुरेतदेव चिन्तयति
तन्मूलेऽपि तन्मनः स निकृन्तति ।
लोको लोकवार्तया भग्नः
तस्य न दर्शनं प्रेक्षते नाग्रम् (नग्नः) ॥ ५० ॥]

युगप्रधानो गुरुरेतदेव पूर्वोक्तं चिन्तयति । तन्मूलेऽपि तत्पार्श्वेऽपि वर्तमानस्तस्य युगप्रधानस्य मनश्चित्तं स दुष्टचित्तो मर्मोद्घट्टनादिना निकृन्तति । 'तं पुण' इति पाठान्तरे तु तं सूरिमिति । तथा तन्मूलान्यपि ज्ञान-दर्शन-चारित्राणि स्वबुद्धया पीडयतीति योज्यम् । लोको मुग्धधार्मिकजनो लोकवार्तयैव तथाविधदुष्टविधीयमानगुरुविषयासद्दूषणशतश्रवणेनैव भग्नः सूरिविषयं वैमुख्यमापादितः सन् तस्य सूरेर्दर्शनमपि शान्तरूपं न प्रेक्षते नाप्यग्रं दुष्टभवान्तरलाभलक्षणमित्यर्थः ॥ ५० ॥

एवं युगप्रधानस्वरूपे विहिते तद्विषयं प्रवाहपतितजनवचनमाह—

इह गुरु केहि वि लोइहि वन्निउ[2]
तु वि अम्हारइ संघि न मन्निउ ।
अम्हि केम इसु पुट्ठिहि लग्गह ?
अन्निहि जिव किव नियगुरु मिल्लहँ[3] ? ॥ ५१ ॥

---

१ क. °दुष्टं । २ ख. ग. ° उं त्तु । ३ ग. मिल्लहु ।

[एष गुरुः कैश्चिदपि लोकैर्वर्णितः
ततोऽप्यस्मदीये सङ्घे न मतः ।
वयं कथमस्य पृष्ठे लगामः ?
अन्यैरिव कथं निजगुरुं मुञ्चामः ? ॥ ५१ ॥]

एष गुरुः कैश्चिल्लोकैर्वर्णितः, परमस्मदीयेन सङ्घेन न मानितः । ततोऽस्य पृष्ठे कथं वयं लगामः ? । अन्यैरिव शुद्धविधिधर्म्मप्रवृत्तमुग्धधार्मिकैरिव कथं निजगुरुं मुञ्चाम इत्यर्थः ॥ ५१ ॥

**पारतंतं–विहिविसइ–विमुक्कउ
जणु इउं बुल्लइ मग्गह चुक्कउ ।
तिणि जणु विहिधम्मिहि सहं झगडइ
इह परलोइं वि अप्पा रगडइ ॥ ५२ ॥**

[पारतन्त्र्य–विधिविषयैर्विमुक्तो
जन एतद् वदति मार्गाच्युतः ।
तेन जनो विधिधार्मिकैः सह कलहायते
इह परलोकेऽप्यात्मानं वञ्चयति ॥ ५२ ॥]

पारतन्त्र्यविधिविषयैर्विमुक्तो जनः प्रवाहपतित एतत् पूर्वोक्तं वदति मार्गभ्रष्टः सन्। यत एतदेवं तेन कारणेन जनः पूर्वोक्त एव । विधिधार्मिकैः सह कलहायते । तथा चासाविह–परलोकयोरात्मानं वञ्चयतीत्यर्थः ॥ ५२ ॥

**तु वि अविलक्खुं विवाउ करंतउ
किवइ न थक्कइ विहि असहंतउ ।
जो जिणभासिउ विहि सु कि तुट्टइ ?
सो झगडंतुं लोउ परिफिट्टइ ॥ ५३ ॥**

[तथाप्यविलक्षो विवादं कुर्वन्
कथमपि नावतिष्ठते विधिमसहमानः ।
यो जिनभाषितो विधिः स किं त्रुट्यति ?
असौ कलहायमानो लोकः परिभ्रश्यति ॥ ५३ ॥]

यद्यप्यात्मानं वञ्चयति तथाप्यविलक्षोऽविवेकित्वाददीनो विवादं कुर्वन् धार्मिकैः सह कथमपि नावतिष्ठते विधिमसहमानः । यतो न जानात्यसौ मूर्खो

---

१ क. °दीयसं° । २ क. मनितः । ३ ख. ग. °तंतु । ४ क. इहु । ५ ख. ग.° हिं सहुं ज्झ°। ६ ख. ग. °लोय । ७ ख. ग. °लखु । ८ ख. ग. ज्झग° ।

यदुत जिनभाषितो विधिः स किं विवादादिनाऽपि त्रुट्यति ?, केवलमसौ कलहायमानो लोक एव भ्रश्यति सद्धर्म्मलाभादित्यर्थः ॥ ५३ ॥

विधेरव्यवच्छेदमेवाह—

दुप्पसहंतु चरणु जं वुत्तउ
तं विहि विणु किव होइ निरुत्तउ ? ।
इक्क सूरि इक्का वि स अज्जी
इक्कु देसं जि इक्क वि देसज्जी ॥ ५४ ॥

[दुःप्रसभान्तं चरणं यदुक्तं
तद् विधिं विना कथं भवति निरुक्तम् ?।
एकः सूरिरेकोऽपि साऽऽर्या
एको देशार्य एकाऽपि देशार्या ॥ ५४ ॥]

दुःप्रसभान्तं चरणं यदुक्तं भगवता, तद् विधिं विना विधिव्यवच्छेदे कथं भवति निरुक्तं निश्चितम् । यदेकः सूरिर्दुःप्रसभः, एकाऽप्यार्या साध्वी सत्यश्रीनाम्नी, एकश्च देशव्र(विर)तिः श्रावको नागिलनामा, एका च फल्गुश्रीनाम्नी देशेनार्या साध्वी देशविरता श्राविकेत्यर्थः ॥ ५४ ॥

तह वीरह तु वि तित्थु पयट्टइ
तं दस-वीसह अज्जु कि तुट्टइ ? ।
नाण-चरण-दंसणगुणसंठिउ
संघु सु वुच्चइ जिणिहि जहट्ठिउ ॥ ५५ ॥

[तथा वीरस्य तदपि तीर्थं प्रवर्तते
तद् दशभिर्विंशत्याऽद्य किं त्रुट्यति ? ।
ज्ञान-चरण-दर्शनगुणसंस्थितः
सङ्घः स उच्यते जिनैर्यथास्थितः ॥ ५५ ॥]

तथापि वीरस्य तीर्थं प्रवर्त्तते तद् दशभिर्विंशत्या वा प्रभूतसुसाध्वाद्युपलक्षणं चैतदद्य किं त्रुट्यति ? नैव । तत्र च सर्वत्रापि विधिरस्त्येव । न चैकादिसाध्वादिभावे कथमसौ सङ्घः? यतः ज्ञान-दर्शन-चारित्रगुणसंस्थितः स्तोकोऽपि सङ्घः स उच्यते जिनैर्यथावस्थितः सत्यो न तु प्रभूत एव मेलक इत्यर्थः ॥ ५५ ॥

दव्व-खित्त-काल-ठिइ वट्टइ
गुणि-मच्छरु करंतु न निहट्टइ ।

---

१ क. ख. सन्नि । २ क. ख. संज्ञि ।

गुणविहूणु संघाउ कहिज्जइ
लोअपवाहनईए जो निज्जइ ॥ ५६ ॥

[द्रव्य–क्षेत्र–कालस्थित्या वर्तते
गुणिमत्सरं कुर्वन् न निवर्तते ।
गुणविहीनः सङ्घातः कथ्यते
लोकप्रवाहनद्या यो नीयते ॥ ५६ ॥]

द्रव्य–क्षेत्र–कालस्थित्या तदनुसारेण वर्तते । गुणिषु च मत्सरं न करोत्येव। कदाचित् कुकर्म्मवशात् तत्करणेऽपि तत्रैव न स्थिरतराशयो भवति । अथ दुःसङ्घस्वरूपमाह—गुणविहीनो बहुजनोऽपि सङ्घात एव कथ्यते लोकप्रवाहनद्या यो नीयत इत्यर्थः ॥ ५६ ॥

तथा—

जुत्ताजुत्तु वियारु न रुच्चइ
जसु जं भावइ तं तिण वुच्चइ ।
अविवेइहिं सु वि संघु भणिज्जइ
परं गीयत्थिहिं किव मन्निज्जइ ? ॥ ५७ ॥

[युक्तायुक्तविचारो न रोचते
यस्य यद् भाति तत् तेनोच्यते ।
अविवेकिभिः सोऽपि सङ्घो भण्यते
परं गीतार्थैः कथं मन्यते ? ॥ ५७ ॥]

युक्तायुक्तविचारो यस्मै न रोचते, तत्सङ्घातमध्ये च यस्य यद् भात्ययुक्तमपि तत् तेनोच्यते । अविवेकिभिः सोऽपि सङ्घो भण्यते, परं गीतार्थैः कथमसौ सङ्घत्वेन मन्यते ? निर्गुणत्वादित्यर्थः ॥ ५७ ॥

विणु कारणि सिद्धंति निसिद्धउ
वंदणाइकरणु वि जु पसिद्धउ ।
तसु गीयत्थ केम कारण विणु
पइदिणु मिलहिं करहिं पयवंदणु ? ॥ ५८ ॥

[विना कारणं सिद्धान्ते निषिद्धं
वन्दनाऽऽदिकरणमपि यत् प्रसिद्धम् ।

तस्य गीतार्थाः कथं कारणं विना
प्रतिदिनं मिलन्ति कुर्वन्ति पदवन्दनम् ? ॥ ९८ ॥]

विना कारणं '(१)अग्गीयादायन्ने खेत्ते अन्नत्थ ठिइअभावंमि' इत्यादिकं सिद्धान्ते निषिद्धं वन्दनाऽऽदिकरणमपि '(२) वायाइ नमुक्कारो' इत्यादिकं यत् प्रसिद्धं तस्य साध्वादिसङ्घातस्य गीतार्थाः केन हेतुना कारणं विनाऽपि प्रतिदिनं मिलन्ति ? कुर्वन्ति च पदवन्दनम् ? नैवेत्यर्थः ॥ ५८ ॥

प्रवाहपतितश्च जनः—

जो असंघु सो संघु पयासइ
जु जि संघु तसु दूरिण नासइ ।
जिव रायंध जुवइदेहंगिहिं
चंद कुंद अणहुंति वि लक्खहिं ॥ ५९ ॥

[योऽसङ्घस्तं सङ्घं प्रकाशयति
यश्च सङ्घस्तस्माद् दूरेण नश्यति ।
यथा रागान्धा युवतिदेहाङ्गेषु
चन्द्र-कुन्दादीनसतोऽपि लक्षयन्ति ॥ ५९ ॥]

योऽसंङ्घः तं सङ्घमिति प्रकाशयति, यश्च सुसङ्घस्तस्माद् दूरेण नश्यति । किमित्येवमित्याह—यथा रागान्धा युवतिदेहावयवेषु चन्द्र-कुन्दादीनसतोऽपि लक्षयन्तीत्यर्थः ॥ ५९ ॥

तिवं[1] दंसणरायंध निरिक्खहिं
जं न अत्थि तं वत्थु विवक्खहि[3] ।
ते विवरीयदिट्ठि सिवसुक्खइं[4]
पाविहिं[3] सुमिणिं[5] वि कह पच्चक्खइं ? ॥ ६० ॥

[तथा दर्शनरागान्धा निरीक्षन्ते
यद् नास्ति तद् वस्तु विवक्षन्ति ।
ते विपरीतदृष्टयः शिवसौख्यानि
प्राप्नुवन्ति स्वप्नेऽपि कथं प्रत्यक्षेण ? ॥ ६० ॥]

तथा वेषमात्रमेव प्रमाणमिति दर्शनरागान्धा निरीक्षन्ते । तथा च यदसङ्घे सङ्घत्वं नास्ति, तमपि पदार्थं विशेषेण पश्यन्ति । ते विपरीतदृष्टयः शिवसौख्यानि प्राप्नुवन्ति स्वप्नेऽपि नैव, कथं पुनः प्रत्यक्षेणेत्यर्थः ॥ ६० ॥

---

(१) अन्याद्याकीर्णे क्षेत्रेऽन्यत्र स्थित्यभावे । (२) वाचा नमस्कारः ।

---

१ ख. ग. यमसंघं । २ ग. नेव । ३ ख. ग. °हिं । ४ ख. ग. °णे । ५ ख. ग. °इं ।

अथ श्राद्धशिक्षामाह—

दम्म लिंति साहम्मिय-संतिय
अवरुप्परु झंगडंति न दिंति य ।
ते विहिधम्मह खिंस महंति य
लोयमज्झि झगडंति करंति य ॥ ६१ ॥

[द्रम्मान् लान्ति साधार्मिकसत्कान्
परस्परं कलहायन्ते न ददति च ।
ते विधिधर्मस्य खिंसां महतीं च
लोकमध्ये कलहायमानाः कुर्वन्ति च ॥ ६१ ॥]

ये लोभाभिभूताः सन्तो द्रम्मान् गृह्णन्ति साधर्मिकसत्कान् । ततः परस्परं कलहायन्ते, न ददति । ते विधिधर्म्मस्य खिंसां जुगुप्साविशेषं महतीं लोकमध्ये कलहायमानाश्च कुर्वन्तीत्यर्थः ॥ ६१ ॥

एवं च सति—

जिणपवयण-अपभावण वड्डी
तउ सम्मत्तह वत्त वि बुड्डी ।
जुत्तिहि देवदव्वु तं भज्जइ
हुंतउं मग्गइ तो वि न दिज्जइ ॥ ६२ ॥

[जिनप्रवचनाप्रभावना महती
ततः सम्यक्त्वस्य वार्ताऽपि नष्टा ।
युक्त्या देवद्रव्यं तद् भज्यते
सत् मार्गयति तथापि न दीयते ॥ ६२ ॥]

जिनप्रवचनस्याप्रभावना महती । ततोऽप्रभावनायाः सकाशात् सम्यक्त्वस्य प्रभावनाव्यङ्ग्यस्य वार्त्ताऽपि समुद्रपतितरत्नमिव नष्टा । किमिति सम्यक्त्वं नश्यतीत्याह—युक्त्या विचारेण देवद्रव्यं तद् भज्यते । यतः साधर्मिकद्रव्यं सप्तक्षेत्र्यामुपयुज्यते, तत्र च जिनभवन-बिम्बादिकमस्ति । ततः साधर्मिकद्रव्यभङ्गे परमार्थतो जिनभवन-बिम्बादिद्रव्यभङ्गः क्रियत इति भावः । गृहे सदपि तस्य मार्ग्गयतोऽपि तथापि यदि न दीयत इत्यर्थः ॥ ६२ ॥

बेट्टा बेट्टी परिणाविज्जहिं
ते वि समाणधम्म-घरि दिज्जहिं ।

---

१ ख. ग. ज्झग° । २ ख. ग. महिंति । ३ ख. ग. वडी । ४ क. °तउ । ५ ख. ग. समुद्रे प° । ६ क. जिनबिंबा° ।

विसमधम्म-घरि जइ वीवाहइ
तो सम(म्म)त्तु सु निच्छइ वाहइ ॥ ६३ ॥

[पुत्राः पुत्रिकाः परिणाय्यन्ते
तेऽपि समानधर्मगृहे दीयन्ते ।
विषमधर्मगृहे यदि विवाहयति
तदा सम्यक्त्वं स निश्चयेन बाधते ॥ ६३ ॥]

पुत्राः पुत्रिकाश्च गृहस्थैश्चायोगे नैव विवाह्यन्ते । तत्रोपदेशमाह-तेऽपि समानधर्मगृहे दीयन्ते इति पुत्रिकाविषयं बोद्धव्यम् । विषमधर्म्मा विभिन्नधर्म्माणस्तद्गेहे दि विवाहयति पुत्रादीन् तदा सम्यक्त्वं स निश्चयेन बाधते स्वस्य परस्य च। तत्संसर्गेण कदाचिच्छुद्धधर्म्ममार्गात् प्रच्यवनस्यापि सम्भवादिति भाव इत्यर्थः ॥ ६३॥

थोडइ धणि संसारियकज्जइं
साहिज्जइं सव्वइं सावज्जइं ।
विहिधम्मत्थि अत्थु विव्विज्जइं
जेण सु अप्पु निवुइ निज्जइ ॥ ६४ ॥

[स्तोकेन धनेन सांसारिककार्याणि
साध्यन्ते सर्वाणि सावद्यानि ।
विधिधर्मार्थेऽर्थ उपयोज्यते
येन स आत्मा निर्वृतिं नीयते ॥ ६४ ॥]

स्तोकेनैव धनेन सांसारिककार्याणि विवाह-मुण्डनादीनि सर्वाणि सावद्यानि साध्यन्ते । विधिधर्मार्थे जिन-सङ्घपूजादावर्थः प्रभूततरोऽप्युपयोज्यते । येन स शुद्धविधिविधाता आत्मा निर्वृतिं नीयत इत्यर्थः ॥ ६४ ॥

सावय वसहिं जेहिं किर ठावँहिं
साहुणि साहु तित्थु जइ आवँहिं ।
भत्त वत्थ फासुय जल आसण
वसहिं वि दिंति य पावपणासण ॥ ६५ ॥

[श्रावका वसन्ति येषु किल स्थानेषु
साध्व्यः साधवस्तत्र यद्यागच्छन्ति ।

---

१ ख. ग. °स्थैः स्वयो° । २ क. ग. नगृ° । ३ ख. ग. °इं । ४ ख. ग. °जुइ । ५ ख. ग. अप्पा । ६ क. ठाविहि । ७ क. °हि । ८ क. ग. पुत्त फालुय ।

भक्त-वस्त्र-प्रासुकजलासनानि
वसतिमपि ददति च पापप्रणाशनान् (°काः) ॥ ६५ ॥]

श्रावका वसन्ति येषु ग्राम-नगरादिषु किल स्थानेषु साध्व्यः साधवो वा विहारक्रमेण यदि तत्रागच्छन्ति तदा आगतानां साध्वादीनां भक्त-वस्त्र-प्रासुक-जलासनानि वसतीश्च ददति । प्रासुकपदं चैषणीयोपलक्षणं तच्च मध्यस्थितमपि भक्तादिषु सर्वेषु योज्यम् । पापप्रणाशनान् भक्तादीन् पापप्रणाशका वा श्राद्धाः । न ददतीति पाठे तु काका पापप्रणाशना ' न भवन्ति' इति शेष इत्यर्थः ॥ ६५ ॥

जइ ति वि कालुचिय-गुणि वट्टहिं
अप्पा परु वि धरहि विहिवट्टहिं ।
जिण-गुरुवेयावच्चु करेवउ
इउ सिद्धंतिउ वयणु सरेवउ ॥ ६६ ॥

[यदि तेऽपि कालोचितगुणे वर्तन्ते
आत्मानं परमपि धारयन्ति विधिमार्गे ।
जिन-गुरुवैयावृत्त्यं कार्य-
मिति सैद्धान्तिकं वचनं स्मर्तव्यम् ॥ ६६ ॥]

यदि तेऽपि साध्वादय आगताः सन्तः कालोचितविधिना वर्तन्ते । आत्मान परं च श्रावकादिकं स्थापयन्ति विधिमार्गे तदा जिन-गुर्वोर्वैयावृत्त्यं कार्यमिति सैद्धान्तिकं वचनं '(१)गुरु-देवाणं जहासमाहीए वेयावच्चे नियमो' इत्यादिकं स्मर्त्तव्य-मनुष्ठेयं चेत्यर्थः ॥ ६६ ॥

घणमाणुसु कुडुंबु निवाहइ
धम्मवार पर हिट्ठउ वाहइ ।
तिणि सम्मत्त-जलंजलि दिन्नी
तसु भवभमणि न मइ निविन्नी ॥ ६७ ॥

[घनमानुषं कुटुम्बं निर्वाहयति
धर्मावसरे परमधो वाहयति (भवति) ।
तेन सम्यक्त्वजलाञ्जलिर्दत्त-
स्तस्य भवभ्रमणे न मतिर्निर्विण्णा ॥ ६७ ॥]

(१) गुरु-देवयोर्यथासमाधि वैयावृत्त्ये नियमः ।

---

१ ख. ग. तु पाप° । २ क. °हि । ३ क. °वच्च । ४ ख. ग. आत्मा परं । ५ क. कुडंबु । ६ ख. ग. °भवणि ।

प्रभूतमानुषं स्वंकुटुम्बं निर्वाहयति कञ्चित्, परं कृपणतया धर्म्मप्रयोजने दे साधुदानादावदित्सयाऽधोदृष्टिरेव भवति । तेन सम्यक्त्वस्य जिन-साधु क्तिव्यङ्ग्यस्य जलाञ्जलिर्दत्तस्तन्नूनं तस्य भवभ्रमणे मतिरद्यापि न निर्विन्ने(त्यर्थः ॥ ६७ ॥

सधणु सजाइ जु जि तसु भत्तउ
अन्नह सद्दिट्ठिहि वि विरत्तउ ।
जे जिणसासणि हुंति पवन्ना
सवि बंधवं नेहपवन्ना ॥ ६८ ॥

[सधनः सजातिर्य एव तस्य भक्तो
ऽन्यस्मात् सद्दृष्टेरपि विरक्तः ।
ये जिनशासनं भवन्ति प्रपन्ना-
स्ते सर्वे बान्धवाः स्नेहप्रपन्नाः ॥ ६८ ॥]

साधर्मिको यः सधनः स्वजनो वा तत्रैव भक्तः, अन्यस्मात् सद्दृष्टेः प्रधानश्रावकादपि विरक्तः । अयुक्तं चैतत् यतो ये जिनशासनं भवन्ति प्रति न्नास्ते सर्वेऽपि बान्धवा एव स्नेहप्रतिपन्ना इत्यर्थः ॥ ६८ ॥

तसु संमत्तु होइ किव मुद्धह ?
जो नवि वयणि विलग्गइ बुद्धह ।
तिन्नि चयारि[3] छुत्तिदिण रक्खइ
स जि सरावी लग्गइ लिक्खइ ॥ ६९ ॥

[तस्य सम्यक्त्वं भवति कथं मुग्धस्य ?
यो नैव वचने विलगति बुद्धानाम् ।
त्रीणि चत्वारि छुप्तिदिनानि रक्षति
सैव श्राविका लगति लेख्यके ॥ ६९ ॥]

तस्य सम्यक्त्वं कथं भवति मुग्धस्य ? यो नैव वचने "(१) सहधर्म्मिंयरा बंधवा' इत्येवंरूपे विशेषेण लगति बुद्धानां तीर्थकराणाम् । अथात्रैव श्राविका क्षामाह-त्रीणि चत्वारि वा दिनानि छुप्तिं रक्षति मृद्भाण्डादिस्पर्शवर्ज्जनेन, विशे तश्च साधु-जिनालयगमनवर्ज्जनेन च या; सैव श्राविका लेख्यके सुश्राविकाग नायां गण्यते । छुप्तयश्चाशौचविशेषा एवं लोके श्रूयन्ते—

" जात-मृत-सूतकदिने रजस्वला-वमन-मूत्र-विष्टासु ।
मद्ये चण्डालादौ स्युः सप्त छुप्तयो लोके ॥" इत्यर्थः ॥ ६९ ॥

(१) सहधर्मकरा मम बान्धवाः ।

१ क. स्व. । २ ग. °बंधवा । ३ क. पयारि । ४ क. °हरा ।

हुंति य च्छुत्ति जल(पव)ट्टइ सेच्छइ
सा घर-धम्मह आवइ निच्छइ ।
छुत्तिभग्ग घर छड्डुइं देवय
सासणसुर मिल्लहिं विहिसेवय ॥ ७० ॥

[सत्यां च छुप्तौ प्रवर्त्तते स्वेच्छया
सा गृह-धर्मस्यापद् निश्चयेन ।
छुप्तिभग्ना गृहाणि मुञ्चन्ति देवताः
शासनसुरा मुञ्चन्ति विधिसेवकाः ॥ ७० ॥]

सत्यामपि छुप्तौ स्वेच्छया या प्रवर्त्तते सा निर्धर्म्मकर्म्मप्रवृत्ता गृहस्य धर्मस्य चापद् ध्वंसकारणं निश्चयेन । यतः च्छुप्त्या भग्नास्त्रासिता गृहाणि मुञ्चन्ति देवता भुवन-क्षेत्रदेवताप्रभृतयः शासनसुरा अपि गोमुखप्रभृतयो विधिसेवका अविधिप्रवृत्तौ मुञ्चन्तीत्यर्थः ॥ ७० ॥

पडिकमणइ वंदणइ आउल्ली
चित्त धरंति करेइ अमुल्ली ।
मणह मज्झि नवकारु वि ज्झायइ
तासु सुट्ठु सम्मत्तु वि रायइ ॥ ७१ ॥

[प्रतिक्रमणे वन्दनके वाऽऽकुला
चित्ते धारयन्ती करोत्यसन्दिग्धा ।
मनोमध्ये नमस्कारमपि ध्यायति
तस्याः सुष्ठु सम्यक्त्वमपि राजते ॥ ७१ ॥]

सा रजस्वला प्रतिक्रमणे वन्दनके वा वचनाक्षराणि नोच्चारयतीत्यर्थः । चित्त एवाक्षराणि धारयन्ती करोति असन्दिग्धैव मनोमध्य एव नमस्कारमपि ध्यायति । ततस्तस्याः सुष्ठु सम्यक्त्वमपि शोभत इत्यर्थः ॥ ७१ ॥

सावउ सावयछिंदइं[1] मग्गइ
तिणि सहु जुज्झइ धणबलि वग्गइ ।
अलिउ वि अप्पाणउं[2] सच्चावइ
सो समत्तु न केमइ पावइ ॥ ७२ ॥

[श्रावकः श्रावकच्छिद्राणि मृगयते
तेन सह युध्यते धनबलेन वल्गते ।

---

१ क. छिइं । २ क. °णउ ।

अलीकमप्यात्मानं सत्यापयति
स सम्यक्त्वं न कथमपि प्राप्नोति ॥ ७२ ॥]

श्रावक एव श्रावकान्तरस्य च्छिद्राणि गवेषयति, तेन सह युध्यते च धनबलेन वल्गते च राजकुलाद्युत्थापनेन। कदाचिद् राजकुलादौ व्यवहारे चालीकमप्यात्मानं सत्यापयति यः कश्चिदसौ सम्यक्त्वं कथमपि न प्राप्नोतीत्यर्थः ॥ ७२ ॥

विकियवयणुं बुल्लइ नवि मिल्लइ
पर पभणंतु वि सच्चउं पिल्लइ ।
अट्ठ मयट्ठाणिहिं वट्टंतउ
सो सद्दिट्ठि न होइ न संतउ ॥ ७३ ॥

[विकृतवचनानि जल्पति न तु मुञ्चति
परं प्रभणन्तमपि सत्यं निराकरोति ।
अष्टसु मदस्थानेषु वर्तमानः
स सद्दृष्टिर्न भवति न सन् ॥ ७३ ॥]

विकृतवचनान्येव जल्पति, न तु मुञ्चत्यन्यं सत्यमपि भाषमाणं गलदर्द्ररेण निराकरोति। अष्टसु जात्यादिमदस्थानेषु वर्तमानो यः कश्चिदसौ न केवलं सद्दृष्टिर्न भवति सन्नपि शिष्टोऽपि न भवतीत्यर्थः ॥ ७३ ॥

परं[1] अणत्थि घल्लंतु न संकइ
परधण-धणिय जु लेयण धंखइं[2] ।
अहियपरिग्गह-पावपसत्तउ
सो संमत्तिण दूरिण चत्तउ ॥ ७४ ॥

[परमनर्थे प्रक्षिपन् न शङ्कते
परधन-भार्यां यो ग्रहीतुमाकाङ्क्षति ।
अधिकपरिग्रह-पापप्रसक्तः
स सम्यक्त्वेन दूरेण त्यक्तः ॥ ७४ ॥]

अन्यं व्यसने प्रक्षिपन् न शङ्कते। परस्य धनं भार्यां च यो ग्रहीतुमाकाङ्क्षति। अधिके प्रभूते अत्यर्थं वा परिग्रहेण पापं तत्रासक्तः सोऽपि सम्यक्त्वेन दूरेण त्यक्त इत्यर्थः ॥ ७४ ॥

जो सिद्धंत्तियजुत्तिहिं[3] नियघरु
वाहि न जाणइं करइ विसंवरु ।

---

१ क. °यण्ण । २ ग. परं । ३ क. धक्खइ । ४ क. °हि । ५ ख. ग. हि ।

कु वि केणइ कसायपूरियमणु
वसइ कुडुंबि[1] जं माणुसघणु ॥ ७५ ॥
[यः सिद्धान्तयुक्त्या निजगृहं
वाहयितुं न जानाति करोति विसंवरम् ।
कोऽपि केनचित् कषायपूरितमना
वसति कुटुम्बे यन्मानुषघने ॥ ७५ ॥]

यः सिद्धान्तयुक्त्या वक्ष्यमाणसमदृष्टिदर्शन-कोमलालापादिरूपया निजं गृहं प्रवर्त्तयितुं न जानाति, किन्तु करोति विसंवरं संवरणरहितं विसंस्थुलमित्यर्थः। यतः कोऽपि केनापि कषायेण लोभादिना पूरितमना वसति कुटुम्बे मानुषप्रचुर इत्यथः ॥ ७५ ॥

तसु सरूवु मुणि अणुवत्तिज्जइ
कु वि दाणिण कु वि वयणिण लिज्जइ ।
कुवि भएण करि पाणु धरिज्जइ
सगुणु जिट्ठु[2] सो पइ ठाविज्जइ ॥ ७६ ॥
[तस्य स्वरूपं ज्ञात्वाऽनुवर्त्यते
कोऽपि दानेन कोऽपि वचनेन लीयते ।
कोऽपि भयेन कृत्वा प्राणेन (पाणौ ?) धार्यते
सगुणो ज्येष्ठः स पदे स्थाप्यते ॥ ७६ ॥]

तस्य कुटुम्बपुरुषादेः स्वरूपं ज्ञात्वाऽनुवर्त्यते । कोऽपि दानेन, कोऽपि मधुरवचनेन गृह्यते । कोऽपि भयालुर्भयेन कृत्वा प्राणेन बलात्कारेण धार्यते । कुटुम्बे यश्च सगुणो ज्येष्ठः स पदे कुटुम्बादिवर्त्तनाधिकारे स्थाप्यत इत्यर्थः ॥ ७६॥

जुट्ठह धिट्ठह न य पत्तिज्जइ
जो असत्तु तसुवरि दइ किज्जइ ।
अप्पा परह न लक्खाविज्जइ
नप्पा विणु कारणि खाविज्जइ ॥ ७७ ॥
[अलीकभाषिणां धृष्टानां नैव प्रतीयते
योऽसत्त्वस्तस्योपरि दया क्रियते ।
आत्मा परस्य न लक्ष्यतां नीयते
नात्मा विना कारणमुपयोज्यते ॥ ७७ ॥]

---

१ क. कुडंबि । २ ख. ग. °षे प्र° । ३ क. विद्धु ।

अलीकभाषिणां धृष्टानां च वचने नैव प्रत्ययं करोति। यश्चासमर्थो निःसत्त्वो वा तस्योपरि दया क्रियते। आत्मा कदाचिद् भीतो हृष्टो वा परस्य लक्ष्यतां न नीयते, कदाचिदपायसम्भवात्। न चात्मा विना कारणं विशेषलाभादिकं मन्त्रि-बलाधिपाद्यधिकारिणां वस्त्र-द्रव्यादिदानेनोपयोगं नीयत इत्यर्थः ॥ ७७ ॥

माय-पियर जे धम्मि विभिन्ना
ति वि अणुवित्तिय हुंति ति धन्ना।
जे किर हुंति दीहसंसारिय
ते बुल्लंत न ठंति निवारिय ॥ ७८ ॥

[माता-पितरौ यौ धर्मे विभिन्नौ
तावप्यनुवर्तितौ भवतस्तौ धन्यौ।
ये किल भवन्ति दीर्घसंसारिण—
स्ते ब्रुवन्तो न तिष्ठन्ति निवारिताः ॥ ७८ ॥]

माता-पितरौ यौ विभिन्नधार्मिकौ तावप्यनुवर्त्तितौ सन्तौ तौ प्रसिद्धौ धन्यौ पुण्यभाजनं शुद्धधर्म्मविषयाभिमुखौ भवत इत्यर्थः। व्यतिरेकमाह-ये पुनः पित्रा-दयोऽपि दीर्घसंसारिणो भवन्ति, ते अनुवर्त्तिता अपि सन्तोऽसभ्यं भाषन्त एव, न च तिष्ठन्ति निवर्त्तिता अपीत्यर्थः ॥ ७८ ॥

ताहि वि कीरइ इह अणुवत्तण
भोयण-वत्थ-पयाणपयत्तिण।
तह बुल्लंतहं[1] नवि रूसिज्जइ
तेहि समाणु विवाउ न किज्जइ ॥ ७९ ॥

[तेषामपि क्रियत इहानुवर्तना
भोजन-वस्त्रप्रदानैः प्रयत्नेन।
तथा ब्रुवतामपि नैव रुष्यते
तैः समं विवादो न क्रियते ॥ ७९ ॥]

तेषामपि भिन्नधार्म्मिकाणां संसारिणां क्रियत इहानुवर्त्तना भोजन-वस्त्रप्र-दानैः प्रयत्नेन दुष्प्रतीकारत्वात् तेषाम्। कदाचित् तु दुष्टमपि भाषमाणानां न रोषः क्रियते। तैः सह विवादो न क्रियते स्वयं विवेकित्वात् कृतज्ञत्वाच्चेत्यर्थः ॥ ७९ ॥

अथोपसंहरन्नुपदेशफलमाह—

इय जिणदत्तुवएसरसायणु
इह-परलोयहँ[2] सुक्खह भायणु।

---

१ ख. ग. वुत्तंतह। २ क. °अह।

कण्णंजलिहिं पियंति जि भव्वइं
ते हवंति अजरामर सव्वइं ॥ ८० ॥

[इति **जिनदत्तो**पदेशरसायनम्
इह-परलोकयोः सुखस्य भाजनम् ।
कर्णाञ्जलिभ्यां पिबन्ति ये भव्याः
ते भवन्त्यरामराः सर्वे ॥ ८० ॥]

इत्युक्तन्यायेन जिनैर्दत्तो वितीर्णस्तीर्थकृदुपदिष्ट इत्यर्थः । अथवा 'जिनदत्त' इति प्रबन्धकर्त्तुरेव नाम । ततश्च स चासौ तस्य चोपदेशः शिक्षाविशेषः स एवात्यन्त माधुर्यादजरामरत्वहेतुत्वाच्च रसायनं सञ्जीवनहेत्वमृतद्रव्यरूपम् । इह-परलोकयोः सुखस्य भाजनं पात्रं तद्धेतुत्वात् कर्णाञ्जलिभ्यां पिबन्ति ये भव्यास्ते भवन्त्यजरामराः सर्वेऽपीत्यर्थः ॥ ८० ॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचिता श्रीमज्जिनदत्तसूरिसूत्रितोपदेशरसायनस्य संक्षिप्ततरा वृत्तिः समाप्ता ॥

इति **जिनपतिसूरेः** शिष्यो रसायनसंत्पदं
किमपि किमपि व्याख्यां निन्ये निगूढमहार्थभृत् ।
युग-नव-रविप्रख्ये वर्षे निदेशत आहृतः
सुकविपरिषन्नृत्यत्कीर्तिर्**जिनेश्वर**सद्गुरोः ॥ १ ॥
जिनपाल इति ख्यातो भक्तिमान् निजसद्गुरौ ।
तस्यैवानुग्रहाच्चैवं वृत्तिमाधादिमां तनुम् ॥ २ ॥
शुभं भवतु सकलसङ्घस्य । ग्रंथाग्रं ४७९ ॥

उपदेशरसायनं समाप्तम् ।

१ ग. सप्तत्यां

जिनदत्तसूरिरचितं

सूरप्रभोपाध्यायविहितवृत्तियुतं

कालस्वरूपकुलकम् ।

वीरं प्रणम्य भवनीरधितीरमाप्तमाप्तोत्तमं हततमःप्रसरं नतानाम् ।
कालस्वरूपकुलकं जिनदत्तसूरिरब्धं यथाश्रुतमहं विवृणोमि किञ्चित् ॥ १ ॥

पणमवि वद्धमाणु जिणवल्लहु
परमप्पयलच्छिहिं जिणवल्लहु ।
सुगुरूवएसु देमि हउ भवह
सुक्खह कारणु होइ जु सवह ॥ १ ॥

[प्रणम्य **वर्धमानं जिनवल्लभं**
परमपदलक्ष्मा(क्ष्म्या) जिनवल्लभम् ।
सुगुरूपदेशं ददाम्यहं भव्यानां
सौख्यानां कारणं भवति यः सर्वेषाम् ॥ १ ॥]

व्याख्या–प्रणम्य वर्द्धमानं वीरं जिना अवधिजिनादयः तेषां वल्लभं प्रियं परमपदलक्ष्मा जिनो नारायणस्तद्वद्वल्लभं भर्त्तारम् । सुगुरूपदेशं ददाम्यहं भव्यानां सौख्यानां कारणं हेतुर्भवति य उपदेशः सर्वेषाम् ॥ १ ॥

मीण सणिच्छरंमि संकंतइ
मेसि जंति पुण वक्कु करंतइ ।
देस भग्ग परचक्क पइट्ठा
वड वड पट्टण ते पब्भट्ठा ॥ २ ॥

[मीने शनैश्चरे सङ्क्रान्ते
मेषे याति पुनर्वक्रं कुर्वति ।
देशा भग्नाः परचक्राणि प्रविष्टानि
बृहद्बृहत्पत्तनानि तानि प्रभ्रष्टानि ॥ २ ॥]

व्याख्या–मीनराशौ शनैश्चरे संक्रान्ते सति मेषराशौ च याति सति पुनर्वक्रं कुर्वति सति देशा भग्नाः परचक्राणि प्रविष्टानि । बृहद्बृहत्पत्तनानि तानि प्रभ्रष्टानि ॥ २ ॥

विक्कमसवच्छरि सय बारह
हुयइ पणट्ठउ सुहु घर वारह ।
इह(य)संसारि सहाविण संतिहि
वत्तहि सुम्मइ सुक्खु वसंतिहि ॥ ३ ॥

[विक्रमसंवत्सरे शते द्वादशे
भूते प्रनष्टं सुखं गृहद्वारात् ।
इति संसारस्वभावेन सद्भिः
वार्ताभिः श्रूयते सौख्यं वसद्भिः ॥ ३ ॥]

व्या०—विक्रमसंवत्सरे द्वादशशतप्रमाणे भूते सति प्रनष्टं सुखं गृहद्वारात् । इति एवंविधेन संसारस्वरूपेण हेतुभूतेन सद्भिः साधुभिः वार्त्ताभिः श्रूयते सौख्यं वसद्भिः ॥ ३ ॥

तह वि वत्त नवि पुच्छहि धम्महु
जिण गुरु मिल्लहि कज्जिण दम्महु ।
फलु नवि पावहि माणुसजम्महु
दूरि होंति ति जि सिवसम्महु ॥ ४ ॥

[तथापि वार्तां नैव पृच्छन्ति धर्मस्य
जिनान् गुरून् मुञ्चन्ति कार्ये द्रम्मस्य ।
फलं नैव प्राप्नुवन्ति मनुष्यजन्मनः
दूरे भवन्ति ते शिवशर्मणः ॥ ४ ॥]

व्या०—यद्यप्येवंविधं संसारस्वरूपं तथापि वार्त्तामपि न पृच्छन्ति धर्मस्य । तथा जिनान्, गुरून् मुञ्चन्ति कार्ये प्रयोजने द्रम्मस्य । ततः फलं न प्राप्नुवन्ति मनुष्यजन्मनः । ततो दूरीभवन्ति ते लोकाः 'जिशब्दः पादपूरणे' शिवशर्मणः ॥ ४ ॥

कथं मनुष्यजन्मनः फलं न प्राप्नुवन्ति ?, एतदेव भावयन्नाह—

मोहनिद्द जणु सुत्तु न जग्गइ
तिण उट्ठिवि सिवमग्गि न लग्गइ ।
जइ सुहत्थु कु वि गुरु जग्गावइ
तु वि तव्वयणु तासु नवि भावइ ॥ ५ ॥

[मोहनिद्रया जनः सुप्तो न जागर्ति
तेनोत्थाय शिवमार्गे न लगति ।
यदि सुहस्तः (सुखार्थं, शुभार्थं) कोऽपि गुरुर्जागरयति
तथापि तद्वचनं तस्य नैव भाति ॥ ५ ॥]

व्या०—मोहनिद्रया सुप्तो जनो न जागर्त्ति । तेन कारणेनोत्थाय मोक्षमार्गे न लगति । यदि कश्चिद् गुरुः सुहस्तः शुभार्थं सुखार्थं वा जागरयति मोहनिद्रापगमेन प्रबोधयति, ततस्तद्वचो गुरुवचनं तस्य जनस्य नापि नैव भाति रोचत इत्यर्थः ॥ ५ ॥

इदानीं लघुकर्मणां गुरुवचनानुष्ठायिनां गुणमाह—

परमत्थिण ते सुत्त वि जग्गहि
सुगुरु-वयणि जे उट्ठेवि लग्गहिं ।
राग दोस मोह वि जे गंजहि
सिद्धि-पुरंधि ति निच्छइ भुंजहि ॥ ६ ॥

[परमार्थेन ते सुप्ता अपि जाग्रति
सुगुरुवचने ये उत्थाय लगन्ति ।
राग-द्वेष-मोहानपि येऽभिभवन्ति
सिद्धिपुरन्ध्रीं ते निश्चयेन भुञ्जते ॥ ६ ॥]

व्या०—परमार्थेन तत्त्वतः सुप्ता अपि द्रव्यनिद्रया, मोहनिद्राऽभावेन जाग्रति ये सुगुरुवचने उत्थाय लगन्ति तत्त्वबुद्ध्या सज्जन्ते आसक्ता भवन्तीत्यर्थः। किं पुनर्गुरुवचनसर्वस्वं किं वा तदनुष्ठानस्य परमं फलमित्याह–'रागेत्यादि' राग-द्वेष-मोहानपि अभिभवन्ति, ते सिद्धिपुरन्ध्रीं निश्चयेन भुञ्जते ॥ ६ ॥

इदानीं स्वयूथ्यसमुत्थमिथ्यात्वनिर्मन्थनायाह—

बहु य लोय लुंचियसिर दीसहिं
पर राग-दोसिहिं सहुं विलसहिं ।
पढहिं गुणहि सत्थइ वक्खाणहि
परि परमत्थु तित्थु सु न जाणहि ॥ ७ ॥

[बहवो लोका लुञ्चितशिरसो दृश्यन्ते
परं राग-द्वेषाभ्यां सह विलसन्ति ।
पठन्ति गुणयन्ति शास्त्राणि व्याख्यानयन्ति
परं परमार्थस्तत्र तं न जानन्ति ॥ ७ ॥]

व्या०—बहवो लोका लुञ्चिताशिरसो दृश्यन्ते, परं राग-द्वेषाभ्यां सह विलसन्ति विहरन्ति । पठन्ति गुणयन्ति शास्त्राणि व्याख्यानयन्ति, परं परमार्थो यस्तत्र शास्त्रे तं न जानन्ति विरतिहीनत्वेन तत्फलाभावात् ॥ ७ ॥

तिणि वेसिणि ते चोर रिहिल्लिउ
मुसहि लोउ उम्मग्गिण घल्लिउ ।
ताहं पमत्तउ किवइ न छुट्टइ
जो जग्गइ सद्धम्मि सु वट्टइ ॥ ८ ॥

[तेन वेषेण ते चौराः स्थिता
मुष्णन्ति लोकमुन्मार्गे क्षिप्त्वा ।
तेभ्यः प्रमत्तः कथमपि न मुच्यते
यो जागर्त्ति सद्धर्मे स वर्तते ॥ ८ ॥]

व्या०—तेन वेषेण साधुसम्बन्धिना उपलक्षिताश्चौराः स्तेनास्ते तत्त्वतो लोकमोषणपरत्वाद् वेषस्याकिञ्चित्करत्वात् विप्रतार्य मुष्णन्ति लोकमुन्मार्गे क्षिप्त्वा तेभ्यो लिङ्गिभ्यः प्रमत्तो धर्म्माधर्मविचाराचतुरतया निरवधानः कथमपि न छुट्टति न मुच्यते तद्ग्रास्यो भवतीत्यर्थः । यो जागर्ति धर्माधर्मविचारचातुर्येण सावधानो भवति सद्धर्मे स एव वर्त्तते ॥ ८ ॥

ते वि चोर गुरु किया सुबुद्धिहि
सिववहुसंगमसुहरसलुद्धिहि ।
ताहि वि खावहि अप्प-उपासह
छुट्टइ कह वि न जिव भवपासह ॥ ९ ॥

[तेऽपि चौरा गुरवः कृताः स्वबुद्धिभिः
शिववधूसङ्गमसुखरसलुब्धैः ।
तेषामपि खादयन्त्यात्मोपासकानां
छुटति कथमपि न यथा भवपाशात् ॥ ९ ॥]

व्या०—तेऽपि चोरा गुरवः कृता आगमासंस्कृताभिर्निजमतिभिः शिववधूसङ्गमसुखरसलुब्धैः । तेषामपि पार्श्वादात्मानं खादयन्ति। आत्मीयभोजनादिवस्तूपयोगेन छुटति मुच्यते कथमपि न यथा भवपाशात् संसारसम्बन्धात् ॥ ९ ॥

इदानीं बाह्याकारभेदेन विशेषमनुपलक्षयतो मुग्धस्य विशेषप्रतिपत्त्यर्थमाह—

दुद्धु होइ गो-यक्किहि धवलउ
पर पेज्जंतइ अंतरु बहलउ ।

एक्कु सरीरि सुक्खु संपाडइ
अवरु पियउ पुणु मंसु वि साडइ ॥ १० ॥

[दुग्धं भवति गोऽर्कयोर्धवलं
परं पीयमानेऽन्तरं बहलम् ।
एकं शरीरे सौख्यं सम्पादयति
अपरं पीतं पुनर्मांसमपि शातयति ॥ १० ॥]

व्या०—दुग्धं भवति गोऽर्कयोर्धवलं शुभ्रं परं पीयमाने तस्मिन् अन्तरं विशेषो बहलं महत् । तदेवाह—एकं गोक्षीरं शरीरे सौख्यं सम्पादयति । अपरं अर्कदुग्धं पीतं सत् पुनर्मांसमपि शातयति, आस्ताम् अक्षिमान्द्यादिकमनर्थान्तरमित्यपेरर्थः ॥ १० ॥

एतदेव व्यनक्ति—

कुगुरु सुगुरु सम दीसहिं बाहिरि
परि जो कुगुरु सु अंतरु वाहि रि ! ।
जो तसु अंतरु करइ वियक्खणु
सो परमप्पउ लहइ सुलक्खणु ॥ ११ ॥

[कुगुरु-सुगुरू समौ दृश्येते बहिः
परं यः कुगुरुः स आन्तरो व्याधी रे ! ।
यस्तयोरन्तरं करोति विचक्षणः
स परमपदं लभते सलक्षणः ॥ ११ ॥]

व्या०—कुगुरु-सुगुरू समौ तुल्यौ दृश्येते बहिः, परं यः कुगुरुः स आन्तरो व्याधिः 'रे' इति सम्बोधने । यस्तयोः कुगुरु-सुगुर्वोरन्तरं विशेषं करोति विचक्षणः; स परमपदं मोक्षपदं लभते सलक्षणः सह लक्षणैः सामुद्रिकादिभिर्वर्त्तते ॥ ११ ॥

यः कुगुरु-सुगुर्वोरन्तरं न करोति, तस्य दृष्टान्तेन दोषमाह—

जो धत्तूरयफुल्लु समुज्जलु
पिक्खिवि लग्गउ तित्थु समुज्जलु ।
जइ सो तसु रसु पियणह इच्छइ
ता जगु सव्वु वि सुन्नउ पिच्छइ ॥ १२ ॥

[यो धत्तूरपुष्पं समुज्ज्वलं
प्रेक्ष्य लग्नस्तत्र समुज्जडः ।

यदि स तस्य रसं पातुमिच्छति
तदा जगत् सर्वमपि शून्यं(सुवर्णं) पश्यति ॥ १२ ॥]

व्या०—यो धत्तूरकपुलं(ष्पं) समुज्ज्वलं निर्मलं प्रेक्ष्य लग्नस्तत्र पुष्पे समुत् सहर्षो जडो मूर्खः । यदि स जडस्तस्य पुष्पस्य रसस्तं पातुमिच्छति ततो जगत् सर्वं सुवर्णं पश्यति । यदि कुगुरुधत्तूरकवचनरसं पिबति साभिलाषं शृणोति तत्त्वबुद्धया प्रतिपद्यत इति यावत् । तदा स सर्वं जगत् शून्यं पश्यति नास्तिकदृष्टिरिव प्रतिपद्यत इत्यर्थः । कुगुरवो हि स्वयं नष्टाः परानपि नाशयन्तीति तात्पर्यार्थः ॥ १२ ॥

इदानीं सुगुरूपदेशविवेकिनां भव्यानां विशेषेण चेतासि निवेशिते तथा प्रतिपादयन्नाह--

इय मणुयत्तु सुदुल्लहु लद्धउ
कुल-बल-जाइ-गुणेहिं समिद्धउ ।
दस दिट्ठंत इत्थ किर दिन्ना
इहु निप्फलु ता नेहु म धन्ना ॥ १३ ॥

[इति मनुजत्वं सुदुर्लभं लब्धं
कुल-बल-जाति-गुणैः समृद्धम् ।
दश दृष्टान्ता अत्र किल दत्ता
इति निष्फलं तस्मान्नैष्ट मा धन्याः ! ॥ १३ ॥]

व्या०—इति मनुजत्वं दुर्लभं लब्धं कुल-बल-जाति-गुणैः समृद्धं सम्पन्नम् । दश दृष्टान्ता अत्र मनुजत्वदुर्लभत्वे दत्ता इति हेतोर्निष्फलं मोघं ता तस्मान्मा नैष्ट धन्याः ! ॥ १३ ॥

न च नरत्वमात्रं कार्यकारीत्याह—

लद्धिं नरत्ति अणारियदेसेहिं
को गुणु तह विणु सुगुरुवएसिहि ? ।
आरियदेस जाइ-कुलजुत्तउ
काइ करेइ नरत्तु वि पत्तउ ? ॥ १४ ॥

[लब्धे नरत्वेऽनार्यदेशेषु
को गुणस्तथा विना सुगुरूपदेशम् (°शैः) ।
आर्यदेशे जाति-कुलयुक्तं
किं करोति नरत्वमपि प्राप्तम् ? ॥ १४ ॥]

व्या०—लब्धे नरत्वेऽनार्यदेशेषु को गुणः ?, तत्र अनार्यदेशेषु विना सुगुरूपदेशम् । आर्यदेशेऽपि जाति-कुलयुक्तं किं करोति नरत्वमपि प्राप्तम् ?॥ १४॥

जहि किर आउ होइ संखित्तउ
तित्थु न कज्जु पसाहइ वुत्तउ ।
तं पि बहुत्तु होइ जइ पुन्निहि
जित्थु गुरुत्तु सुणिज्जइ कंनिहि ॥ १५ ॥

[यत्र किलायुर्भवति संक्षिप्तं
तत्र न कार्यं प्रसाधयत्युक्तम् ।
तदपि प्रभूतं भवति यदि पुण्यैः
यत्र गुरूक्तं श्रूयते कर्णाभ्याम् ॥ १५ ॥]

व्या०—यत्र किल नरत्वे आयुर्जीवितं संक्षिप्तं भवति, तत्र नरत्वे न कार्यमुक्तं सिद्धान्तप्रतिपादितं ज्ञान-दर्शन-चारित्राराधनादिकं न प्रसाधयति । तदपि आयुः प्रभूतं भवति, यदि पुण्यैः । यत्र प्रभूते आयुषि सति गुरूक्तं श्रूयते कर्णाभ्याम् ॥ १५ ॥

उत्तरोत्तरयोगं गुणसाधनमाह—

सद्दहाणु तव्वयणु सुणंतह
विरला कसु वि होइ गुणवंतह ।
पढहिं गुणहि सिद्धंतु बहुत्तइ
सद्दहाणु पर नत्थि जिणोत्तइ ॥ १६ ॥

[श्रद्धानं तद्वचनं शृण्वतो
विरलस्य कस्यापि भवति गुणवतः ।
पठन्ति गुणयन्ति सिद्धान्तं प्रभूताः
श्रद्धानं परं नास्ति जिनोक्ते ॥ १६ ॥]

व्या०—श्रद्धानं तद्वचनं गुरूक्तं शृण्वतो विरलस्य कस्यापि भवति गुणवतः । एतदेव व्यतिरेकेणाह—पठन्ति गुणयन्ति सिद्धान्तं प्रभूताः, श्रद्धानं परं नास्ति जिनोक्ते ॥ १६ ॥

एतदेव विशेषेणाह—

अविहि पयट्टहि विहिपरु दूसहि
पडिउ पवाहि लोउ सु पसंसहि ।
अणुसोयह पडिसोयह अंतरु
न कुणहि खवणय जेव निरंतरु ॥ १७ ॥

[अविधिना प्रवर्तन्ते विधिपरान् दूषयन्ति
पतितं प्रवाहे लोकं ते प्रशंसन्ति ।
अनुस्रोतसः प्रतिस्रोतसोऽन्तरं
न कुर्वन्ति क्षपणक इव निरन्तरम् ॥ १७ ॥]

व्या०—अविधिना प्रवर्त्तन्ते, विधिपरान् भव्यान् दूषयन्ति । पतितं प्रवाहेऽनुस्रोतोमार्गरूपे लोकं प्रशंसन्ति । अनुस्रोतसः सकाशात् प्रतिस्रोतसो विशेषं न कुर्वन्ति । किन्तु क्षपणक इव निरन्तरं अन्तरस्याभावो निरन्तरं विशेषाभावं कुर्वन्ति । क्षपणकपक्षे निरन्तरं अन्तराभावं अन्तरायव्यपगममिति यावत् ॥ १७ ॥

इदानीं मन्दमेधसां विपर्यस्तत्वं दर्शयन्नाह--

करिवि जिणोत्ति धम्मि जण लग्गा
दूरिण जंति सुगुरु-सुइभग्गा ।
विहिपह-पक्खइ जिणु मुणिं वंदहि
तं मग्गट्ठिउ जणु अहिणंदहि ॥ १८ ॥

[कृत्वा जिनोक्तं धर्मे जना लग्ना
दूरेण यान्ति सुगुरु-श्रुतिभग्नाः ।
विधिपथपक्षे (?) जिनं मुनिं वन्दन्ते
तन्मार्गस्थितं जनमभिनन्दयन्ति ॥ १८ ॥]

व्या०-जिनोक्तमिति कृत्वा धर्मे जना लग्नाः । दूरेण यान्ति सुगुरु-श्रुति-आगमश्रवणभग्नाः विधिपथपार्थक्ये वर्तमानान् जिनमुनीन् वन्दन्ते तन्मार्गस्थितं जनमभिनन्दन्ति बहु मन्यन्ते ॥ १८ ॥

जमणाययणु जिणेहि निदंसिउ
तं वंदहि बहुलोयनमंसिउ ।
जे रयणित्थि लोय ते थोवा
अइसउ न मुणवि अंतरु धोवा ॥ १९ ॥

[यदनायतनं जिनैर्दर्शितं
तं वन्दन्ते बहुलोकनमस्कृतम् ।
ये रत्नार्थिनो लोकास्ते स्तोका
ईदृशं न जानन्त्यन्तरं मूर्खाः ॥ १९ ॥]

व्या०–यदनायतनं जिनैर्दर्शितं तं वन्दन्ते बहुलोकनमस्कृतम्। ये रत्नार्थिनो लोकास्ते स्तोकाः, ईदृशमन्तरं विशेषं न जानन्ति धोया मूर्खाः ॥ १९ ॥

पारतंतु विहिविसउ न बुज्झहि
जो परियाणइ तिणि सहु जुज्झहिं ।
सो भस्समग्गहगहिउ निरुत्तउ
दसमच्छेरएण सो भुत्तउ ॥ २० ॥

[पारतन्त्र्यं विधिविषयं न बुध्यते
यः परिजानाति तेन सह युध्यते ।
स भस्मग्रहगृहीतो निरुक्तं
दशमाश्चर्येण स भुक्तः ॥ २० ॥]

व्या०—पारतन्त्र्यं विधिमागमाज्ञां विषयं गोचरं गुणवत्पात्रं न बुध्यते यः परिजानाति। कोऽर्थः ? पारतन्त्र्यादिकं बुध्यते, तेन सह युध्यते स पूर्वोक्तः पारतन्त्र्याद्यनभिज्ञस्तदभिज्ञयोधे च भस्मग्रहगृहीतो निरुक्तं निश्चितं दशमाश्चर्येणासंयतपूजाख्येन स भुक्तो ग्रस्तः ॥ २० ॥

अहह ! हुंड अवसप्पिणि दुट्ठी
जह अस्संजयपूइँ पयट्ठी ।
तासु वि दूसम जाय सहाइणि
जव्वस हूय पय पावह भाइणि ॥ २१ ॥

[अहह ! हुण्डावसर्पिणी दुष्टा
यस्यामसंयतपूजा प्रविष्टा ।
तस्या अपि दुःषमा जाता सहायिनी
यद्वशाद् भूता प्रजा पापस्य भागिनी ॥ २१ ॥]

व्या०–' अहहेति खेदे ' हुण्डावसर्प्पिणी दुष्टा, यस्यामसंयतपूजा प्रविष्टा। तस्या अपि दुःखँ(ष)मा सहायिनी जायते साहाय्यकारिणी सम्पद्यते। यद्वशात् प्रजा भूता पापभागिनी ॥ २१ ॥

तह वि जहन्न वीस जा विरुई
ताण पयट्ठ गुणह गरुई ।
तासु अंति संवच्छर जि हुया
खउ पाविय पय पुण तहि बहुया ॥ २२ ॥

[तथापि जघन्यविंशतिर्या विरूपा
तासां प्रविष्टा गुणानां गुर्वीं ।

तस्या अन्ते संवत्सरा ये भूताः
क्षयं प्राप्ताः प्रजाः पुनस्तत्र प्रभूताः ॥ २२ ॥]

व्या०–तथा जघन्यविंशतिरपि विरूपा जाता। तासां दुःखँमासंयतपूजा जघन्यविंशतीनां प्रविष्टा सती गुणानां प्रतिष्ठा गुर्व्वी गता प्रलीना । तस्या जघन्यविंशतेरन्ते प्रान्ते ये संवत्सरा भूताः, क्षयं प्राप्ताः प्रजास्तेषु संवत्सरेषु प्रभूताः ॥ २२ ॥

पुनर्विशेषोपदेशमाह--

ईसर धम्म–पमत्त जि अच्छहि
पाउ करेवि ति कुगइहिं गच्छहिं ।
धम्मिय धम्मु करंति जि मरिसिहि
ते सुहु सयलु मणिच्छिउ लहिसिहिं ॥ २३ ॥

[ईश्वरा धर्मप्रमत्ता ये आसते
पापं कृत्वा ते कुगतौ गच्छन्ति (गमिष्यन्ति) ।
धार्मिका धर्मं कुर्वन्तो ये मरिष्यन्ति
ते सुखं सकलं मनईप्सितं लप्स्यन्ते ॥ २३ ॥]

व्या०–ईश्वरा धर्मप्रमत्ता ये आसते, पापं कृत्वा ते कुगतौ गच्छन्ति । धार्मिका धर्मं कुर्वन्तो ये मरिष्यन्ति, ते सुखं सकलं मनईप्सितं लप्स्यन्ते ॥ २३ ॥

पुन्नवंत विहिधम्मि जि लग्गहिं
ते परमत्थिण जीवहि जग्गहिं ।
अप्पु समप्पहि ते न पमायह
इह-परलोइ वि विहियावायह ॥ २४ ॥

[पुण्यवन्तो विधिधर्मे ये लगन्ति
ते परमार्थेन जीवन्ति जाग्रति ।
आत्मानं समर्पयन्ति ते न प्रमादस्य
इह परलोकेऽपि विहितापायस्य ॥ २४ ॥]

व्या०–पुण्यवन्तो विधिधर्मे ये लगन्ति, ते परमार्थेन जीवन्ति जाग्रति । आत्मानं न समाय (०मर्प)यन्ति ते प्रमादस्य इह–परलोकेऽपि विहितापायस्य ॥२४॥

तुम्हह इहु पहु चाहिलि दंसिउ
हियइ बहुत्तु खरउ वीमंसिउ ।
इत्थु करेज्जहु तुम्हि सयायरु
लीलइ जिव तरेहु भवसायरु ॥ २५ ॥

[युष्माकमेष पन्थाश्चाहिलेन दर्शितो
हृदये प्रभूतं खरं विमृश्य (०मर्शितः) ।
अत्र कुर्यात यूयं सदाऽऽदरं
लीलया यथा तरथ भवसागरम् ॥ २५ ॥]

व्या०–युष्माकं यशोदेवाभ्-आसिग-सम्भवानां एष पन्थाश्चाहिलेन युष्मात्पित्रा दर्शितः । अथ च चाहिलिकोऽर्थो वीक्ष्य सन्मार्गपरीक्षणेन हृदये बहु प्रभूतं खरमत्यर्थं विमृश्य अत्र सन्मार्गे कुर्यात यूयं सदा सर्वदा आदरं प्रयत्नं लीलया यथा तरथ भवसागरम् । किलाणहिलपाटकपत्तने चाहिलनामा श्रावको धर्मार्थी विचारचातुरीचञ्चुरभूत् । तस्य च चत्वारः पुत्रा बभूवुः । तद्यथा-यशोदेवः, अद्भुत आभू इति प्रसिद्धः, आसिगः, सम्भवश्चेति । तेन च चाहिलेन धर्म–गुरुपरीक्षापरायणेन प्रभुश्रीजिनदत्तसूरयो धर्माचार्यतया प्रतिपन्नाः । ते च तत्पुत्राः पित्राज्ञारता अपि धर्मज्ञा अपि कालदोषात् युतभावं कर्तुमीषुः । स च चाहिलस्तथा गुणमनीक्षमाणः पुत्राणां शिक्षाप्रदिदापयिषया तथाविधस्वरूपगर्भां विज्ञप्तिकां प्रभुश्रीजिनदत्तसूरीणां प्रेषयामास । ततस्तैरपि करुणासुधासमुद्रैस्तेषामुपचिकीर्षया एवंविधधर्मदेशनागर्भः प्रतिलेखः प्रेषितः । ततस्ते एतदनुसारेण प्रवर्त्तमाना विविधमानृधुः, विधिधर्मं चाराधयामासुरिति ॥ २५ ॥

जहिं घरि बंधु जुय जुय दीसइं
तं घरु पडइ वहंतु न दीसइ ।
जं दढबंधु गेहु तं बलियउ
जडि भिज्जंतउ सेसउ गलिउ ॥ २६ ॥

[यस्मिन् गृहे बन्धवो युतयुता दृश्यन्ते
तद् गृहं पतति वहन्न दृश्यते ।
यद् दृढबन्धं गेहं तद् बलिकं
जडे(ले) भिद्यमाने शेषं गलितम् ॥ २६ ॥]

व्या०–यस्मिन् गृहे बन्धवो युतयुताः पृथग्भूता दृश्यन्ते, तद् गृहं पतति । वहन्नव्यवच्छेदेन वर्त्तमानं न दृश्यते यद् दृढबन्धं सस्नेहबान्धवं गेहं तद् बलिकं बलवत् । जडे तद्गेहसम्बन्धिनि मूर्खे भिद्यमाने मन्दस्नेहतया पृथग् भवति सति शेषं गृहं गृहवास्तव्यलोकं गलितं भ्रष्टम् । द्वितीयोऽर्थः––यत्र गेहे बन्धाः संयमनानि त्रुटितानि दृश्यन्ते । तद् गेहं वहदवतिष्ठमानं न दृश्यते । यद् दृढबन्धं तद् बलिकं जडे पानीये भिद्यमाने गलति सशेषं गेहं गलितं भ्रष्टमेव ॥ २६ ॥

एकत्वे गुणमाह--

कज्जउ करइ बुहारी बद्धी
सोहइ गेहु करेइ समिद्धी ।
जइ पुण सा वि जुयं जुय किज्जइ
ता किं कज्ज तीए साहिज्जइ ? ॥ २७ ॥

[कार्यकं करोति बहुकरी बद्धा
शोध(भ)यति गेहं करोति समृद्धिम् ।
यदि पुनः साऽपि युतयुता क्रियते
ततः किं कार्यं तया साध्यते ? ॥ २७ ॥]

व्या०–कार्यकं पुञ्जकं करोति बहुकरी प्रमार्जनी बद्धा शोधयति शोभयति वा गेहं करोति समृद्धिम् । यदि पुनः साऽपि युतयुता पृथग्भूतैकैकतृणा क्रियते, ततः किं कार्यं तया साध्यते निष्पाद्यते ? न किञ्चित् । एवमेव कुटुम्बवासे उपनयो योज्यः ॥ २७ ॥

माता–पित्रादिभक्तस्य गुणमाह—

पुणवसु हत्थि चडइ सो चित्तह
सोमु सूरु पुत्तु वि मावित्तह ।
जो किर चित्तह मज्झि न पविसइ
जेट्ठह मूलि सु कहि किव होसइ ? ॥ २८ ॥

[पुनर्वसु हस्ते चटति सौचित्यस्य (स चित्रायाः)
सौम्यः(मः) शू(सू)रः पुत्रोऽपि माता–पित्रोः ।
यः किल चित्तस्य (चित्राया) मध्ये न प्रविशति
ज्येष्ठानां(या) मूले स कथय कथं भविष्यति ? ॥ २८ ॥]

व्या०— पुनर्भूयोऽपि वसु द्रव्यं हस्ते करे चटति आरोहति सौचित्यस्य उचितवृत्तिप्रधानस्य । सौम्यः प्रशान्तात्मा सूरस्तेजस्वी पुत्रस्तनयः स चित्ते माता-पित्रोरपि आस्तामन्यस्य प्रायः सर्वस्य गुणप्रियत्वात् । यः किल चित्तमध्ये न प्रविशति चित्तं नावर्ज्जयति माता-पित्रादीनां ज्येष्ठानां महतां पुरुषाणां मूले आदौ स कथय त्वमेव ब्रूहि कथं भविष्यति न कथञ्चित् उपायाभावात्, जनानुरागप्रभवत्वात् सम्पदाम् । अन्यः प्रतीयमानोऽर्थः–पुनर्वस्वोस्तारकयोर्हस्ते चटति चित्रायां सोमश्चन्द्रः, सूरः सूर्यः, पुत्रोऽपि सोमस्य बुधः, सूरस्य शनिः, 'मावित्तह'त्ति विशाखासु यः किल चित्रामध्ये न प्रविशति । ज्येष्ठायां मूले च स कथय कथं भविष्यति ? न कथञ्चित्, पूर्वानारोहे उत्तरानारोहात् । तदयमत्र तात्पर्यार्थः—ग्रहा अपि क्रमेणैव नक्षत्राण्यारोहन्ति, नाक्रमेण; अनेनैव दृष्टान्तेन पुरुषा अपि क्रमेणैव सम्पदमारोहन्ति, नाक्रमेण । अतो न तदप्राप्तौ यथाकथञ्चिदाकुलत्वं युज्यत इति भावः ॥ २८ ॥

लोहिण जडिउ जु पोउ स फुट्टइ
चुंबुकु जहि पहाणु किव वट्टइ ? ।
नेय समुद्दह पारु सु पावइ
अंतरालि तसु आवय आवइ ॥ २९ ॥

[लोहे(भे)न जडितो यः पोतः स स्फुटति
चुम्बको यत्र पाषाणः कथं वर्तते ? ।
नैव समुद्रस्य पारं स प्राप्नोति
अन्तराले तस्यापदागच्छति ॥ २९ ॥]

व्या०–लोहेन जडितः पोतो यः स स्फुटति । यत्र पोते चुम्बको लोहाकर्षणकारी पाषाणो भवति, स पोतः कथं वर्त्तते ? न कथञ्चिद् भजत इत्यर्थः । नैव समुद्रस्य पारं स पातः प्राप्नोति अन्तराले अन्तरे तस्य पोतस्य आपदागच्छति । द्वितीयपक्षे–लोभेन चतुर्थकषायेन जडितो ग्रस्तः पोतः संसारसमुद्रनिस्तारकारणतया गुरुर्यः स स्फुटति गुरुगुणैर्वियुक्तत्वात् लाघवं प्राप्नोति । यत्र च गुरौ चुम्बकोऽनवस्थितः साधुः प्रधानं स गुरुः कथं वर्त्तते ? न कथञ्चित् । अपि तु स्तोकदिनैरेव विशृङ्खलीभवति नैव संसारसमुद्रपारं स गुरुः प्राप्नोति । अन्तरालेऽन्तरे तस्य गुरोरापदागच्छति ॥ २९ ॥

लोहिण रहिउ पोउ गुरुसायरु
दीसइ तरंतु जइ वि जडवायरु ।
लाहउ करइ सु पारु वि पावइ
वाणियाह धणरिद्धि वि दावइ ॥ ३० ॥

[लोहे(भे)न रहितः पोतो गुरुसादरः (गुरुः सागरे)
दृश्यते तरन् यद्यपि जडवादरः (वातः) ।
लाभं करोति स पारमपि प्राप्नोति
वणिजानां धनऋद्धिमपि दर्श(दाप)यति ॥ ३० ॥]

व्या०–लोभेन रहितो गुरुः पोतः प्रवहणसदृशः सागरं संसारसागरं तरन् दृश्यते । यद्यपि जडवादरः जडैर्मूर्खैरधर्मज्ञैर्वादरो व्याकुलः । लाभं ज्ञानादिलाभं करोति स गुरुपोतः पारमपि प्राप्नोति प्रापयति च । वणिजां वाणिजानां वणिज एव वाणिजा धर्मधनलाभार्थिनः तेषां धर्मधनऋद्धिमपि दर्शयति । द्वितीयपक्षे पोतः प्रवहणं, गुरुर्महान् लोहेन रहितः, सागरं समुद्रं तरन् वणिजां धनऋद्धिमपि दर्शयति परपारलाभजनिताम् ॥ ३० ॥

जो जणु सुहुगुरु-दिट्ठिहि दिट्ठउ
तसु किर काइ कारइ जमु रुट्ठउ ? ।
जसु परमेट्ठि-मंतु मणि निवसइ
सो दुहमज्झि कया वि न पइसइ ॥ ३१ ॥

[यो जनः शुभगुरुदृष्ट्या दृष्टः
तस्य किल किं करोति यमो रुष्टः ? ।
यस्य परमेष्ठिमन्त्रो मनसि निवसति
स दुःखमध्ये कदापि न प्रविशति ॥ ३१ ॥]

व्या०–प्रकृतोऽर्थः प्रकटः । द्वितीयस्तु किञ्चिदुच्यते । यः किल शुभगुरुदृष्ट्या ज्योतिःशास्त्रोक्तशोभनस्थानवर्त्तिनो गुरोर्बृहस्पतेर्दृष्ट्या दृष्टो लग्नद्वारेण, तस्य किं करोति यमः शनैश्चरः द्वादशजन्मद्वितीयादिस्थानस्थः ? ॥ ३१ ॥

इदानीमुपसंहरति—

इय जिणदत्तुवएसु जि निसुणहि
पढहि गुणहि परियाणवि जि कुणहि ।
ते निव्वाण-रमणी सहु विलसहि
वलिउ न संसारिण सहु मिलिसिहिं ॥ ३२ ॥

[इति **जिनदत्तो**पदेशं ये निशृण्वन्ति
पठन्ति गुणयन्ति परिज्ञाय ये कुर्वन्ति ।
ते निर्वाणरमण्या सह विलसन्ति
वलित्वा न संसारेण सह मिलिष्यन्ति ॥ ३२ ॥]

कालस्वरूपकुलकं समाप्तमिति ।

व्या०—इति पूर्वोक्तेन प्रकारेण जिनैरर्हद्भिर्दत्तो वितीर्णो य उपदेशः कृत्याकृत्यविधिनिषेधरूपस्तम् । अथ च जिनदत्तसूरिरिति कवेर्नाम । ये निशृण्वन्ति नियमेनाकर्णयन्ति, पठन्ति अधीयते, गुणयन्ति अभ्यस्यन्ति, परिज्ञाय विदित्वा ये कुर्वन्ति अनुतिष्ठन्ति; ते निर्वाणरमण्या मुक्तिकान्तया सह विलसन्ति क्रीडन्ति । वलित्वा व्यावृत्य न संसारेण सह मिलिष्यन्ति संगंस्यन्ते भव-तरुबीज-कर्माभावादिति भावः ॥ ३२ ॥

सूरप्रभोऽभिषेकः श्री**जिनपतिसूरि**पदकमलभृङ्गः ।
व्यावृत द्वात्रिंशतमल्पमेधसां किमपि बोधाय ॥ १ ॥

कालस्वरूपकुलकं व्याख्याय यदर्जितं मया पुण्यम् ।
तेनास्तु भव्यलोकः सकलोऽपि **विधि**प्रबोधरतः ॥ २ ॥

इति कालस्वरूपकुलकविवरणं समाप्तम् ॥३॥

परिशिष्टम् ।

श्रीजिनवल्लभसूरिविरचितः

सङ्घपट्टकः ।

वह्निज्वालावलीढं कुपथमथनधीर्मातुरस्तोकलोक-
स्याग्रे सन्दर्श्य नागं कमठमुनितपः स्पष्टयन् दुष्टमुच्चैः ।
यः कारुण्यामृताब्धिर्विधुरमपि किल स्वस्य सद्यः प्रपद्य
प्राज्ञैः कार्यं कुमार्गस्खलनमिति जगादेव देवं स्तुमस्तम् ॥ १ ॥

कल्याणाभिनिवेशवानिति गुणग्राहीति मिथ्यापथ-
प्रत्यर्थीति विनीत इत्यशठ इत्यौचित्यकारीति च ।
दाक्षिण्यीति दमीति नीतिभृदिति स्थैर्यीति धैर्यीति सद्-
धर्मार्थीति विवेकवानिति सुधीरित्युच्यसे त्वं मया ॥ २ ॥

इह किल कलिकालव्यालवक्त्रान्तराल-
स्थितजुषि गततत्त्वप्रीतिनीतिप्रचारे ।
प्रसरदनवबोधप्रस्फुरत्कापथौघ-
स्थगितसुगतिसर्गे सम्प्रति प्राणिवर्गे ॥ ३ ॥

प्रोत्सर्पद्भस्मराशिग्रहसखदशमाश्चर्यसाम्राज्यपुष्य-
न्मिथ्यात्वध्वान्तरुद्धे जगति विरलतां याति जैनेन्द्रमार्गे ।
संक्लिष्टद्विष्टमूढप्रखलजडजनाम्नायरक्तैर्जिनोक्ति-
प्रत्यर्थी साधुवेषैर्विषयिभिरभितः सोऽयमप्राथि पन्थाः ॥ ४ ॥

अ(य)त्रौद्देशिकभोजनं जिनगृहे वासो वसत्यक्षमा
स्वीकारोऽर्थगृहस्थयचैत्यसदनेष्वप्रेक्षिताद्यासनम् ।
सावद्याचरितादरः श्रुतपथावज्ञा गुणिद्वेषधी-
र्धर्मः कर्महरोऽत्र चेत् पथि भवेन्मेरुस्तदाऽब्धौ तरेत् ॥ ५ ॥

षट्कायानुपमृद्य(मर्द्य) निर्दयमृषीनाधाय यत् साधितं
शास्त्रेषु प्रतिषिध्यते यदसकृन्निस्त्रिंशताधायि यत् ।
गोमांसाद्युपमं यदाहुरथ यद् भुक्त्वा यतिर्यात्यध-
स्तत् को नाम जिघत्सतीह सघृणः सङ्घादिभक्तिं विदन् ॥ ६ ॥

गायद्गन्धर्वनृत्यत्पणरमणिरणद्वेणुगुञ्जन्मृदङ्ग-
प्रेङ्खत्पुष्पस्रगुद्यन्मृगमदलसदुल्लोचचञ्चज्जनौघे ।

देवद्रव्योपभोगध्रवमठपतिताऽऽशातनाभ्यस्तसन्तः
सन्तः सद्भक्तियोग्ये न खलु जिनगृहेऽर्हन्मतज्ञा वसन्ति ॥ ७ ॥

साक्षाज्जिनैर्गणधरैश्च निषेवितोक्तां
निःसङ्गताग्रिमपदं मुनिपुङ्गवानाम् ।

शय्यातरोक्तिमनगारपदं च जानन्
विद्वेष्टि कः परगृहे वसतिं सकर्णः ? ॥ ८ ॥

चित्रोत्सर्गापवादे यदिह शिवपुरीदूतभूते निशीथे
प्रागुक्त्वा भूरिभेदा गृहिगृहवसतीः कारणेऽपोह्य पश्चात् ।

स्त्रीसंसक्त्यादियुक्तेऽप्यभिहितयतनाकारिणां संयतानां
सर्वत्रागारिधाम्नि न्ययमि न तु मतः क्वापि चैत्ये निवासः ॥ ९ ॥

प्रव्रज्याप्रतिपन्थिनं ननु धनस्वीकारमाहुर्जिनाः
सर्वारम्भपरिग्रहं त्वतिमहासावद्यमाचक्षते ।

चैत्यस्वीकरणे तु गर्हिततमं स्यान्माठपत्यं यते-
रित्येवं व्रतवैरिणीति ममता युक्ता न मुक्त्यर्थिनाम् ॥ १० ॥

भवति नियतमत्रासंयमः स्याद् विभूषा
नृपतिकुदमेतल्लोकहासश्च भिक्षोः ।

स्फुटतर इह सङ्गः सातशीलत्वमुच्चै-
रिति न खलु मुमुक्षोः सङ्गतं गच्छिकाऽऽदि ॥ ११ ॥

गृही नियतगच्छभाग् जिनगृहेऽधिकारो यतेः
प्रदेयमशनादि साधुषु यथा तथाऽऽरम्भिभिः ।

व्रतादिविधिवारणं सुविहितान्तिकेऽगारिणां
गतानुगतिकैरदः कथमसंस्तुतं प्रस्तुतम् ? ॥ १२ ॥

निर्वाहार्थिनमुज्झितं गुणलवैरज्ञातशीलान्वयं
तादृग्वंशजतद्गुणेन गुरुणा स्वार्थाय मुण्डीकृतम् ।

यद् विख्यातगुणान्वया अपि जना लग्नोग्रगच्छग्रहा
देवेभ्योऽधिकमर्चयन्ति महतो मोहस्य तज्जृम्भितम् ! ॥ १३ ।

दुष्प्रापा गुरुकर्मसञ्चयवतां सद्धर्मबुद्धिर्नृणां
जातायामपि दुर्लभः शुभगुरुः प्राप्तः स पुण्येन चेत् ।

कर्तुं न स्वहितं तथाप्यलममी गच्छस्थितिव्याहताः
कं ब्रूमः कमिहाश्रयेमहि कमाराध्येम किं कुर्महे ? ॥ १४ ॥

क्षुत्क्षामः किल कोऽपि रङ्कशिशुकः प्रव्रज्य चैत्ये क्वचित्
कृत्वा कञ्चन पक्षमक्षतकलिः प्राप्तस्तदाचार्यकम् ।
चित्रं चैत्यगृहे गृहीयति निजे गच्छे कुटुम्बीयति
स्वं शक्रीयति बालिशीयति बुधान् विश्वं वराकीयति ! ॥ १५ ॥
यैर्जातो न च वर्धितो न च न च क्रीतोऽधमर्णो न च
प्राग् दृष्टो न च बान्धवो न च न च प्रेयान् न च प्रीणितः ।
तैरेवात्यधमाधमैः कृतमुनिव्याजैर्बलाद् वाह्यते
नस्योतः पशुवज्जनोऽयमनिशं नीराजकं हा ! जगत् ॥ १६ ॥
किं दिङ्मोहमिताः किमन्ध-बधिराः किं योगचूर्णीकृताः ?
किं दैवोपहताः किमङ्ग ! ठगिताः किं वा ग्रहावेशिताः ? ।
कृत्वा मूर्ध्नि पदं श्रुतस्य यदमी दृष्टोरुदोषा अपि
व्यावृत्तिं कुपथाज्जडा न दधतेऽसूयन्ति चैतत्कृते ॥ १७ ॥
इष्टावाप्तितुष्टविटनटभटचेटकपेटकाकुलं
निधुवनविधिनिबद्धदोहदनरनारीनिकरसङ्कुलम् ।
राग-द्वेष-मत्सरेर्ष्याघनमघपङ्केऽथ निमज्जनं
जनयत्येव च मूढजनविहितमविधिना जैनमज्जनम् ॥ १८ ॥
जिनमतविमुखविहितमहिताय न मज्जनमेव केवलं
किन्तु तपश्चरित्र-दानाद्यपि जनयति न खलु शिवफलम् ।
अविधि-विधिक्रमाज्जिनाज्ञाऽपि ह्यशुभ-शुभाय जायते
किं पुनरिति विडम्बनैवाहितहेतुर्न प्रतायते ॥ १९ ॥
जिनगृह-जिनबिम्ब-जिनपूजन-जिनयात्राऽऽदि विधिकृतं
दान-तपो-व्रतादि-गुरुभक्ति-श्रुतपठनादि चादृतम् ।
स्यादिह कुमत-कुगुरु-कुग्राह-कुबोध-कुदेशनांशतः
स्फुटमनभिमतकारि वरभोजनमिव विषलवनिवेशतः ॥ २० ॥
आकृष्टुं मुग्ध-मीनान् बडिशपिशितवद् बिम्बमादर्श्य जैनं
तन्नाम्ना रम्यरूपानपवरक-मठान् स्वेष्टसिद्धयै विधाप्य ।
यात्रा-स्नात्राद्युपायैर्नमसितक-निशाजागराद्यैश्छलैश्च
श्रद्धालुर्नामजैनैश्छलित इव शठैर्वञ्च्यते हा ! जनोऽयम् ॥२१॥
सर्वत्रास्थगिताश्रवाः स्वविषयव्यासक्तसर्वेन्द्रिया
वल्गद्गौरवचण्डदण्ड-तुरगाः पुष्यत्कषायोरगाः ।
सर्वाकृत्यकृतोऽपि कष्टमधुनाऽन्त्याश्चर्यराजाश्रिताः
[illegible]त्वा सन्मुनिमूर्धसूद्धतधियस्तुष्यन्ति पुष्यन्ति च ॥ २२ ॥

सर्वारम्भ–परिग्रहस्य गृहिणोऽप्येकाशनाद्येकदा
प्रत्याख्याय न रक्षतो हृदि भवेत् तीव्रानुतापः सदा ।
षट्कृत्वस्त्रिविधं त्रिधेत्यनुदिनं प्रोच्यापि भञ्जन्ति ये
तेषां तु क्व तपः क्व सत्यवचनं क्व ज्ञानिता क्व व्रतम् ! ॥ २३ ॥
देवार्थव्ययतो यथारुचिकृते सर्वर्तुरम्ये मठे
नित्यस्थाः शुचिपट्टतूलिशयनाः सद्गन्दिकाद्यासनाः ।
सारम्भाः सपरिग्रहाः सविषयाः सेर्ष्याः सकाङ्क्षाः सदा
साधुव्याजविटा अहो ! सितपटाः कष्टं चरन्ति व्रतम् ॥ २४ ॥
इत्याद्युद्धतसोपहासवचसः स्युः प्रेक्ष्य लोकाः स्थितिं
श्रुत्वाऽन्येऽभिमुखा अपि श्रुतपथाद् वैमुख्यमातन्वते ।
मिथ्योक्त्या सुदृशोऽपि बिभ्रति मनः सन्देहदोलाचलं
येषां ते ननु सर्वथा जिनपथप्रत्यर्थिनोऽमी ततः ॥ २५ ॥
सर्वैरुत्कटकालकूटपटलैः सर्वैरपुण्योच्चयैः
सर्वव्यालकुलैः समस्तविधुराधि–व्याधि–दुष्टग्रहैः ।
नूनं क्रूरमकारि मानसममुं दुर्मार्गमासेदुषां
दौरात्म्येन निजघ्नुषां जिनपथं वाचैष सेत्यूचुषाम् ॥ २६ ॥
दुर्भेदस्फुरदुग्रकुग्रहतमःस्तोमास्तधीचक्षुषां
सिद्धान्तद्विषतां निरन्तरमहामोहादहम्मानिनाम् ।
नष्टानां स्वयमन्यनाशनकृते बद्धोद्यमानां सदा
मिथ्याचारवतां वचांसि कुरुते कर्णे सकर्णः कथम् ? ॥ २७ ॥
यत् किञ्चिद् वितथं यदप्यनुचितं यल्लोक–लोकोत्तरो-
त्तीर्णं यद् भवहेतुरेव भविनां यच्छास्त्रबाधाकरम् ।
तत् तद् धर्म इति ब्रुवन्ति कुधियो मूढास्तदर्हन्मत-
भ्रान्त्या लान्ति च हा ! दुरन्तदशमाश्चर्यस्य विस्फूर्जितम् ॥ २८ ॥
कष्टं नष्टदिशां नृणां यदृशां जात्यन्धवैदेशिकः
कान्तारे प्रदिशत्यभीप्सितपुराध्वानं किलोत्कन्धरः ।
एतत् कष्टतरं तु सोऽपि सुदृशः सन्मार्गगांस्तद्विद-
स्तद्वाक्याननुवर्तिनो हसति यत् सावज्ञमज्ञानिव ॥ २९ ॥
सैषा हुण्डावसर्पिण्यनुसमयहसद्भव्यभावानुभावा
त्रिंशश्चोग्रग्रहोऽयं खखनखमितिवर्षास्थितिर्भस्मराशिः ।

अन्त्यं चाश्चर्यमेतज्जिनमतहृतये तत्समा दुःषमा चे-
त्येवं पुष्टेषु दुष्टेष्वनुकलमधुना दुर्लभो जैनमार्गः ॥ ३० ॥

सम्यग्मार्गपुषः प्रशान्तवपुषः प्रीतोल्लसच्चक्षुषः
श्रामण्यर्द्धिमुपेयुषः स्मयमुषः कन्दर्पकक्षप्लुषः ।

सिद्धान्ताध्वनि तस्थुषः शमजुषः सत्पूज्यतां जग्मुषः
सत्साधून् विदुषः खलाः कृतदुषः क्षाम्यन्ति नोद्यद्रुषः ॥३१॥

देवीयत्युरुदोषिणः क्षतमहादोषानदेवीयति
सर्वज्ञीयति मूर्खमुख्यनिवहं तत्त्वज्ञमज्ञीयति ।

उन्मार्गीयति जैनमार्गमपथं सम्यक्पथीयत्यहो !
मिथ्यात्वग्रहिलो जनः स्वमगुणाग्रण्यं कृतार्थीयति ॥ ३२ ॥

सङ्घत्राकृतचैत्यकूटपतितस्यान्तस्तरां ताम्यत-
स्तन्मुद्रादृढपाशबन्धनवतः शक्तस्य न स्पन्दितुम् ।

मुक्त्यै कल्पितदान-शील-तपसोऽप्येतत्क्रमस्थायिनः
सङ्घव्याघ्रवशस्य जन्तुहरिणव्रातस्य मोक्षः कुतः ? ॥ ३३ ॥

इत्थं मिथ्यापथकथनया तथ्ययाऽपीह् कश्चित्
मेदं ज्ञासीदनुचितमथो मा कुपत् कोऽपि यस्मात् ।

जैनभ्रान्त्या कुपथपतितान् प्रेक्ष्य नृंस्तत्प्रमोहा-
पोहायेदं किमपि कृपया कल्पितं जल्पितं च ॥ ३४ ॥

प्रोद्भूतेऽनन्तकालात् कलिमलनिलये नाम नेपथ्यतोऽर्हन्-
मार्गभ्रान्तिं दधानेऽथ च तदभिमरे तत्त्वतोऽस्मिन् दुरध्वे ।

कारुण्याद् यः कुबोधं नृषु निरसिसिषुर्दोषसङ्ख्यां विवक्षे-
दम्भोऽम्भोधेः प्रमित्सेत् स सकलगगनोल्लङ्घनं वा विधित्सेत्॥३५॥

न सावद्याम्नाया न बकुश-कुलीशोचितयति-
क्रियामुक्ता युक्ता न मद-ममता-जीवन-भयैः ।

न संक्लेशावेशा न कदभिनिवेशा न कपट-
प्रिया ये तेऽद्यापि स्युरिह यतयः सूत्ररतयः ॥ ३६ ॥

संविग्नाः सोपदेशाः श्रुतनिकषविदः क्षेत्र-कालाद्यपेक्षा-
नुष्ठानाः शुद्धमार्गप्रकटनपटवः प्रास्तमिथ्याप्रवादाः ।

वन्द्याः सत्साधवोऽस्मिन् नियम-शम-दमौचित्य-गाम्भीर्य-धैर्य-
स्थैर्यौदार्यार्यचर्या-विनय-नय-दया-दाक्ष्य-दाक्षिण्यपुण्याः ॥३७॥

विभ्राजिष्णुमगर्वमस्मरमनाशादं श्रुतोल्लङ्घने
सज्ज्ञानद्युमणिं जिनं वरवपुः श्रीचन्द्रिकाभेश्वरम् ।
वन्दे वर्ण्यमनेकधा सुरनरैः शक्रेण चैनश्छिदं
दम्भारिं विदुषां सदा सुवचसाऽनेकान्तरङ्गप्रदम् ॥ ३८ ॥

जिनपतिमतदुर्गे कालतः साधुवेषै-
र्विषयिभिरभिभूते भस्मक-म्लेच्छसैन्यैः ।
स्ववशजडजनानां शृङ्खलेव स्वगच्छे
स्थितिरियमधुना तैरग्रथि स्वार्थसिद्धयै ॥ ३९ ॥

सम्प्रत्यप्रतिमे कुसङ्घवपुषि प्रोज्जृम्भिते भस्मक-
म्लेच्छातुच्छबले दुरन्तदशमाश्चर्ये च विस्फूर्जति ।
प्रौढिं जग्मुषि मोहराजकटके लोकैस्तदाज्ञापरै-
रेकीभूय सदागमस्य कथयाऽपीत्थं कदर्थ्यामहे ॥ ४० ॥

इति सङ्घपट्टकः समाप्तः ॥

(२)

श्रीजिनदत्तसूरिविरचितं

गणधरसार्धशतकम् ।

गुणमणिरोहणगिरिणो रिसहजिणिंदस्स पढममुणिवइणो ।
सिरिउसभसेणगणहारिणोऽणहे पणिवयामि पए ॥ १ ॥
अजियाइजिणिंदाणं जणियाणंदाण पणयपाणीणं ।
थुणिमोऽदीणमणो हं गणहारीणं गुणगणोहं ॥ २ ॥

गौतमः—

सिरिवद्धमाणवरनाण-चरण-दंसणमणीण जलनिहिणो ।
तिहुयणपहुणो पडिहणियसत्तुणो सत्तमो सीसो ॥ ३ ॥
संखाइए वि भवे साहिंतो जो समत्तसुयनाणी ।
छउमत्थेण न नज्जइ एसो न हु केवली होइ ॥ ४ ॥
तं तिरिय-मणुय-दाणव-देविंदनमंसियं महासत्तं ।
सिरिनाणसिरिनिहाणं गोयमगणहारिणं वंदे ॥ ५ ॥

सुधर्मस्वामी—

जिणवद्धमाणमुणिवइसमप्पियासेसतित्थभारधरणेहिं ।
पडिहयपडिवक्खेणं जयम्मि धवलाइयं जेण ॥ ६ ॥

संस्कृतच्छाया ।

गुणमणिरोहणगिरे **ऋषभ**जिनेन्द्रस्य प्रथममुनिपतेः ।
श्री**ऋषभसेन**गणधारिणोऽनघौ प्रणिपतामि पदौ ॥ १ ॥
अजितादिजिनेन्द्राणां जनितानन्दानां प्रणतप्राणिनाम् ।
स्तौम्यदीनमना अहं गणधारिणां गुणगणौघम् ॥ २ ॥
श्री**वर्धमान**वरज्ञान-चरण-दर्शनमणीनां जलनिधेः ।
त्रिभुवनप्रभोः प्रतिहतशत्रोः सत्तमः शिष्यः ॥ ३ ॥
सङ्ख्यातीतानपि भवान् कथयन् यः समस्तश्रुतज्ञानी ।
छद्मस्थेन न ज्ञायत एष न खलु केवली भवति ॥ ४ ॥
तं तिर्यग्-मनुज-दानव-देवेन्द्रनमस्थितं महासत्त्वम् ।
श्रीज्ञानश्रीनिधानं **गौतम**गणधारिणं वन्दे ॥ ५ ॥
जिन**वर्धमान**मुनिपतिसमर्पिताशेषतीर्थभारधरणैः ।
प्रतिहतप्रतिपक्षेण जगति धवलायितं येन ॥ ६ ॥

तं तिहुयणपणयपयारविंदमुद्दामकामकरिसरहं ।
अणहं सुहम्मसामिं पंचमठाणट्ठिय वंदे ॥ ७ ॥

जम्बूः—

तारुण्णे वि हु णो तरलतारअद्धच्छिपिच्छिरीहिं मणो ।
मणयं पि मुणियपवयणसब्भावं भामियं जस्स ॥ ८ ॥
मण–परमोहिप्पमुहाणि परमपुरपत्थिएण जेण समं ।
समइक्कंताणि समग्ग(त्त)भव्वजणजणियसुक्खाणि ॥ ९ ॥
तं जंबुनामनामं सुहम्मगणहारिणो गुणसमिद्धं ।
सीसं सुसीसनिलयं गणहरपयपालयं वंदे ॥ १० ॥

प्रभवाचार्यः—

संपत्तवरविवेयं वयत्थिगिहिजंबुनामवयणाओ ।
पालियजुगपवरपयं पभवायरियं सया वंदे ॥ ११ ॥

शय्यम्भवः—

कट्ठमहो ! परमेयं तत्तं न मुणिज्जइ त्ति सोऊणं ।
सिज्जंभवं भवाओ विरत्तचित्तं नमंसामि ॥ १२ ॥

यशोभद्र–सम्भूतसूरी—

संजणियपणयभद्दं जसभद्दं मुणिगणाहिवं सगुणं ।
संभूयं सुहसंभूइभायणं सूरिमणुसरिमो ॥ १३ ॥

तं त्रिभुवनप्रणतपदारविन्दमुद्दामकामकरिशरभम् ।
अनघं **सुधर्म**स्वामिनं पञ्चमस्थानस्थितं वन्दे ॥ ७ ॥
तारुण्येऽपि हि नो तरलतारार्धाक्षिप्रेक्षमाणाभिर्मनः ।
मनागपि ज्ञातप्रवचनसद्भावं भ्रामितं यस्य ॥ ८ ॥
मनः–परमावधिप्रमुखानि परमपुरप्रस्थितेन येन समम् ।
समतिक्रान्तानि समस्तभव्यजनितसौख्यानि ॥ ९ ॥
तं **जम्बूनामनामं सुधर्म**गणधारिणो गुणसमृद्धम् ।
शिष्यं सुशिष्यनिलयं गणधरपदपालकं वन्दे ॥ १० ॥
सम्प्राप्तवरविवेकं व्रतार्थिगृहि**जम्बू**नामवचनात् ।
पालितयुगप्रवरपदं **प्रभवाचार्यं** सदा वन्दे ॥ ११ ॥
कष्टमहो ! परमेतत्तत्त्वं न ज्ञायते इति श्रुत्वा ।
शय्यम्भवं भवाद् विरक्तचित्तं नमस्यामि ॥ १२ ॥
सञ्जनितप्रणतभद्रं **यशोभद्रं** मुनिगणाधिपं सगुणम् ।
सम्भूतं सुखसम्भूतिभाजनं सूरिमनुस(स्म)रामः ॥ १३ ॥

भद्रबाहुगुरुः—

सुगुरुतरणीइ जिणसमयसिंधुणो पारगामिणो सम्मं ।
सिरिभद्दबाहुगुरुणो हियए नामक्खरे धरिमो ॥ १४ ॥

स्थूलभद्रः—

सो कहं न थूलभद्दो लहइ सलहं मुणीण मज्झंमि ? ।
लीलाइ जेण हणिओ सरहेण व मयणमयराओ ॥ १५ ॥
कामपईवसिहाए कोसाए बहुसिणेहभरियाए ।
घणदड्ढजणपयंगाए(दि) वि जीए जो झामिओ नेय ॥ १६ ॥
जेण रविणेव विहिए(य) इह जणगिहे सप्पहं पया(हा)संती ।
सययं सकज्जलग्गा पहयपहा सा सिणिद्धा वि ॥ १७ ॥
जेणासु साविया साविया चरण–करणसहिएण ।
सपरेसिं हियकए सुकयजोगओ जोगयं दट्ठुं ॥ १८ ॥
तमपच्छिमं चउद्दसपुव्वीणं चरण–नाणसिरिसरणं ।
सिरिथूलभद्दसमणं वंदे हं मत्तगयगमणं ॥ १९ ॥

आर्यमहागिरिः—

विहिया अणिगूहियविरियसत्तिणा सत्तमेण संतुलणा ।
जेणज्जमहागिरिणा समइक्कंते वि जिणकप्पे ॥ २० ॥

सुगुरुतरण्या जिनसमयसिन्धोः पारगामिनः सम्यक् ।
श्रीभद्रबाहुगुरोर्हृदये नामाक्षराणि धरामः ॥ १४ ॥
स कथं न स्थूलभद्रो लभते श्लाघां मुनीनां मध्ये ? ।
लीलया येन हतः शरभेणेव मदनमृगराजः ॥ १५ ॥
कामप्रदीपशिखया कोशया बहुस्नेहभृतया ।
घनदग्धजनपतङ्गयाऽपि यया यो ध्यामितो नैव ॥ १६ ॥
येन रविनेव विहिता इह जनगृहे स्वप्रभां प्रकाश(भास)यन्ती ।
सततं स्वकार्यलग्ना(सकज्जलाग्रा)प्रहतप्रभा सा स्निग्धाऽपि ॥ १७ ॥
येनाशु श्राविता श्राविका चरण–करणसहितेन ।
स्व–परेषां हितकृते सुकृतयोगतो योग्यतां दृष्ट्वा ॥ १८ ॥
तमपश्चिमं चतुर्दशपूर्विणां चरण–ज्ञानश्रीशरणम् ।
श्रीस्थूलभद्रश्रमणं वन्देऽहं मत्तगजगमनम् ॥ १९ ॥
विहिताऽनिगूहितवीर्यशक्तिना सत्तमेन सन्तुलना ।
येनार्यमहागिरिणा समतिक्रान्तेऽपि जिनकल्पे ॥ २० ॥

आर्यसुहस्ती—

तस्स कणिट्ठं लट्ठं अज्जसुहत्थिं सुहत्थिजणपणयं ।
अवहत्थियसंसारं सारं सूरिं समणुसरिमो ॥ २१ ॥

आर्यसमुद्र-मङ्गु-सुधर्माणः—

अज्जसमुद्दं जणयं सिरीइ वंदे समुद्दगंभीरं ।
तह अज्जमंगुसूरिं अज्जसुधम्मं च धम्मरयं ॥ २२ ॥

भद्रगुप्तः—

मण-वयण-कायगुत्तं तं वंदे भद्दगुत्तगणनाहं ।
जइ जिमइ जई जम्मंडलीए तो मरइ तेहिं समं ॥ २३ ॥

श्रीवज्रस्वामी—

छम्मासिएण सुकयाणुभावओ जायजाइसरणेण ।
परिणामओऽणवज्जा पव्वज्जा जेण पडिवन्ना ॥ २४ ॥
तुंबवणसंनिवेसे जाएणं नंदणेण नंदाए ।
धणगिरिणो तणएणं तिहुयणपहुपणयचरणेण ॥ २५ ॥
इक्कारसंगपाढो कओ दढं जेण साहुणीहिंतो ।
तस्सज्झायज्झयणुज्जएण वयसा छवरिसेणं ॥ २६ ॥
सिरिअज्जसीहगिरिणा गुरुणा विहिओ गुणाणुरागेण ।
लहुओ वि जो गुरुकओ णाणदाणओऽसेससाहूणं ॥ २७ ॥

तस्य कनिष्ठं लष्टमार्यसुहस्तिनं सुखा(शुभा)र्थिजनप्रणतम् ।
अपहस्ततसंसारं सारं सूरिमनुस(स्म)रामः ॥ २१ ॥
आर्य**समुद्रं** जनकं श्रिया वन्दे समुद्रगम्भीरम् ।
तथाऽऽर्य**मङ्गु**सूरिमार्य**सुधर्मं** च धर्मरतम् ॥ २२ ॥
मनो-वचन-कायगुप्तं तं वन्दे **भद्रगुप्त**गणनाथम् ।
यदि जिमति यतिर्यन्मण्डल्यां ततो म्रियते तैः समम् ॥ २३ ॥
षाण्मासिकेन सुकृतानुभावतो जातजातिस्मरणेन ।
परिणामतोऽनवद्या प्रव्रज्या येन प्रतिपन्ना ॥ २४ ॥
तुम्बवनसंनिवेशे जातेन नन्दनेन **नन्दा**यां ।
धनगिरेस्तनयेन त्रिभुवनप्रभुप्रणतचरणेन ॥ २५ ॥
एकादशाङ्गपाठः कृतो दृढं येन साध्वीभ्यः ।
तत्स्वाध्यायाध्ययनोद्यतेन वयसा षड्वर्षेण ॥ २६ ॥
श्रीआर्य**सिंहगिरि**णा गुरुणा विहितो गुणानुरागेण ।
लघुकोऽपि यो गुरुकृतो ज्ञानदानतोऽशेषसाधूनाम् ॥ २७ ॥

उज्जेणीए गहिअव्वओ लहु गुज्झगोहिं वरिसंते ।
जो सुजइ त्ति निमंतिय परिक्खिओ पत्ततव्विज्जो ॥ २८ ॥
उद्धरिया जेण पयाणुसारिणा गयणगामिणी विज्जा ।
सुमहापइन्नपुव्वाओ सव्वहा पसमरसिएण ॥ २९ ॥
दुक्कालंमि दुवालसवरसि(रिस)यंमि सीयमाणे संघंमि ।
विज्जाबलेणमाणियमन्नं जेणन्नक्खित्ताओ ॥ ३० ॥
सुररायचावविब्भमभमुहाधणुमुक्कनयणबाणाए ।
कामग्गिसमीरणविहियपत्थणावयणघडणाए ॥ ३१ ॥
लट्ठंगपइट्ठाए सिट्ठिसुयाए विसिट्ठचिट्ठाए ।
गुणगणसवणाओ जस्स दंसणुक्कंठियमणाए ॥ ३२ ॥
नियजणय(ग)दिन्नधण–कणय(ग)–रयणरासीइ जो कन्नाए ।
तुच्छमवि न मुच्छिओ जोव्वणे वि धणिय धणड्ढाए ॥ ३३ ॥
जलणगिहाओ माहेसरीए कुसुमाणि जेणमाणित्ता ।
तिव्वन्नियाणं माणो मलिओ संघुन्नई विहिया ॥ ३४ ॥
दूरोसारियवय(इ)रो वय(इ)रसेणनामेण जस्स बहुसीसो ।
सीसो जाओ जाओ जयम्मि जायाणुसारिगुणो ॥ ३५ ॥

उज्जयिन्यां गृहीतव्रतो लघु गुह्यकैर्वर्षति ।
यः सुयतिरिति निमन्त्र्य परीक्षितः प्राप्ततद्विद्यः ॥ २८ ॥
उद्धृता येन पदानुसारिणा गगनगामिनी विद्या ।
सुमहाप्रकीर्ण(परिज्ञा)पूर्वात् सर्वथा प्रशमरसिकेन ॥ २९ ॥
दुष्काले द्वादशवार्षिके सीदति सङ्घे ।
विद्याबलेनानीतमन्नं येनान्यक्षेत्रात् ॥ ३० ॥
सुरराजचापविभ्रमभ्रूधनुर्मुक्तनयनबाणया ।
कामाग्निसमीरणविहितप्रार्थनावचनघटनया ॥ ३१ ॥
लष्टाङ्गप्रतिष्ठया श्रेष्ठिसुतया विशिष्टचेष्टया ।
गुणगणश्रवणाद् यस्य दर्शनोत्कण्ठितमनसा ॥ ३२ ॥
निजजनकदत्तधन–कनकरत्नराश्या यः कन्यया ।
तुच्छमपि न मूर्छितो यौवनेऽपि बाढं धनाढ्यया ॥ ३३ ॥
ज्वलनगृहान्माहेश्वर्या कुसुमानि येनानीय ।
त्रैवर्णिकानां मानं मर्दितं सङ्घोन्नतिर्विहिता ॥ ३४ ॥
दूरोत्सारितवैरो **वयर(वज्र)सेन**नाम्ना यस्य बहुशिष्यः ।
शिष्यो जातो जातो जगति जातानुसारिगुणः ॥ ३५ ॥

कुंकणविसए सोपारयंमि सुगुरूवएसओ जेण ।
कहिय सुभिक्खमविग्घं विहिओ संघो गुणमहग्घो ॥ ३६ ॥
तमहं दसपुव्वधरं धम्मधुराधरणसेससमविरियं ।
सिरिवय(इ)रसामिसूरिं वंदे थिरयाइ मेरुगिरिं ॥ ३७ ॥

आर्यरक्षितः—

